A.C. Joshi Library
P.U. Chandigarh

MSS No. 283 Subject Philosophy

Name of MSS ब्रह्मसूत्र वृत्ति

Author रामकींकराचार्य

Period Folios 75

Script SANSKRIT Source Prithi Pal Singh

Missing Folios 41A, 42

ब्रह्मसूत्र ; रामकींकराचार्यकृत
७५ पत्रक ॥ ल० अ० १३ पं० प्र०पृ०

ह०लि०

ब्रह्मसूत्रवृत्ति

برہم سوتر برتی

برہم سوتر برتی ، شنکر

برہما امرت ورشنی

13X7

150

283

ॐ
१ ब्र
1

ॐश्रीगणेशायनमः श्रीरामचंद्रायनमः श्रीकृष्णचंद्रायनमः श्रीसरस्वत्यै ॐविश्वेश्वरायनमः श्री
रामचरणद्वंद्वमद्वंद्वानंदसाधनं नमामियद्रूपाभासात्पाषाणोप्यस्त्वंगतः १ संगतिःसंशयः
पूर्वपरपक्षौतयोःफलं भाष्यस्थाःसुलभाःसर्वैः सूत्राणामनवशेषतः २ व्याख्यायंतेस्फुटन्यायैर्मे
तभेदोपिकुत्रचित् उच्यतेसर्वबोधार्थंश्रीरामोवीक्षतामिदं ३ इहखलुनित्याध्ययनविधिनाधी
तस्वाध्यायमापातज्ञानवंतंपरमपुरुषार्थकामं सैहिकामुष्मिकफलेषुविरक्तमुपलभमानः
परमकारुणिकोमुनिःसूत्रयामास अथातोब्रह्मजिज्ञासेति अत्राथशब्देनसाधनचतुष्टयस
पत्यानंतर्यमुच्यते तद्यथेहकर्मचितोलोकःक्षीयते एवमेवामुत्रपुण्यचितोलोकःक्षीयत इत्या
दिनाकर्मफलानामनित्यत्वंपरीक्ष्यलोकान्कर्मचितान्ब्राह्मणोनिर्वेदमायान्नास्त्यकृतःकृतेनेति.
वैराग्यंकर्मफलेषुदर्शितं शांतोदांतउपरतादिनाशमादि नसपुनरावर्ततइत्यादिषुमोक्षस्य
नित्यत्वेन तत्रेच्छा एतदानंतर्यमेवसाधनचतुष्टयसंपत्त्यानंतर्यं अर्थान्मोक्षकामोऽधिकारी
सूच्यते अतःशब्देनसाधनचतुष्टयस्यसंभावनाब्रह्मजिज्ञासेत्यनेनाज्ञातत्वेनविषयत्वं
ज्ञातत्वेनप्रयोजनत्वंच ब्रह्मणउक्तंभवति एवंचप्रेक्षावत्प्रवृत्त्यंगभूताधिकार्यादिसमर्पकत्वे
नसमन्वयाद्यखिलविचारोपोद्घातत्वादादावस्यसूत्रस्यसंगतिः श्रवणविधिविषयवेदांतवा
क्यैःस्वार्थनिर्णयायास्यापेक्षणात् श्रुतिसंगतिः एवंसर्वेषांसूत्राणांश्रुतिसंगतिः विशेष। १ए.

1A

तो ब्रह्मपरवाक्यतात्पर्यनिर्णायकन्यायसूचकत्वात् ब्रह्मविचारात्मकशास्त्रसंगतिः एवमग्रेपि
शास्त्रसंगतिरूह्या अथातो ब्रह्मजिज्ञासेत्यादिभिः सूत्रैः सर्ववेदान्ता ब्रह्मपरा इति समन्वयप्रतिपा
दनात्तेषामध्यायस्य समन्वयाध्यायसंगतिः प्रथमपादे स्पष्टब्रह्मलिंगानां वाक्यानां विचार्यत्वात्पा
दस्यापि संगतिः प्राथम्यात्सूत्रस्याधिकरणसंगतिर्नापेक्षिता एतदानंतर्यं वितरेषामपेक्ष्य
ते तच्च तत्तदधिकरणप्रस्तावे वक्ष्यामः तत्र तावदात्मा वा अरे द्रष्टव्यः श्रोतव्यो मंतव्यो निदिध्या
सितव्य इति वाक्यं द्रष्टव्यस्यात्मसाक्षात्कारफलमनूद्य तत्साधनत्वेन श्रवणं विदधाति श्रवणं
नाम सर्वेषामुपनिषद्वाक्यानामद्वितीये ब्रह्मणि तात्पर्यावधारणानुकूलन्यायविचारः तादृश
विचारात्मकं वेदान्तशास्त्रमारभणीयं न वेति संदेहः सर्वत्र पूर्वोत्तरपक्षयुक्तिद्वयं संशयबीजं
द्रष्टव्यं तत्र पूर्वपक्षः शास्त्रं नारंभणीयं विषयप्रयोजनयोरसंभवात् तथाहि संदिग्धं विषयः
ब्रह्म तज्जीवात्मना ब्रह्मणोऽभिन्नत्वान्न संदिग्धं अहंप्रत्ययेन सुसंज्ञानमनेन तद्ब्रह्मेति वाक्येन च निर्णी
तत्वात् न च तत्त्वमस्यादिवाक्येनैक्यप्रतिभासनादहंप्रत्ययेन भेदावभासनात्संशयः अबाधि
ताहंप्रत्ययविरोधेनैक्यश्रुतेरुपचरितार्थत्वात् न चाध्यस्तात्मविषयत्वमहंप्रत्ययस्य स्वयंप्र
काशस्यात्मनोऽध्यासायोगात् नापि प्रयोजनं उक्तरूपब्रह्मज्ञाने निवृत्तेरदर्शनात्तस्माच्छास्त्रं
नारंभणीयं इति प्राप्ते रूढान्तः शास्त्रमारंभणीयं विषयप्रयोजनयोः संभवात् स्फुरदहंप्रत्य

यविरोधेनजीवाभिन्नब्रह्मणः संदिग्धत्वेनविषयत्वात् नचश्रुतेरुपचरितार्थत्वं उपक्रमादि
२ तात्पर्यलिंगसहकृतानेकवाक्यानामुपचरितार्थत्वायोगात् मनुष्योहमित्यादौपरैरपिभ्रमत्वेन
2 स्वीकारात् कर्तृत्वाद्यंशेपिश्रुतिबलात् भ्रमत्वमास्थेयमितिनात्मात्मानुपपत्तिः किंचनके
वलंसंदिग्धत्वेन अपितुविपर्यस्तत्वेनापिविषयत्वं ननुस्वयंप्रकाशेस्मात्मनिकथंदेहादिरिति
चेन्न अनाद्यविद्यावशात्तादृशेप्यात्मन्यध्याससंभवसिद्धतयास्वरूपस्यानस्यतद्विरोधिता
त् नापिफलाभावः यथावत्स्वरूपसाक्षात्कारस्येदानीमभवेप्यसंभवनादिशंकाकलंकितत्वे
नाऽविद्यानिवर्त्तकत्वाभावेपिश्रवणमनननिदिध्यासनैः शंकायांनिरस्तायांब्रह्मसाक्षात्कारेण
विद्यानिवृत्तौप्रतिबंधकाभावात् तथाचश्रुतिः तरतिशोकमात्मवित् एतद्योवेदनिहितंगुहा।
यांसोविद्याग्रंथिंविकिरतीहसौम्येति तस्माद्विषयफलेसंभवाच्छास्त्रस्यारंभणीयं अत्रकृत्स्न
शास्त्रप्रतिपाद्यंब्रह्म अध्यायैस्तत्प्रतिपाद्यानिसमन्वयाविरोधसाधनफलानि तदुक्तं शा
स्त्रंब्रह्मविचारस्यमध्यायाः स्युश्चतुर्विधाः समन्वयाविरोधौद्वौसाधनंफलंतथेति तत्रविव
रणमतानुसारिणः सूत्रेकर्त्तव्येति पदमध्याहृत्यविधिमितिवदंति तथाहि दृष्टवदनतिपरमपुरु
षार्थसाधनंतानमनूद्यतत्रह्रास्यपर्णत्वानेनप्रकृतिलक्षणयाऽभिन्नात्मविचारएवसाक्षात्का
रसाधनमितिनियम्यते व्रीहीनवहंतीतिवत् एवंचनावेदविन्मनुतेतंबृहंतं तंत्वौपनिषदं २.

2A

पुरुषमित्यादिनाब्रह्मणिप्रमाणांतराभावान्मननिदिध्यासनसहकृतंविचारितवेदांतवाक्यमेवसाक्षा
त्कारहेतुरितिसंपद्यते तथाच विचारविध्यपेक्षितानाधिकार्यादीनामागमिकत्वेपिन्यायेननिर्णयार्थमि
दंसूत्रं तस्मान्नवाच्यत्वेनानर्थकंस्यादितिकर्तव्यपदाध्याहारः शास्त्रेपुरुषप्रवृत्तिसिद्धयेश्रुतिसा
रूप्याय वा एवंसतिजिज्ञासामेसत्रप्रकृत्याज्ञानमात्रपरयासाध्यज्ञानमजहल्लक्षणयाबोध्यते प्रम
येनेच्छासाध्यविरोधजहल्लक्षणयाबोध्यते इतिनवीनमतं विवरणटिप्पण्यांतु प्रकृतेः सिद्धज्ञानमा
त्रवाचकत्वमंगीकृत्यसाध्यज्ञानेपिजहल्लक्षणैवेत्युक्तं तथाचायंसूत्रस्याक्षरार्थः साधनचतुष्टय
संपन्नस्यब्रह्मज्ञानायविचारः कर्त्तव्यइतिज्ञानस्यमोक्षहेतुत्वात् वेदांतानांविचार्यत्वंचार्थाल्लभ्यते॥
तथाचोक्ताधिकारिणामोक्षसाधनब्रह्मज्ञानायवेदांतवाक्यविचारः कर्त्तव्यइत्यार्थिकार्थइति मिश्र
मतानुसारिणाश्रुतिसूत्रयोरेकरूप्यनियमाभावेविषयप्रयोजनज्ञानादेवपुरुषप्रवृत्तिसिद्धिः॥
श्रवणविध्यसंभवंचमन्वानाः कर्त्तव्यपदेनाध्याहृतेनतव्यमितिवदंतितेषांमतेसाधनचतुष्टयसंपन्न
नेनरं ब्रह्मज्ञानेच्छाभवति कर्मफलस्यानित्यत्वात् ब्रह्मज्ञानात्परमपुरुषार्थश्रवणाच्चेतिश्रौतोर्थः
ज्ञानस्यविचारसाध्यत्वाद्विचारकर्त्तव्यताक्षिप्यतइतिविचारकर्त्तव्यतार्थिकोर्थइति अत्रविचारानारंभ
वादिन उपायांतरसाध्यामुक्तिरितिफले सिद्धेपि नसूत्रविचारसंभवात् ब्रह्मज्ञानसाध्यैवमुक्ति
रितिफलफलिभावद्रष्टव्यः एवंप्रथमसूत्रेब्रह्ममीमांसायाः प्रतिपादितत्वात्तस्याश्चलक्षणंप्रमाण

समन्वयाविरोधसाधनफलविषयतयानेकविधत्वेपिप्रथमं ब्रह्मणः प्राधान्यात्तल्लक्षणार्थमिदं सूत्रं जन्माद्य
२ स्य यत इति अस्य पूर्वाधिकरणेन संदिग्धत्वात् ब्रह्मविचार्यमित्युक्तमयुक्तं जन्मादेरन्यनिष्ठत्वेन ब्रह्मणो ल
3 क्षणाभावेन तत्स्वरूपस्यैवाभावादित्येवंरूपाक्षेपसंगतिः एवं पूर्वाधिकरणसिद्धांतयुक्तिमत्राधिकरणपूर्वप
क्षयुक्तिं चावेक्ष्य यथासंभवमाक्षेपसंगतिस्तत्र तत्रोह्या दृष्टांतप्रत्युदाहरणसंगती च सर्वत्र संभवतः प्र
कृते तत्र यथा संदिग्धत्वेन हेतुना ब्रह्म विचार्यं एवं जन्माद्यन्यनिष्ठत्वेन हेतुना ब्रह्मणो लक्षणं नास्तीति दृष्टां
तसंगतिः यथा विचार्यत्वे हेतुर्न तथा लक्षणसद्भावे हेतुरस्तीति प्रत्युदाहरणसंगतिः एवं सूत्रस्य ब्रह्मण
लक्षणपरीक्षणं देवात्रफलं अस्येदं विषयवाक्यं यतो वा इमानि भूतानि जायंते येन जातानि जीवंति
यत्प्रयंत्यभिसंविशंति तद्विजिज्ञासस्व तद्ब्रह्मेति प्रयंति म्रियमाणानीत्यर्थः तथा च म्रीयमाणानि संवि
शंतीति वाक्यार्थः अत्र प्रमाणं जन्मादिकं ब्रह्मलक्षणं नवेति संदेहः जन्मादेः प्रपंचनिष्ठत्वेन ब्र
ह्मसंबंधाभावान्न लक्षणमिति प्राप्ते नच सत्यं ज्ञानमित्यादिवाक्यस्य सत्यादिकं लक्षणं भवतीति वाच्यं
लोकसिद्धभिन्नार्थानामेकब्रह्मलक्षणत्वेनाप्रसिद्धत्वादिति प्राप्तेऽभिधीयते जगज्जन्मादिकारण
त्वं ब्रह्मणो लक्षणं तटस्थं सत्यादिकं तु स्वरूपलक्षणं नच लोकसिद्धभिन्नार्थत्वादीनामेकब्रह्मलक्ष
णत्वमप्रसिद्धमिति वाच्यं सत्यादिपदानामखंडार्थत्वेनैकब्रह्मपर्यवसायित्वेन सत्यादीनां लक्षणत्वसंभ
वादिति ॥ सूत्रार्थस्तु जन्माद्यस्य यत इति तत्पुरुषसंविज्ञानो बहुव्रीहिः जन्मस्थितिभंगं समासार्थः सर्वस्य ३

3A

त्रास्य ब्रह्मपदान्वयः तच्छब्दाभ्याहारः तेनास्य प्रत्यक्षाद्युपस्थितस्य प्रपंचस्य जन्मस्थितिभंगं यतो भ
वति तद्ब्रह्मेत्यर्थः यद्यप्यव्यभिचाराज्जन्मादिकारणत्वं प्रत्येकं लक्षणं संभवति तथापि उत्पादकत्वमा
त्रं निमित्तेप्यस्त्युपादानत्वसिद्ध्यर्थं त्रयग्रहणं नच लयग्रहणेनैव तत्सिद्धौ शेषवैयर्थ्यमिति वाच्यं ॥
नह्युपादानत्वं कुलधर्मतयोच्यते किंतु प्रकृतिविकारन्यायेनाहितौ यद्ब्रह्मसिद्ध्यर्थं एवंच भवतु ब्रह्मो
पादानं कुलालवदधिष्ठानात्म एवास्तु राज्यस्थितौ राजवच्चान्यत्रावस्थितौ कर्त्तास्त्वित्या शंकामाभूदि
तित्रितयग्रहणं कृतमिति एवं जगत्कारणत्वेन ब्रह्मणः सर्वज्ञत्वमर्थादुक्तं तदार्थिकसर्वज्ञत्वं हेत्वंत
रेण समर्थयितुमाह शास्त्रयोनित्वात् शास्त्रं वेदस्तस्य योनित्वात् कर्त्तृत्वात् सर्वज्ञकल्पवेदकर्तृत्वादपि
ब्रह्म सर्वज्ञमित्यर्थः अत्र सर्वज्ञत्वनिर्धारणं पूर्वपक्षफले तन्निर्धारणं सिद्धांतफले अथवा वेद
स्य नित्यत्वाद्ब्रह्मणो विश्वयोनितानेति शंकामपाकर्तुं शास्त्रयोनित्वमुच्यते अस्मिन्पक्षे श्रुतिप्रतिप्ति
पेवसंगतिः पूर्वसूत्रोक्तजगत्कारणत्वस्यैव समर्थनात् अस्य महतो भूतस्य निश्वसितमेवैतद्य
दृग्वेदो यजुर्वेदः सामवेद इत्यादिवाक्यमस्य सूत्रस्य विषयः अस्य नित्यसिद्धस्य ब्रह्मणो निश्वासव
दनायासेनैव वेदः सिद्ध इत्यर्थः अत्र ब्रह्म वेदान्करोति न करोति वेति संदेहे न करोति वाचा विरूप
नित्ययेति नित्यत्वश्रवणात् अस्मिन्मंत्रे विरूपेति देवतासंबोधनं अयावाचा स्तुतिं प्रेरयेति प्रा
र्थ्यते अनादिनिधना नित्या वागुत्सृष्टा स्वयंभुवा आदौ वेदमयी दिव्या यतः सर्वाः प्रवृत्तयः इति स्मृ

तेः अतो न वेदकर्तृत्वं ब्रह्मण इति न जगद्योनित्वमिति प्राप्ते ब्रूमः निश्वसितमस्यायेन वेदोत्पत्तिश्रवणात्॥
४ब्र तस्माद्यज्ञात्सर्वहुत ऋचः सामानि जज्ञिरे इति सर्वैर्यज्ञैर्हूयमानाद्यस्तस्मात्पूज्याद्ब्रह्मणो जज्ञिरे इति
वेदकर्तृत्वप्रतीतेर्विश्वयोनित्वमेतदनुरोधेन वाचेत्यादिस्मृतिस्तस्योरर्थवादत्वे नच वेदस्य सकर्तृत्वे।
4 पौरुषेयत्वं उपलभ्य विरचितत्वानंगीकारादिति अस्य मंत्रस्य द्वितीयवर्णके पूर्वसूत्रे जन्मादिका
रणत्वकथनेमध्ये कुलादिकं सकर्तृकं कार्यत्वात् घटवदित्यनुमानमपि ब्रह्मणि प्रमाणमित्याशं
कायां तन्माभूदितीदमुच्यते ब्रह्मन मानांतरवेद्यं कुतः शास्त्रयोनित्वात् शास्त्रं वेदो योनिः प्रमाणं यस्य
तत्त्वादित्यर्थः तं त्वौपनिषदं पुरुषं पृच्छामीत्युपनिषद्धि घ्ते प्रमितेः नावेदविन्मनुते तं बृहंतमिति स्मृ।
तात्स्यानुमानांतरनिषेधाच्च अनुमानं त्वनुकूलतर्कतयैवोपयुज्यते न स्वातंत्र्येणेत्यभिप्रायः ननु।
यतो वाचो निवर्त्तंते अतिश्रुतेर्वेदवेद्यत्वं कथमिति चेन्न लक्षणयावृत्तिविषयत्वेन शास्त्रयोनित्वं चैतस्या।
विषयत्वेनाप्रमेयत्वमित्यविरोधात् पूर्वसूत्रे द्वितीयवर्णके ब्रह्मणः शास्त्रप्रमाणकत्वमुक्तं तदाक्षि
प्य तत्समाधीयते तथाचाक्षेपसंगतिः फलं न पूर्वपक्षे उपनिषन्मात्रगम्यब्रह्मप्रवृत्त्यनुपपत्तिः सिद्धांते प्र
वृत्तिसिद्धिरिति वेदांताः कर्मशेषभूतकर्त्रादिपरा उत नित्यशुद्धबुद्धमुक्तब्रह्मपरा इति संशये न
ब्रह्मपराः अहेयानुपादेयसिद्धब्रह्मपरत्वेनितिः प्रयोजनत्वमापेक्षत्वयोः प्रसंगात् तदुभयनिवार
णाय कर्तृदेवतादिप्रतिपादनद्वारा कर्मपरत्वमिति प्राप्ते राद्धांतः तत्तु समन्वयात् तु शब्दः पूर्व ४

4A

पदव्याख्यानस्यार्थः तद्ब्रह्म वेदान्तेषु तात्पर्येण प्रतिपाद्यते कुतः समन्वयात् सम्यगन्वयः समन्व
यः तस्मादन्वयस्य सम्यक्त्वं तात्पर्यवत्त्वं वेदान्ताः नेकर्त्रादिप्रतिपादकाः भिन्नप्रकरणस्थ
त्वात् नच प्रकरणभेदादुपासनाविधिपरा इति वाच्यं तत्त्वमस्यादीनां विधिरहितानां बहुलमुप
लब्धेः स्वरूपज्ञानादपि नायं सर्प इत्यादिवदनर्थः निवृत्तेः प्रयोजनस्य सद्भावादपि विधिविशेष
त्वकल्पनायोगात् नच सापेक्षत्वं रूपादिविहीनस्य ब्रह्मणः प्रमाणान्तरानवगम्यत्वेन तत्प्रति
पादकवेदान्तानां सापेक्षत्वाभावात्तस्मादुपक्रमादिलिङ्गैर्वेदान्तानां ब्रह्मपरत्वमेवेति उपक्रमा
दिकं च दर्शयते सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयं आत्मा वा इदमेक एवाग्र आसीत् तदे
तद्ब्रह्मापूर्वमनपरमनन्तरमबाह्यं अयमात्मा ब्रह्म सर्वानुभूः ब्रह्मैवेदममृतं पुरस्तादित्यादि।
श्रुतीनामयमर्थः सदित्यस्तितामात्रं बोध्यते एवेत्यवधारणे किं तदवधियते तदाह इदमि
ति यदिदं व्याकृतं जगत् अग्र उत्पत्तेः प्राक् सदेवासीत् अव्याकृतं सत् कारणात्मकमेवा
सीदित्यर्थः हे सोम्य प्रियदर्शनेति पित्रा पुत्रः संबोध्यते बुद्धिग्राह्यस्थूलं पृथिव्यादि प्रागुत्पत्ते
र्माभूत् अन्यन्महदादिसूक्ष्ममासीदेवेति नेत्याह एवमिति सतोन्यत्कार्यं नासीदेवेत्यर्थः त
र्ह्यपि मृदो घटाकारपरिणामपितृकुलालवत् जगन्निमित्तं सतोन्यदासीदित्याशंक्याह अद्वि
तीयमिति सतोपि चित्त्वं विना प्रधानवज्जडत्वमित्याशंक्य श्रुत्यन्तरमुदाहरति आत्मा वा इति आत्मो

५ वे.

5

तिस्मात्मा मूलकारणं वैशद्येन प्रागवस्यास्मर्यते अविशिष्टमुक्तार्थं तस्य निर्विशेषत्वार्थमुत्त
रं तदेतदिति तच्छब्देन इन्द्रो मायाभिरिति प्रकृतात्मोक्तः विधेयब्रह्मापेक्षया नपुंसकं एतद्यत्त
द्ब्रह्मेत्यर्थः तत्किंलक्षणकं तत्राह अपूर्वमिति पूर्वं कारणं यस्य नास्ति तदपूर्वं अकार्यमित्या
र्थः अपरं कार्यं वास्तवं नास्तीत्यनपरं अकारणमित्यर्थः अनंतरं जात्यंतरं मध्ये तदालेनास्तीत्य
नंतरं एकरसमित्यर्थः तथाविधमन्यद्बहिस्तस्यास्ति किं नेत्याह अबाह्यमिति बाह्यमनात्म
भूतमेवंविधमस्य नास्तीत्यबाह्यं अद्वितीयमित्यर्थः तस्यापरोक्षतामाह अयमिति तत्सर्वसि
द्धं चिद्रूपत्वमाह सर्वेति ब्रह्मात्मना सर्वमनुभवतीत्यनुभूः अनुभाव्यस्य पृथक्त्वाद्द्वै
तमित्याशंक्याह त्वंतरं ब्रह्मेति यत्परत्वात्सर्वस्यादिशब्दब्रह्मैवाविदुषां भाति तत्सर्वमिदममृतं ब्र
ह्मैव वस्तुतः इत्यर्थः एवं लौकिकवाक्यानां सिद्धेर्थे प्रामाण्यमभ्युपगच्छतां वेदांतेषु विधिपरत्व
विनाऽनपेक्षत्वे फलत्वं च न लभ्यत इति वदतां वेदांतेभ्यो ब्रह्मसिद्धिमनंगीकुर्वतां मतं ब्रह्मणो मा
नांतरागम्यत्वात्सिद्धवस्तुज्ञानात् फललाभाच्च प्रत्यक्षं सप्रतिसिद्धे व्युत्पत्तिमनिच्छतामुपासि
विधिद्वारा वेदांतेभ्यो ब्रह्मसिद्धिमिच्छतां मतनिरासाय वर्णकांतरमारभ्यते तत्र वेदांता विधे
योपासनाविषयत्वेन ब्रह्म समर्पयंति तत्तु समन्वयादिति सिद्धे व्युत्पन्नाभावप्रभावाभ्यां संशये पूर्व
पक्षः प्रवृत्त्यादिलिंगाभावान्न सिद्धे व्युत्पत्तिः संभवतीति न सिद्धब्रह्मपरा वेदांताः किंच प्रवृ ५ए

5A

त्तिनिवृत्तिपरस्यैव शास्त्रत्वेन सिद्धब्रह्मपरत्वे शास्त्रत्वं च न संभवति नापि प्रयोजनवत्वं अहं ब्रह्मास्मी
ति ज्ञाने सत्यपि प्रयोजनस्याऽदर्शनात् यद्येवं भूतज्ञानात्प्रयोजनसिद्धिस्तर्हि मननादिविधानेन
स्यात् तस्मादात्मेत्येवोपासीत ब्रह्मवेद ब्रह्मैव भवति ब्रह्मभवनकामो ब्रह्मवेदनं कुर्यादित्येवमादि
विधिषु कोऽसावात्मेत्याकांक्षायां तत्समर्पकत्वेन सर्वे वेदान्ता उपयुज्यन्ते उपासनाया अपवर्गो मोक्ष इति
उच्यते तत्समन्वयात् तद्ब्रह्म सामान्यतो वेदान्तप्रतिपाद्यं कुतः समन्वयादित्यर्थः नन्वेवं तावदुपासनायाः फल
भूतो मोक्षः उपासनायाः तारतम्येन तत्साध्यमोक्षस्यापि तारतम्यमनित्यत्वं च स्यात् विधेय।
कर्मफलभोगदशायां शरीरस्यावश्यकत्वेन मोक्षेपि शरीरं स्यात् किंच अशरीरं वावसन्तं न प्रि
याप्रिये स्पृशत इति श्रुतेः स्वप्रियास्पर्शे निषेधो न स्यात् मोक्षस्य धर्मफलत्वेन तस्यैव प्रियस्य विद्य
मानत्वात् अत्रार्थस्य वस्तुतोऽशरीरं सन्तमात्मानं वैषयिके सुखदुःखे नैव स्पृशतो वा वेत्यवधा
रणात् इति तन्न धर्मजन्याऽशरीरत्वाख्यमोक्षातिरिक्तत्वादिति निषेधपरमिदं वाक्यमिति चेन्न
अशरीरं शरीरेष्वनवस्थेष्ववस्थितं महान्तं विभुमात्मानं मत्वा धीरो न शोचति अप्राणो ह्यम
नाः शुभ्रः असंगो ह्ययं पुरुषः इत्यादिश्रुतिभ्योऽशरीरत्वस्य स्वाभाविकत्वावगमात् अतो
नायमर्थः वस्तुतः स्थूलो शरीरं तत्रेदितः शरीरेष्विति अनवस्थेषु नित्येषु अवस्थितं नित्यं।।
तत्रेयद्देवेत्तरं महान्तमिति आपेक्षिकमहत्वं वारयति विभुमिति मन्त्रमंत्राभेदं प्रत्याह।।

आत्मानमिति ईदृशमात्मानं मत्वा धीरो भवति नहि तन्मतिं विना धीरत्वं सच शोकोपलक्षितं सं
६ वै. सारं नानुभवतीत्यर्थः सूक्ष्मशरीराभावे श्रुतिः अप्राण इति क्रियाशक्तिमान प्राणोऽस्य वस्तुतो
6 नास्तीति तन्निषेधात्तत्स्थानानि सार्थानि कर्मेन्द्रियाणि निषिद्धानि तदभिप्रायेण शब्दं ज्ञानश
क्तिमन्मनोऽस्य वस्तुतो नास्तीति तन्निषेधात्तत्स्थानानि ज्ञानेन्द्रियाणि सार्थानि निषिद्धानि॥ अत
एवमभ्रः शुद्ध इत्यर्थः स यत्तत्र किंचित्पश्यत्यनन्वागतस्तेन भवतीति स्वप्नादिकृतकर्मस्वकर्तृ
त्वेन कैवल्ये देहत्यजते असंग इति श्रुतिः सा स्तैरसंयुज्यमानस्य द्वे आत्मनः पूर्णत्वादत्र
मूर्तेन स्थूलसूक्ष्मशरीरादिना केनचिद्युज्यते तेनाकर्तृत्वमर्थः एवं स्वाभाविकाशरीरत्वादपरप
धीयमोक्षात्म्य ब्रह्मणः सत्त्वादिसंस्पर्शाभावे श्रुत्यन्तरमपि अन्यत्र धर्मादन्यत्राधर्मादन्यत्रा
स्मात्कृताकृतात् अन्यत्र भूताच्च भव्याच्च यत्तत्पश्यसि तद्वदेति धर्मात्तत्फलाच्च सुखात् अधर्माच्च
त्फलाद्दुःखात् कृतात्कार्यात् अकृतात्कारणात् भूतादतीतात् भव्याद्भाविनः चशब्देन वर्तमाना
दन्यत्रादित्यर्थः एतत्सर्वासंस्पर्शित्वं पावनत् एवंभूतं यत्पश्यसि तद्वदेति स्फुटं प्रतिनचिकेतसो व
चनं अपि च मोक्षस्य कर्मफलत्वे स्वर्गादिवदनित्यत्वं स्यादुपादेयत्वं न स्यात् ब्रह्म वेद ब्रह्मैव भवति॥
क्षीयन्ते चास्य कर्माणि तस्मिन्दृष्टे परावरे आनंदं ब्रह्मणो विद्वान्न बिभेति कुतश्चनेति अभयं वै
जनक प्राप्तोऽसि तदात्मानमेवावेदहं ब्रह्मास्मीति तस्मात्तत्सर्वमभवत् तत्र को मोहः कः शो रा६ शि.

6A

कृतार्थत्वमनुपश्यन्तः। तद्धैतत्पश्यन्नृषिर्वामदेवः प्रतिपेदेऽहं मनुरभवं सूर्यश्चेतीत्येवमादीनां ब्रह्मविद्या
कालएवमोक्षंदर्शयंतीनांवाक्यानांस्मात् कर्मफलानांकालांतरभावित्वनियमात् श्रुतीनामर्थंस्तु
योब्रह्मप्रत्यक्त्वेनवेदसाक्षात्करोतिसतदेवेद्यंब्रह्मभवति तस्मिन्परमात्मनिपरंकारणंऽपरंकार्यं
तद्रूपेतद्दृष्टिविज्ञानेप्रत्यक्त्वेनसाक्षात्कृतेसम्यग्विदुषः अस्यकर्मफलानिविकर्माणिक्षीणानिभवंति ब्रह्म
कोऽहंप्रमानंदविज्ञानमभयंद्वैतभावान्निर्भयोभवति इतिभावः श्लोकपूर्णार्थः हेतुत्वनकत्वमभयंब्र।
ह्मप्राप्तिलितत्वसाक्षात्कारवत्वात् यदस्मिन्देहेजलेसूर्यवत्प्रविष्टंब्रह्मजीवात्मतदाचार्येणबोधितं।
मोक्ष्मानमेवसर्वकल्पनातीतमवेत् विदितवान् कथंअहंब्रह्माद्वितीयमस्मीति तस्मात्तत्रानाद
ज्ञानकृतसर्वद्वैतत्वादित्विवृत्ता तद्ब्रह्मपूर्णात्मनास्थितमासीत् यस्मिन्सर्वाणिभूतान्यात्मैवाभूद्वि
जानतः इतियःसर्वात्मभावोविद्यायाःफलत्वेनोक्तः तत्रात्मनितद्दीकालेवातादात्म्यैकात्म्यपदेशेनयश्य
तः शोकाद्युपलब्धितःसंसारोनेति ततत्वदलंब्रह्मएतादात्म्यत्वेनावस्थितमहमस्मीतियश्य
त् अस्मादेवदर्शनादृषिर्वामदेवाख्यः परंब्रह्मात्मसद्वाराप्रतिपदेप्रतिपन्नवान्किलेतिदर्शते।
भवश्यानेनसंवध्यतेस्यचास्मिन्दर्शनेस्थितः सर्वात्मभावप्रकाशकानहंमनुरभवमित्यादीन्मंत्रा
न्दृष्टवान् इतश्च ब्रह्मर्थीनंविद्येपातफलेचनवैयर्थ्यमितिगम्यते नयदिदं तर्हिनःपितामहोस्माक
मविद्यायाःपरंपारंतारयसि श्रुतंह्येवमेभगवद्दृशेभ्यस्तरतिशोकमात्मविदिति सोऽहंभगवः

वें
शोचामि तं मां भगवान् शोकस्य पारं तारयतु तस्मै मृदितकषायाय तमसः पारं दर्शयति भगवा
न्सनत्कुमारः इत्याद्याः श्रुतयो ब्रह्मविद्यायाः अविद्यानिवृत्तिद्वारा मोक्षहेतुत्वं दर्शयंति अविद्या
निवर्तकत्वं च प्रमाणवस्तुपरतंत्रज्ञानस्यैवेति न विधेया ब्रह्मविद्या तत्फलेन विधेयसाध्यमिति ॥
७ अतीनामेयोऽर्थः भारद्वाजादयः षट् ऋषयः परविद्याप्रदं पिप्पलादाख्यं गुरुं विद्यानिष्क्रयार्थ्य.
मभ्यर्चनरूपं पश्यन्तः पादयोः प्रणामं चक्रिरे त्वं हि नः पितेति त्वं खल्वस्माकं पिता ब्रह्मदेहस्याजरा
मरस्य विद्यया जननेपितृत्वात् न पितरौ तद्देहदेहमात्रमेव जन्म नयतः जनपितृत्वमपि सिद्धस्यैवा
विद्यानिरासादित्याह यस्त्वमस्मान् विद्यामहोदधेः परं अपुनरावृत्तिरूपं पारं तारयसि प्रापय
सि विद्याप्लवेनेति अतो हीत्यादि तारयसि त्वं तमपक्रमस्य शेषमुपसंहारस्य मिति भेदः मेमया
भवद्दर्शेभ्यः भगवत्तत्त्वेभ्यः अतमेवयदात्मविज्ञेभ्यं मनस्तापं व्यक्तमर्थवृद्धिं नरकीति ॥
सोऽहमनात्मवित्त्वाच्छोचामि अतस्तं मां शोचन्तं शोकसागरस्य पारमंतं तारयतु प्रापयतु भगवान्
आत्मज्ञानोडुपेनेति नारदेन पृच्छितः सनत्कुमारः तस्मै नारदाय मृदितकषायाय वैराग्यादिना क्षा
लितरागादिसमस्तदोषाय योग्याय तमसः अविद्यायाः पारं परमात्मतत्त्वं दर्शितवानिति ननु
ब्रह्मैव विधेयमस्तु मुक्तेः फलत्वात् न च ब्रह्मणोऽकारणकत्वादविधेयता ब्रह्मवेदेत्यादिना
कर्मत्वप्रतीतेरिति चेत्र फलासंभवस्योक्तत्वात् न ब्रह्मणः कृतिसाध्यत्वाभावेन विधेयत्वानुपप ६ए

तेषु नापि कर्मत्वं किंचिद्विक्रियाकर्मत्वं उतोपासनाकर्मत्वं नाद्य अन्यदेव तद्विदितादथो अविदिताद्
7A धियेनेदं सर्वं विजानाति तं केन विजानीयादित्यादिनाविदिक्रियाकर्मत्वप्रतिषेधात् न द्वितीयः त
देव ब्रह्म त्वं विद्धि नेदं यदिदमुपासत इत्युपासनाकर्मत्वप्रतिषेधात् अन्यदेव तद्ब्रह्म विदितात्कार्याद्
अन्यदेव अथो अपि अविदितात्कारणादन्यदेव अधि उपरिष्टादन्यदित्ति येन प्रमात्रादृ इदं सर्वं
वस्तु लोको जानाति तं केन करणेन जानीयात्करणस्य तदविषयत्वात् ज्ञातर्यप्रवृत्ते तस्मात्प्रमा
त्मैतयाः किं तस्मादीतिः यद्वाचानभ्युदितं येन वागभ्युद्यत इत्यविषयत्वमुक्त्वा तदेवेति प्रमात्रादेः
कल्पनामयोऽयं आत्मभूतं ब्रह्म महत्त्वमभिनि त्वं विद्धि यदुपाधिविशिष्टं देवतादिकमिदमित्युपास
ते जनाः नेदं त्वं ब्रह्म विद्धीत्यर्थः एतच्च ब्रह्मणोऽकर्मत्वं गम्यते यस्यामतं तस्य मतं मतं यस्य न वे
द सः अविज्ञातं विजानतां विज्ञातमविजानतां न दृष्टेर्द्रष्टारं पश्येः न विज्ञातेर्विज्ञातारं विजानीया
इत्यादिश्रुतयः अविषयत्वं बोधयंति यस्य ब्रह्मामतं अविषय इति निश्चयः तस्य तन्मतं सम्य
ग्ज्ञातं यस्य मतं विषयतया ज्ञातं दृश्यं ब्रह्मेति धीः नासौ तद्वेद भेदधीमत्वात् एवमेवेति नियमार्थं
मुक्त्वार्थमनुवदति अविज्ञातमिति श्रुतिः विषयतयाऽज्ञातं सदेव ब्रह्म सम्यक् ज्ञातं विशेषतानवतां॥
ज्ञातमेवं विषयतया यथावदजानतामिति बुद्धिमान्विषयतया न जानाति मूर्खस्तु विषयतया ज्ञा।
नातीति नितान्तमपार्थः दृष्टेश्चक्षुर्जन्यायाः कर्मभूताया द्रष्टारं स्वभावभूतनित्यदृष्ट्याव्याप्तारं दृष्प

८ वै॰
यानयोगाभ्यासानयरूपैः विज्ञानैर्बुद्धिधर्मस्यानित्यस्य विज्ञानानां साक्षित्वेनैववेद्यपाविज्ञातारमा
नविजानीयादितिमैत्रेयीप्रतियाज्ञवल्क्यवचनं ननुविषयत्वेकथंशास्त्रप्रमाणकत्वमितिचे
8
त्र नज्ञानविद्याभ्रांतिर्थसहरूपातिशायत्वेनतद्विषयत्वेसंभवादिति किंचनतावद्विधेयक्रि
ययोत्पाद्यत्वंमोक्षस्य मोक्षस्यस्वरूपत्वेनानादित्वात् नविकार्यं अविकार्योयमुच्यते इतिस्मृ
तेः नाप्याप्यः नित्याप्तत्वात् नापि संस्कार्यः निर्गुणत्वेनगुणाधानलक्षणसंस्काराभावा
त नापि दोषापनयः संस्कारः संभवति ब्रह्मणिक्रियायाः अभावेनस्वनिष्ठक्रिययादो
षापगमायोगात् अन्यनिष्ठक्रिययान्यत्रसंस्कारायोगात् नचदेहनिष्ठक्रिययात्मनिसंस्का
रोदृष्टइतिवाच्यं देहादिसंहतनिष्ठक्रिययातस्यैवसंस्कार्यत्वंमस्यफलभोक्तृत्वेचेत्यवगमात् ॥
तथाचश्रुति आत्मेंद्रियमनोयुक्तं भोक्तेत्याहुर्मनीषिणः इतिआत्मीयं शरीरमात्मेत्युच्य
ते तथाच शरीरादिसंयुक्तमात्मानंभोक्तेतिमनीषिणः आहुरित्यर्थः यद्वा आत्माभोक्ते
त्याहुरितिसंबंधः इंद्रियेत्यादिक्रियाविशेषणं आत्मनिदोषाभावाच्चनदोषनिवृत्तिः संस्का
रः संभवति निर्गुणत्वेनिर्दोषत्वेश्रुतिरेवमानं तथाहि एकोदेवः सर्वभूतेषु गूढः सर्व
व्यापीसर्वभूतांतरात्माकर्माध्यक्षः सर्वभूताधिवासः साक्षीचेताकेवलोनिर्गुणश्च सपर्य
गाच्छुक्रमकायमव्रणमस्नाविरंशुद्धमपापविद्धमितिः अनयोर्मंत्रयोरयमर्थः मूर्त्ति शि॰८

अथास्य ब्रह्मरुद्राद्यात्मनो भेदं प्रत्याह एक इति जाड्यं प्रत्याह देव इति ज्ञानघन इत्यर्थः आदित्यादिवैषम्यमा
ह सर्वेति तर्हि किमिति न प्रतीयते तत्राह गूढ इति अनादिमायया छन्न इत्यर्थः तत्तत्कृतावच्छिन्नत्वेन
परिच्छिन्नत्वं नेत्याह सर्वव्यापीति नभोवत्ताटस्थ्यं वारयति सर्वभूतान्तरात्मेति सर्वेषु भूतेषु स्थितस्य तत्त
त्क्रियाकर्तृत्वं नास्तीत्याह कर्माध्यक्ष इति सर्वकर्मसाक्षीत्यर्थः सर्वभूतेष्वित्यादिना भूतानां पृथगुक्तेः
सद्वितीयत्वमाशंक्याह सर्वेति सर्वेषां भूतानामधिवासोऽधिष्ठानं तच्च कल्पितमधिष्ठानादर्थान्तरमि
त्यर्थः न केवलं कर्मणामेवाध्यक्षः अपि तु तत्कर्तॄणामपीत्याह साक्षीति साक्षित्वे हेतुमाह चेतेति
चित्स्वभाव इत्यर्थः केवलो द्वयवर्जितः अद्वितीयः निर्गुणः सत्त्वादिगुणरहितः चकारो दोषाभाव
समुच्चयार्थः गुणदोषाभावे मन्त्रान्तरं स पर्यगादिति सः यस्तु सर्वाणि भूतानीति प्रकृतात्मा परितः
समंतात् अगात् सर्वतो गत इत्यर्थः शुक्रमित्यादिशब्दाः पुंलिंगत्वेन नेयाः स इत्युपक्रमात् शुक्रो
दीप्तिमान् अकायो लिंगशरीररहितः अव्रणः अक्षतः अस्नाविरः अनाशिरः आभ्यां स्थूलदेहा
भाव उक्तः शुद्धो रागादिगुणरहितः अपापविद्धो धर्माधर्मविधुर इति तस्मान्न संस्कार्यो मोक्षः तस्मा
त्कर्तव्यविधिशेषतया ब्रह्मोपदेशासंभवः यत्त्वसिद्धे प्रकृत्यादिलिंगाभावान्न शक्तिग्रह इति तत्राप्र
वृत्तिनिवृत्त्योरेव लिंगमिति न निर्बंधः पुत्रस्ते जात इत्यादौ हर्षादिलिंगेनापि शक्तिग्रहसंभवात् य
त्तु प्रवृत्त्यादिपरस्यैव शास्त्रत्वमिति तदपि न हितशासनाद्वेदानां शास्त्रत्वोपपत्तेः नापि फला

भावः ब्रह्मात्मसाक्षात्कारस्य मोक्षफलकत्वान्नादृशसाक्षात्कारार्थमननादिसार्थक्यं चेत्तिन कथंचिदपि
२ विधिप्रवेशः ब्रह्मावगतेः प्रवृत्त्यादिनिरपेक्षाया मोक्षहेतुत्वं श्रुतिरपि दर्शयति आत्मानं चेद्विजानीया
9 दयमस्मीति पुरुषः किमिच्छन्कस्य कामाय शरीरमनुसंज्वरेदिति अयं परमात्माहमस्मीत्यपरोक्ष
तया यदि कश्चित्पुरुषो विजानीयात आत्मसाक्षात्कारदौर्लभ्यं द्योतयति चेच्छब्दः सः स्वातिरिक्तमात्म
नः किंफलमिच्छन्कस्य वा पुत्रादेः कामाय फलाय तदलाभेन शरीरं तप्यमानं अनु तदुपाधिः सन्
संज्वरेन्न तप्येतेति ननु शरीरत्वाख्यमोक्षस्य स्वाभाविकत्वं सिद्धवत्कृत्य तद्धर्मजन्यत्वमित्युक्तं तद्युक्तं
शरीरदशायामशरीरत्वस्याभावेन धर्मजन्यत्वसंभवादिति चेन्न सशरीरत्वस्य मिथ्यात्वेनाशरीर
त्वस्य स्वाभाविकत्वात् तथा च ब्रह्मविद्विषया श्रुतिः तद्यथाहिनिर्ल्वयनी वल्मीके मृता प्रत्यस्ता शयीतैवमे
वेदं शरीरं शेतेऽथायमशरीरोऽमृतः प्राणो ब्रह्मैव तेज एवेति चसचक्षुरचक्षुरिव सकर्णोऽकर्ण इव सवा
गऽवागिव समना अमना इव सप्राणोऽप्राण इवेति च अनया श्रुत्या अत्रैव ब्रह्मास्मीति ज्ञानेन सद्यो मुक्ति
र्नैदृश्यते किंतु यथापूर्वं संसारित्वमेवेति शंकापि परिहृता भवति श्रुत्योरर्थस्तु अत्र ब्रह्म समश्नुते इति पू
र्ववाक्ये जीवन्मुक्तिरुक्ता स जीवन्मुक्तो देहवत्त्वेऽपि पूर्ववन्न संसरतीत्यत्र दृष्टान्तमाह तद्यथेति तत्र तत्र जीव
न्मुक्तिदेहे ईदृशे देहे दृष्टान्तो यथेति यथा लोके अहिनिर्ल्वयनी सर्पविमुक्तत्वक् वल्मीके प्रत्यस्ता प्रक्षिप्ता ६
मृता पूर्ववत्सर्पेणात्मत्वेन गृहीता वर्तते एवमेवेदं विदुषः शरीरं प्राणिवात्मत्वेनागृहीतं तिष्ठतीत्य

र्थः त्वचासाम्यं शरीरस्योक्त्वा सर्पसाम्यं विदुषो दर्शयति अथेति तथार्थे कोऽथशब्दः यथा प्रत्यस्तात्व
चमहिरहमिति नाभिमन्यते नथायं जीवन्मुक्तो देहेऽपि न तत्राहंधियमादधातीत्यशरीरः अशरी
रत्वादेवामृतः देहाभिमानवतो हि मृतिः निरुपाधिकः सम्राणितिजीवनीति प्राणः साक्षी सच ब्रह्मै
व तच्च तेजो विज्ञानज्योतिः अनया स्थूलदेहस्य मिथ्यात्वं दर्शयित्वा सचक्षुरचक्षुरिति मन्त्रालिंगशरी
रस्य मिथ्यात्वं दर्शयति वस्तुतोऽचक्षुरपि वाधितचक्षुराद्यनुवृत्त्या सचक्षुरिवेत्यादियोजना॥ तस्माद्वे
दांताः साक्षादेव ब्रह्मणि समन्वयात् ज्ञानविधिद्वारेति सिद्धं ब्रह्मसूत्रमेव शास्त्रप्रमाणकमिति एवं चतु
र्भिः सूत्रैः सर्वज्ञं सर्वशक्ति जगत्कारणं वेदांतप्रतिपाद्यं ब्रह्मेत्युक्तं वस्तुतः तच्चेतनमचेतनं वेति संशयः
तत्र सांख्याः कूटस्थब्रह्मणो ज्ञानक्रियाशक्त्यभावान्न जगत्कारणत्वं प्रधानस्य तु तत्संभवाज्जगत्कारणत्वं
सत्वगुणमादाय ज्ञानशक्तिमत्त्वं त्रिगुणत्वात् क्रियाशक्तिमत्त्वं ब्रह्मण एकत्वात् क्रियाशक्तिः तस्मात् सर्वज्ञं सर्व
शक्ति प्रधानमेव तदनुवादका वेदांता इति वदंति तन्मतनिरासार्थमिदं सूत्रं आरभ्यते ईक्षतेर्नाशब्दं॥
सांख्यपरिकल्पितं प्रधानं जगत्कारणं न भवति तत्र हेतुः अशब्दमिति हेतुगर्भं विशेषणमेतत्॥
अशब्दत्वात् अवेदप्रमाणकत्वादित्यर्थः वेदाप्रमाणकत्वे हेतुः ईक्षतेरिति धातुवाचके श्तिप् शब्दो ल
क्षणया धात्वर्थेक्षणपरः ईक्षितृत्वश्रवणादित्यर्थः अस्य चाद्येपसंगतिः फले च प्रधानैक्ये पद
पात्तिः पूर्वपक्षे सिद्धांते तु ब्रह्मैक्यप्रमितिरिति विवेकः एवं हि श्रूयते सदेव सोम्येदमग्र आसीदेक।

9A

मेवाद्वितीयमित्युपक्रम्य तदैक्षत बहु स्यां प्रजायेयेति तत्र प्रधानस्यैवोपक्रमे ईक्षितृत्वश्रवणं विरुध्ये
१० वे. तईक्षणस्याचेतनधर्मत्वात् न च ब्रह्मणो ज्ञानक्रियाशक्त्यभावः अविद्यामहिम्ना सर्वस्याप्युपपत्तेः॥
सत्व प्रधानपरमाणुप्रेरकईश्वरः सद्वितीयः ईक्षितेति पातंजलादिमतनिराकरणार्थं श्रुतावेकमितिप
10 दमुपादानस्य चेतनत्वार्थः तदैक्षततेति उपादानत्वार्थं बहु स्यामिति एवमैतरेयश्रुतिः आत्मा वा इदमे
क एवाग्र आसीन्नान्यत्किंच न मिषत् स ईक्षत लोकान्नु सृजा इति स इमाल्लोकानसृजतेतीक्षणपूर्विकामेव
सृष्टिमाचष्टे मिषच्चलत्स्वाक्रांतमिति यावत् एवं सर्वत्रेक्षणपूर्वकसृष्टिश्रवणात्तस्यैव जगत्का
रणमिति नचेक्षणमात्रेण ब्रह्म जगत्कारणमिति निश्चयः तत्तेज ऐक्षत ता आप ऐक्षंतेत्यचेतनयोर।
प्यप्तेजसोरीक्षणश्रवणात् तत्समभिव्याहारात्प्रधानेपीक्षणं गौणमिति प्राप्ते उच्यते गौणश्चेन्नात्म
शब्दात् अप्तेजसोरिव प्रधानेईक्षतिर्गौण इति चेन्न कुतः आत्मशब्दात् आत्मशब्दश्रवणादित्य
र्थः सदेव सोम्येदमग्र आसीदित्युपक्रम्य तदैक्षत तत्तेजोसृजतेति तेजोबन्नानां सृष्टिमुक्त्वा तदेव प्रकृ
तं सदीक्षितृ तानि च तेजोऽबन्नानि देवताशब्देन परामृश्याह सेयं देवतैक्षत हंताहमिमास्तिस्रो देव।
ता अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणीति श्रुतिः तत्र यद्यचेतनं प्रधानमेवेक्षितृत।
दा सेयं देवतेति तस्यैव परामर्शात्तदात्मत्वेन जीवकीर्तनमनुपपन्नं स्यात् आत्मा हि स्वरूपं न च चेतनो
जीवः अचेतनस्यात्मा ब्रह्मणि तु जीवविषय आत्मशब्द उपपद्यते स य एषोऽणिमैतदात्म्यमिदं सर्वं। १० शि.

तत्सत्यंसआत्मातत्वमसिश्वेतकेतोइतिश्वेतकेतोर्जीवस्यात्मतादात्म्योपदेशात नहिचेतनस्यचेतनभेदेशंका
10A म्पृकः नचात्रेजसोगौणीत्वलक्षणाश्रवणात् तत्र्यपठितत्वेन तदेवेत्यनेनात्मादेगौणलक्षणमेवेति वाच्यं संश
स्थलएवप्रायपाठस्यनिश्चायकत्वात्प्रकृतेनगौणमुख्ययोः गौणस्यजघन्यत्वेनसंशयाभावात् अत्रए
वभगवाञ्जैमिनिः पायेप्रायदर्शनादिति संशयस्थलेप्रायदर्शनस्यनिश्चायकत्वमाह अत्रैतत्सोम्यनैव
मुच्यतेकिंविकारेणमसीतिगौणमीक्षणंकूलंपिपतिषतीतिवत् मुख्यार्थत्वस्य आकाशवायुंचस्त्रष्टात
त्सदेवेत्युपक्रान्तंसच्छब्दः वाच्यंब्रह्मतेजः सृष्ट्वादिति प्रकृतसदात्मापरामृश्यते सेयमिति सन्निहितेत्व
त्वपरामर्शो देवेति अलौकिकतेकमुक्तमीक्षणमभिनयति हन्तेति सृष्टिवाक्येनोक्तानितेजोबन्नानिपरा
मृशति इमाइति सृष्टसभूतास्तिस्रोदेवतामयास्रष्टाइत्यर्थः सृष्टत्वेनपरोक्षत्वादिवनाशब्दप्रयोगः ना
मरूपव्याकरणंगत्वेकयमितिअनन्तरमाह अनेनेति अनेनपूर्वसृष्टानभूतेनप्राणधारितेनजीवेनात्म
नानरूपेणानुप्रविश्यदेवतासर्गानंतरंनामरूपंचेतिविस्पष्टं आसमंतात्करवाणीतिपराधिदेवतेद्वित्व
तीयर्थः यः सदाख्यः सएषोणिमा अणिमेत्यर्थः दुर्विज्ञेयइतियावत तरोतदात्म्यं एतदात्मकंभाव
भक्तिभेदभेदमत्र परस्परंसर्वात्मकंसदेवसत्यंपारमार्थिकंतत्त्वेसएवसर्वस्यात्मानिरूपचरितस्व
रूपं हेश्वेतकेतोत्वंचसंसारिनासि किंतत्देवब्रह्मनरयोजना नन्वात्मशब्दोपिप्रधानेगौणोलक्षणा
नार्थतयामुख्योवेत्यतआह तेनिरस्यमोक्षोपदेशात् नप्रधानमात्मशब्दवाच्यं तत्सत्यंसआत्मेति

॥वे॰ प्राकृतं सत्तृणमानेनास्माद्यतत्त्वमसीश्वेतकेतो श्वेतनस्य मोहयितव्यं नत्रिष्टतामुद्दिश्य आचार्यवान्पु
रुषो वेद तस्य तावदेव चिरं यावन्न विमोक्ष्ये अथ संपत्स्य इति मोक्षोपदेशात् यदि त्वचेतनं प्रधानं सच्छ
॥ ब्दवाच्यं मुमुक्षोः श्वेतकेतोश्चेतनं तत्त्वमसीति शास्त्रं ग्राहयेत् ततः श्वेतकेतुश्चेतनोऽचेतनोऽसीति तदा शास्त्रं प्र
माणयन्न चेतनोऽस्मीति ध्यायमानो मोक्षाय यावन्नेन अनर्थं चेयात् तथा च शास्त्रमप्रमाणं प्रलापो भवेत्॥
तच्चानिष्टं तस्माच्छास्त्रप्रामाण्याच्चेतनपर एवैकात्म्यपरो न प्रतिबंधकनिवृत्तिमाह अत इति एवार्थवानिति॥
उक्तप्रमितस्य सर्वबंधनिवृत्त्या देहादिपतनेपि निवृत्तिप्राप्तावारब्धकर्मणा तद्दृष्टस्यानुवृत्तिमाह तस्ये
ति कथं तर्हि प्रारब्धकर्मनिवृत्तिरित्याशंकाभोगादित्याह यावदिति प्रारब्धस्तावत्किंकथं देहादि
ध्वंस इत्याशंका प्रतिबंधादित्याह अथेति उत्तमपुरुषस्त्वभयत्र प्रथमपुरुषे छांदसत्वादिति॥
ननु स्थूलारुंधतीन्यायेन प्रधानोपदेशद्वारात्मोपदेशोयमस्तु तत्राह हेयत्ववचनाच्च यद्य
नात्मैव प्रधानं सच्छब्दवाच्यमस्मात्तत्त्वमसीति इहोपदिष्टस्य च सतदुपदेशश्रवणादनात्मत्तया
तन्निष्ठोमाभूदिति मुख्यमात्मानमुपदिदिक्षुः शास्त्रं तस्य हेयत्वं ब्रूयात् यथारुंधतीं दिदर्शयिषुः त
त्समीपस्थतारां याहेयत्वं ब्रूते तद्वदित्यर्थः एकविज्ञानात्सर्वविज्ञानोपक्रमविरोधसमुच्चयार्थश्च
राह्दः नत्याह्दि उत्तमादेशमप्राक्ष्यो येनाश्रुतं श्रुतं भवत्यमतं मतमविज्ञातं विज्ञातमिति कथं नु भ
गवः स आदेशो भवतीति यथा सौम्यैकेन मृत्पिंडेन सर्वं मृन्मयं विज्ञातं स्याद्वाचारंभणं विकारो ११शि॰

11A

नामधेयं मृत्तिकेत्येव सत्यं एवं सोम्य स आदेशो भवतीति वाक्ये एकविज्ञानात्सर्वविज्ञानोपक्रमः प्रकृय
तेन स्वविरुद्धेन प्रधानज्ञानात्तद्विकारज्ञानेपि भोक्तृवर्गज्ञानासंभवादिति प्रकृत्यर्थं तु श्वेतकेतो येन श्रु-
तेन शास्त्रतोन्यदश्रुतमपि श्रुतं भवति येन मतेन तर्कतोन्यदमतमपि मतं येन विज्ञातेनान्यदविज्ञात-
मपि विज्ञातं भवति तमादेशं शास्त्रादिरूपं तद् आदेशः शास्त्राचार्योपदेशगम्यं वस्तु प्राक्षः पृष्टवानसि त्वमाचा-
र्यमिति पितृवाक्यार्थः अन्यज्ञानादन्यं तज्ज्ञेयमिति पुत्रोक्ते कथं नु भगवः स इति कार्यस्य कारणा।
न्यत्वमित्याह यथेति ज्ञाते मृत्पिण्डे कथं तद्विकारधीरित्यत आह वाचेति यो विकारः स वागालम्बनमु-
च्यते परं तु वस्तुतो नास्तीत्यर्थः तत्र हेतुः नामधेयमिति नाममात्रमेव नार्थोस्तीत्यर्थः तर्हि मृत्तद्घटयो-
रभेदे घटनाशे मृदो विनाशः स्यादत आह मृत्तिकेति घटो मृद्भिन्नत्वेन निर्वक्तुं न शक्यते इति सततोऽ-
भिन्न एव मृत्तु घटाद्भिद्यत इति न दोष इति सदेव सोम्येति सच्छब्दवाच्यं प्रधानं इत्येतदपि न भवतीत्याह॥
स्वाप्ययात् तदेव सच्छब्दवाच्यं कारणं श्रुत्यन्तरे श्रूयते यत्रैतत्पुरुषः स्वपिति नाम सता सोम्य तदा संप-
न्नो भवति स्वमपीतो भवती तस्मादेनं स्वपितीत्याचक्षते स्वं ह्यपीतो भवतीत्येषा श्रुतिः पुरुषस्य लोक-
प्रसिद्धं स्वपितिनाम निर्वक्ति स्वशब्देन सच्छब्दवाच्यात्मा परामृश्यते स्वं प्रति अपीतो भवति लीनो भव-
ति अपिपूर्वस्य इतेर्लयार्थत्वात्सुषुप्तावस्थायामुपाधिकृतविशेषाभावात्स्वात्मनि प्रलीन इवेति सं-
स्वपीतो भवतीत्युच्यते तथा च सूत्रार्थः स्वस्मिन्प्रकृते सच्छब्दवाच्यात्मनि अप्ययात् लयश्रवणादि

वे॰ १२ 12

ति तत्र यदि प्रधानमेव सत्शब्देनोच्यते तदाचेतनोऽचेतनमप्येतीति विरुद्धं स्यात् श्रुत्यंतरं च तद्यथा प्रि
यया स्त्रिया संपरिष्वक्तो न बाह्यं किंचन वेद नांतरमेवमेवायं पुरुषः प्राज्ञेनात्मना संपरिष्वक्तो न बाह्यं किंच
न वेद नांतरमिति सुषुप्त्यवस्थायां चेतनेऽप्ययं दर्शयति अतो यस्मिन्नप्ययः सर्वेषां चेतनानां तच्चेतनं स
च्छब्दवाच्यं जगत्कारणं किंच गतिसामान्यात् गतेः सर्वेषु वेदांतेषु चेतनकारणावगतेः समत्वा
दित्यर्थः नहि क्वचिदपि विरुद्धमुपलभ्यते कुत्रचिद्वाक्ये चेतनेकारणं कुत्रचिदचेतनमिति किंतु
सर्वत्र चेतनमेव कारणमुपलभ्यते यथाग्नेर्ज्वलतः सर्वा दिशो विस्फुलिंगा विप्रतिष्ठेरन् एवमेवैतस्मा
दात्मनः सर्वे प्राणा यथायतनं विप्रतिष्ठंते प्राणेभ्यो देवा देवेभ्यो लोका इति तस्माद्वा एतस्मादात्मनः
आकाशः संभूत इति आत्मन एवेदं सर्वमिति आत्मन एष प्राणो जायत इत्याद्याः श्रुतयः आत्म
न एव कारणत्वं दर्शयंति आत्मशब्दश्चेतनपरः इत्युक्तं किंच श्रुतत्वाच्च स्वशब्देनैव सर्वज्ञ ईश्वरो।
जगतः कारणमिति श्रूयते श्वेताश्वतराणां मंत्रोपनिषदि ज्ञः कालकालो गुणी सर्वविद्य इति
सर्वज्ञं ईश्वरं प्रकृत्य स कारणं करणाधिपाधिपो न चास्य कश्चिज्जनिता न चाधिप इति यथाग्ने रित्या
देरयमर्थः विस्फुलिंगप्रसंगार्थं ज्वलतः इति विप्रतिष्ठेरन् नानागतित्वेन दिशो विप्रसृता स्युः
प्राणाश्चक्षुरादयः यथायतनं यथागोलकं प्रतिष्ठंते विधियमक्रमं गच्छंतीति यावत् प्राणेभ्योऽनंत
रमादित्यादयो देवास्तदनुग्राहकास्तेभ्योऽनंतरं लोकाः अंतरिति लोका विषया भवंतीत्यर्थः प्राणेभ्य इति। १२

12A

ण्यगर्भः ततः सर्वज्ञः सकारणमिति कारणत्वोक्तेः सर्वज्ञताविशेषितः सर्ववित्सर्वज्ञः कारणं त
स्य सर्वेश्वरत्वमाह करणेति करणानीन्द्रियाणि तेषामधिपास्स्वामिनो जीवास्तेषामधिपः परमे
श्वरः तस्य सर्वहेतुत्वमाह नचेति सर्वजीवान्प्रतीश्वरत्वे हिरण्यगर्भस्याप्यस्तीति ततो विशेष
माह नचाधिप इति तस्य नियन्ता स्वपरं न स्वस्य नियन्ता नास्तीत्यर्थः तस्मात्सर्वज्ञो जगतः कारणं ना
चेतनं प्रधानमन्यद्वेति सिद्धं अस्मिन्नधिकरणे गुणसूत्राणि षट् ननैवमथात इत्यारभ्य एतता
श्चेतनेनदैतैः सूत्रैः सर्वेषां वेदान्तानां सर्वज्ञसर्वशक्तिब्रह्मपरत्वे समर्थिते किमपरमवशिष्टं यद
र्थमुत्तरसूत्रसंदर्भः इति उच्यते निर्विशेषब्रह्मणः स्वरूपेणोपदेशायोगात् किंचिदुपाध्युपहि
तत्वेनोपदेशः इति वक्तव्यं तत्र कस्मिन्वाक्ये उपाधिर्विवक्षितः कस्मिन्वाक्ये न विवक्षित इत्याकां
क्षायां तद्विवेचनार्थमुत्तरसूत्रसंदर्भोर्थवान् इति तथैव सविशेषं निर्विशेषं च ब्रह्म सम्प्रयते यत्र
हि द्वैतमिव भवति तदितर इतरं पश्यति अथ यत्रान्यत्पश्यत्यन्यच्छृणोत्यन्यद्विजानाति तद।
ल्पं यो वै भूमा तदमृतं अथ यदल्पं तन्मर्त्यं सर्वाणि रूपाणि विचित्य धीरः नामानि कृत्वाभि
वदन्यदास्ते इत्यादि सविशेषवाक्यानि यत्र त्वस्य सर्वमात्मैवाभूत्तत्केन कं पश्येत् यत्र नान्यत्प
श्यति नान्यच्छृणोति नान्यद्विजानाति स भूमा निष्क्रियं निष्कलं शान्तं निरवद्यं निरंजनं अमृ
तस्य परं सेतुं दग्धेंधनमिवानलं स एष नेति नेत्यात्मा अस्थूलमनण्वह्रस्वमित्यादि निर्विशेषवाक्या

नित्रस्यगुणोद्दिष्टरूपमेतोदर्शयंति तत्रकानिचित्क्रममुक्त्यर्थन्युपासानानिकानिचिदभ्युदयाद्यर्थानी
श्वे ति वोध्यं अन्यथैतस्यपत्रयस्यांवस्थितिविद्यावस्थायांतुक्रमपिद्वैतदिवभानितत्रेतरः संसारीमन
13 इतरंपश्यतिदृष्ट्यादिगोचरमुपाधिमद्दृश्यवदितीत्यर्थः यस्मिंस्त्वात्मनिदूरत्वाद्विचक्षुरादिनानुसंध
त्तेतदल्पंपरिच्छिन्नं उपहितमितिपावत् भूमत्वस्यचविशेषान्तरमाह योवा इतिअयंयोनिद्योतितोवि
शेषोऽनेनप्रकटितः सर्वज्ञईश्वरोनामरूपादिकंविश्वंनिमायतत्रप्रविश्यजीवरूपेणाभिवदनादि
कुर्वन्योवतिष्ठतेअन्तर्यामीतद्विद्वानिहैवामृतोभवतीत्यर्थः यत्रयस्यांविद्यावस्थायां अस्यविदुषः
सर्वकर्त्रादिग्राह्यातिरेकेणासंद्देवासीत्तत्रकेनकरणेनकंविषयंकोवाकर्त्तापश्येदित्यात्माद्वैतद्रव्य
वहार्यमनौपाधिकंतत्त्वमित्यर्थः यत्रभूम्निस्थितोविद्वानन्यतद्द्रष्टव्यंचक्षुषानपश्यति अन्यत् श्रो
तव्यंश्रोत्रेणनशृणोति नचान्यन्मंतव्यंज्ञातव्यंवामनसाबुद्ध्यावामनुतेजानातिसभूमाइत्यस्यगो
चरोनिरतिशयमहत्त्वसंपन्नपरमात्मेत्यर्थः निष्कलंनिरंशं अतएवनिष्क्रियंनिष्क्रियत्वादेवशां
तंपरिणामरहितं अतएवनिरवद्यंरागादिरहितंधर्मादिरहितंनिरंजनमित्यर्थः यद्वा निष्क
लत्वान्निरंजनंजडसंबंधशून्यमित्यर्थः यथामृद्दारुमयः सेतुर्नदीकुल्यादिपरकूलप्राप्त्युपायः
तथायंसंसारसागरस्यपरंब्रह्मतत्प्राप्तावमृतस्यवाकैवल्यस्यबुद्ध्याभिव्यक्तंसत्साधनंसेतुवदवस्थितंवाक्यो
न्यज्ञानस्यकथंनाशस्तत्राह दग्धेंधनमिवेति यथादग्धेंधनोऽग्निः शाम्यतितथाज्ञानमयीत्यर्थः इती १३

इतीदमर्थ्यंदेंनइदंनेतिनिषेधावधीम्नतस्मान्नेतमर्थः नच सविशेषनिर्विशेषपरंवाक्यांतरमपिमन्त्रनमन्य
13A तस्यानसंपूर्णमन्यदिति अयमर्थः निष्प्रपंचादन्यदुपास्यंगुणानोस्यानंतत्वंनपरिच्छिन्नंततोन्यन्निष्प्र
पंचमुक्तोऽवस्थात्रयापरिच्छेद्यमनंतंसच्चिदानंदात्मकमिति एवंच यत्र सगुणवाक्ये गुणविवक्षा तत्रोपा
सनाभवति यत्रतु श्रूयमाणोपिगुणोनविवक्षितः तद्वाक्यंतु निर्गुणब्रह्मपरमेवेतिनिर्णयार्थमुत्तरसू
त्रसंदर्भ इतिफलितं आनंदमयोभ्यासात् पूर्वंतावत्सर्वेषांवेदांतानांनिर्गुणब्रह्मपरत्वमुक्तं गतः सि
द्धंतत्सगुणवाक्यदर्शनेनापोद्य सगुणवाक्यविचारः प्रारब्धः नमयोद्येदमधिकरणंनिर्गुणविचारात्म
कमारभ्यते यद्यप्यपवादापवादकत्वात्सगुणविचारानंतर्ययुक्तं तथापिपूर्वाधिकरणेसंशया
भावात्मायपाठेनतिष्ठायकइत्युक्तेरन्योतरआत्मानंदमयइत्यत्रसपटोविकारेप्राचुर्येचमयट्ख्यातात्संश
येविकारप्रायपाठोनिष्ठायकोस्त्विति पूर्वाधिकरणसिद्धांतयुक्ताभावेनप्रवृत्तत्वात्प्रत्युदाहरणलक्षण
संगतिरस्तीतिसगुणविचारात्प्रागिदमारभ्यते पूर्वपक्षेजीवस्यानंदमयत्वेनोपास्तिः फलं सिद्धांतेनि
र्गुणब्रह्मप्रमितिरितिसिद्धांतगत्या एकदेशिमतेतूभयत्रोपास्तिरितिविवेकः तैत्तिरीयकेऽन्नमयप्रा
णमयमनोमयविज्ञानमयकोशचतुष्टयानंतरं तस्माद्वाएतस्माद्विज्ञानमयादन्योंतरआत्मानंदम
यइतिश्रूयते तत्रसंशयः किमानंदमयशब्देनसंसंज्ञानमितिप्रकृतंपरंब्रह्मोच्यते उत अन्नमयादि
विकारवत्ब्रह्मणोऽर्थांतरंजीवइतितत्रान्नमयादिविकारप्रायपाठात्तस्यप्रियमेवशिरः मोदोदक्षिणः

वे॰ पदत इत्यादिना प्रियाद्यवयवयोगात्तस्यैव शावशारीर आत्मेति शारीरत्वश्रवणाच्च जीव इति प्राप्ते तस्य पुर
१४ टी॰ वोक्तस्य विज्ञानमयस्यैष आनंदमय एव शारीर आत्मेति श्रुत्यर्थः एवं प्राप्ते उच्यते आनंदमयोऽभ्या
14 सात् आनंदमयः परमात्मा भवितुमर्हति कुतः अभ्यासात् आनंदमयशब्दस्य ब्रह्मण्येव बहुकृत्वो
भ्यासादित्यर्थः तथा हि आनंदमयं प्रासुरल्पमो वै स इति तस्यैव रसत्वमुक्त्वोच्यते रसं ह्येवायं लब्ध्वानंदी भ
वति को ह्येवान्यात्कः प्राण्यात् यदेष आकाश आनंदो न स्यात् एष ह्येवानंदयाति सैषानंदस्य मीमां
सा भवति एतमानंदमयमात्मानमुपसंक्रामति आनंदं ब्रह्मणो विद्वान्न बिभेति कुतश्चनेति आनंदो ब्रह्मे
ति व्यजानादिति बहुधाभ्यासः श्रूयते न चानंदपदस्यैवाभ्यासो नानंदमयपदस्येति वाच्यं वसंते वसंते ज्यो
तिषा यजेतेत्यत्र ज्योतिः पदस्य ज्योतिष्टोमपरत्ववत् आनंदपदस्य आनंदमयपरत्वात् श्रुत्यर्थस्तु रसः सा
रः आनंद इत्यर्थः अयं जीवः पूर्णानंदः सर्वसाक्षी सर्वप्रेरको न स्याच्चेत्तर्हि प्राणादेरचेतनस्य चेष्टानसु
कौ स्यात् को ह्येवान्यात् जीवेत् प्राण्यात् निश्वसेत् यत्र यदि आनंद इत्यनेन तरं प्रेरक इति शेषः आनं
दयितृत्वादपि परमानंदत्वमित्याह एष हीति आनंदयती [illegible] धनीति
परं यतिनं करोति लोकं तद्धतत्स्वयमानंदः परमानंदयतीति यत्त्वप्रायपाठादानंदमयस्य विकारित्वमिति॥
।तत्र। स्थूलारुंधतीन्यायेनान्नमयादिविकाराणामात्मदर्शनस्यात्मत्वनार्थत्वेनानंदमयस्य सर्वांतरत्वा
त्स एवात्मेत्यवधारणात् अनंतरमन्यस्यात्मनोनुपदेशात्सर्वांतरत्वमवगम्यते विज्ञानकोशवशादौपाधिक १४

14A

प्रियाद्यवयवयोगेन विरुध्यते ब्रह्मणोन्नमयादिकोशापरं परया शारीरत्वमप्युपपन्नमेव॥ शारीरजीवं प्रतिबिंब
त्वादीश्वरस्य तस्मादानंदमयपरमात्मा विकारशब्दान्नेति चेन्न प्राचुर्यात् ननु नानंदमयं ब्रह्म कुतः विकारा
र्थकमयट्प्रत्ययात् ब्रह्मणश्चानंदविकारत्वानुपपत्तिरितिचेन्न कुतः प्राचुर्यात् मयटः प्रकृते आनंद
प्राचुर्यवाचकत्वादित्यर्थः मयटः प्राचुर्यार्थकत्वे हेत्वंतरमाह तद्धेतुव्यपदेशाच्च तमानंदं प्रतिब्रह्मणो हेतु
त्वव्यपदेशादित्यर्थः एष ह्येवानंदयातीति ब्रह्मणः आनंदहेतुत्वं व्यपदिश्यते योन्यानानंदयति स प्रचु
रानंद इति प्रसिद्धं इतश्चानंदमयः परमात्मेत्याह मांत्रवर्णिकमेव च गीयते यत्तु ब्रह्मविदाप्नोति परमित्यु
पक्रम्य सत्यं ज्ञानमनंतं ब्रह्म योवेद निहितं गुहायां परमे व्योमन्नित्यस्मिन्मंत्रे सर्वांतरं ज्ञेयत्वेनोक्तं तन्मांत्रवर्णिकं ब्र
ह्म अन्योंतर आत्मानंदमय इति गीयते मंत्रब्राह्मणयोरैकार्थ्यात् यद्यप्यत्र व्याख्यानव्याख्येयभावाभावे
न न मंत्रब्राह्मणभावः तथापि ब्राह्मणव्याख्यानरूपत्वेन व्याख्येयमंत्रं प्रत्युपायत्वात्प्रकृतेप्युपेयोपाय।
भावोस्तीति मांत्रवर्णिकमित्युक्तं इतश्चानंदमयं परमात्मानं जीवं ह्यस्माह नेतरोनुपपत्तेः ईश्वरादितरो
जीवोनानंदमयः कुतः अनुपपत्तेः सोकामयतेति सृष्टेः पूर्वं सीदात्मणे बहुस्यांप्रजायेयेति स्रष्टात्मकत्वे
स तपोतप्यत स तपस्तप्त्वा इदं सर्वमसृजतेति सृष्टेस्तत्वे च सूपपते तत्सर्वस्यानुपपत्तेरिति सूत्रार्थः जीवत्वा
नस्य शरीरसाध्यत्वादीक्षणानुपपत्तिर्बोध्या अतोनयः शब्दः ईक्षणपरः किंच भेदव्यपदेशाच्च नानंदमा
योजीवः कुतः जीवादानंदमययोर्भेदेन व्यपदिश्यमानत्वादित्यर्थः तथाच श्रूयते रसोवैसः रसं ह्येवायं ल।

ध्यानंदीभवतीत्यानंदमयस्य लब्धृत्वेन जीवस्य लब्धत्वेन भेदस्य व्यपदेशः नह्यलब्धैव लब्धा भवति॥
वे॰ १५ वृ॰ नन्वानंदमयशब्देन प्रधानमुच्यतां तत्राह कामाच्चनानुमानापेक्षा अनुमीयते इत्यनुमानं अनुमा
नैकगम्यं प्रधानमित्यर्थः आनंदमयत्वेन कारणत्वेन वा प्रधानस्य नापेक्षा न स्वीकारः कुतः कामात्॥
15 आनंदमयाधिकारे सोऽकामयतेति कामयितृत्वश्रवणादित्यर्थः नह्यचेतने प्रधाने कामः संभवति ईक्षते
र्नाशब्दमित्यत्र निराकृतमपि प्रधानं गतिसामान्यप्रपंचनाय पुनर्निराकृतमिति बोद्धव्यं॥ अस्मिन्नस्य
च तद्योगं शास्ति इतश्च न जीवे प्रधाने वानंदमयशब्दः यस्मादस्मिन्नानंदमये प्रकृतेऽत्मनि प्रबुद्ध
स्य जीवस्य तद्योगं तदात्मना योगं तद्योगस्तद्भावापत्तिर्मुक्तिरित्यर्थः तं शास्ति शास्त्रं तस्मादित्यर्थः य
दा ह्येवैष एतस्मिन्नदृश्येऽनात्म्येऽनिरुक्तेऽनिलयनेऽभयं प्रतिष्ठां विंदते अथ सोऽभयं गतो भवति यदा ह्येवै
ष एतस्मिन्नुदरमंतरं कुरुते अथ तस्य भयं भवतीति शास्त्रं अस्यार्थः यस्यामेकत्वज्ञानावस्थायामे
ष विद्वानेतस्मिन्ब्रह्मणि पंचीकृतभूतपंचकेन तत्कार्येण समष्टिस्थूलदेहेन विराजादृश्यरूपात्मकेन तत्ता
दात्म्यशून्ये दृश्यभिन्ने स्वसंवेद्यतया असंहतेंद्रियजातेनापंचीकृतभूतकार्येणात्म्येन तादात्म्यहीनेनात्म्ये
निरूप्यात्मशंतरहितिनिरुक्ते नाभिभूतसूक्ष्माणि मेत्याभेदवर्जितेऽनिरुक्ते निःशेषलयस्थानं निलयनं स
कलकार्यसंस्काराधाराविद्या तदभेदशून्ये प्रकर्षेण स्थितिं पुनरावृत्तिरहितां लभते अभयं यथा स्यादित्यु
क्तं भवति अथेति ज्ञानफलमुक्त्वाज्ञानाभावे दोषमाह श्रुतिः यदा हीति यद्यस्मिन्नानंदमये ब्रह्मणि स्व १५ शि॰

15A

मध्यंतरं त्वनादात्मस्वरूपं पश्यति तदा संसारभयान्न निवर्त्तत इत्यर्थः इदं शास्त्रं प्रधानपरिग्रहे जीवपरि
ग्रहे वा न घटत इति ॥ तस्मादानंदमयः परमात्मेति सिद्धं इदं त्वेकदेशिमतं भगवत्पादास्तु अभ्यस्यमा
नानंदपदस्यानंदमये लक्षणा अन्नमैतरस्मात्मानंदमय इत्यत्रानंदमयपदस्य प्राचुर्यार्थकत्वे ब्रह्मणि दुःख
लवप्रसंगः स्यादिति प्रचुरानंदे लक्षणा ब्रह्मपुच्छं प्रतिष्ठेत्यत्र ब्रह्मपदस्यावयवविशेषलक्षणेति मृव्यात्रि
तयं लक्षणे चान्नविकारप्रायपाठपरित्यागश्चैकदेशिमते स्यात् स्वपक्षे तु ब्रह्मपुच्छमित्यत्र पुच्छपदस्यावयवप्रा
यपाठपरित्यागमात्रमिति ब्रह्मपुच्छं प्रतिष्ठेत्यत्र किमानंदमयावयवत्वेन ब्रह्मोच्यत उत स्वप्रधानत्वेनेति ब्र
ह्मपुच्छशब्दाभ्यां संशयः ईक्षत्यधिकरणे संशयाभावात्प्रायपाठस्य न निश्चायकत्वमिति पुच्छपदस्यावय
वाधारत्वयोर्लक्षणासाम्यान्न संशये अवयवप्रायपाठस्य निश्चायकत्वमिति प्रत्युदाहरणसंगतिः प्रयो
जनं च पूर्ववदुक्तं तत्र पुच्छशब्दादवयवत्वप्राप्तावुच्यते आनंदमयोऽभ्यासात् आनंदमयशब्देनानंदमयं।
वाक्यस्य ब्रह्मपुच्छं प्रतिष्ठेत्यत्र विद्यमानेन ब्रह्मपदमुपलक्षते न तु ब्रह्मपदं प्रधानं परं कुतः अभ्यासात् ब्रह्मस
न्नेव स भवति असद्ब्रह्मेति वेद चेत् अस्ति ब्रह्मेति चेद्वेदेत्यादौ ब्रह्मपदस्याभ्यासादिति यत्तु ब्रह्मपुच्छश
ब्दान्वितमसामानाधिकरणं ब्रह्मपदस्य प्रधानं ब्रह्मपरमिति चेन्न कुतः प्राचुर्यादवयवे शब्दोपपत्तेः प्रा
चुर्यं चात्रावयवप्रायप्रयोगः एवं चान्नमयादीनां पुच्छानामवयवत्वात्तत्रानंदमयस्यापीतरावयवोक्तौ
पुच्छस्य बुद्धौ सन्निधानात्पुच्छमपि ब्रह्मेति युक्तेश्च स्युः नहि ब्रह्मणो मुख्यं पुच्छत्वमानंदमयस्य परमा

ण्मत्वपक्षेपि पुच्छं स्वं प्रतिष्ठस्य पुच्छत्वोपपत्तेः तस्माद्ब्रह्म पुच्छवत्तुच्छं सर्वाधिष्ठानं प्रतिष्ठा परायणं लो
१६ वे. किकस्यानंदजातस्याधार इत्यर्थः सर्वाधारत्वात्प्रतिष्ठापदसमभिव्याहारादाधारलक्षणया पुच्छमिति इ
हं. तस्य पुच्छशब्देनाधारो लक्ष्यत इत्याह तद्धेतुव्यपदेशाच्च तस्य ब्रह्मणो विकारजातं प्रति हेतुत्वेन इदं स
16 र्वमसृजतेति वाक्ये व्यपदेशादित्यर्थः नहि स्वविकारमानंदमयं प्रति ब्रह्मणोऽवयवत्वं संभवति मुख्य
त इति स्वप्रधानब्रह्मपुच्छं ज्ञेयत्वेन विवक्षितमिति मात्रवर्णिकमेव च गीयते यत्सत्यं ज्ञानमित्यादि मंत्रव
र्णप्रकाशितं ब्रह्म तत्तु ब्रह्मपुच्छं प्रतिष्ठेति ब्राह्मणवाक्ये स्वप्रधान्येन गीयते मंत्रब्राह्मणयोरैकार्थ्यादित्य
र्थः इतश्चानंदमयोत्र न प्रतिपाद्यः तस्य वैषयिकप्रियाद्यवयवयोगेन मुख्यत्वाद्यनुपपत्तेरित्याह ॥
नेतरोनुपपत्तेः ब्रह्मपुच्छं प्रतिष्ठेत्यत्र ब्रह्म स्वप्रधानं नेतरः कुतः अनुपपत्तेः ब्रह्मणोवयवत्वेऽवय
व्यानंदमयोत्र प्रतिपाद्य इति वक्तव्यं नहि तत्संतभवति सावयवस्याग्निमेषाकोत्कृष्टत्वाद्यनुपप
त्तेरित्यर्थः अतो ब्रह्म स्वप्रधानं इतश्चात्र पुच्छवाक्ये ब्रह्म स्वप्रधानमित्याह भेदव्यपदेशाच्च रसं ह्ये
वायं लब्ध्वानंदी भवति अयमानंदमयः यो जीवो रसक्षिप्राह्वि ब्रह्मानंदं प्रतिबिंबितं लब्ध्वानंदी भवतीति
लब्धृरूपेण भेदव्यपदेशादित्यर्थः इतश्च ब्रह्मपुच्छक आनंदमयोत्र न प्रसिद्ध्य इत्याह कामाच्च ॥
नानुमानापेक्षा काम्यत इति कामः आनंदः तस्य ब्रह्मत्वदृष्टेनानुमानेनानंदमयस्यापि ब्रह्मत्वम।
पेक्षितव्यं विकारार्थकमयड्विरोधादित्यर्थः अनुमानप्रकारस्त्वानंदमयो शास्त्रो ब्रह्मपरः आने १६शि.

16A

दर्शनात्तस्मानंदो ब्रह्मेत्यत्रानंदशब्दवाच्येति इतोऽपि ब्रह्मपुच्छवाक्ये ब्रह्मप्रधानमित्याह अस्मिन्न
स्य च तद्योगं शास्ति अस्मिन् पुच्छवाक्ये ब्रह्मणि प्रबुद्धस्यानंदमयस्य जीवस्य यदा ह्येवैष एतस्मिन्नि
त्यादि शास्त्रं तद्योगं मुक्तिं शास्तीत्यर्थः तस्मादानंदमयस्याप्रतिपाद्यत्वात् पुच्छब्रह्मैव स्वप्रधानं नि
विशेषं स्तेयमिति निस्तिहेत्वंतरं तद्धर्मोपदेशात् पूर्वत्र ब्रह्मपदमानंदमयपदमानंदपदाभ्यासश्रुति मुख्य
त्रितयाद्भिः कवद्भूप्रमाणवशान्निर्गुणं ब्रह्म निर्णीयो यथा तद्भ्रमरूपवक्त्रादिवद्भूरप्रमाणान्न संसारी हि
रण्मयः पुरुषोऽस्तीति पूर्वसिद्धांतयुक्ता पूर्वपक्षोत्थानात् दृष्टांतरूपावांतरसंगत्या पूर्वसिद्धनि
र्गुणब्रह्मसमन्वयायवादात्मवाक्यमिदमारभ्यते फलं च पूर्वोत्तरपक्षयोरुपास्तिरेव यादसमाक्षिप
याते कौ दोषे श्रूयते अथ य एषोंतरादित्ये हिरण्मयः पुरुषो दृश्यते हिरण्यश्मश्रुर्हिरण्यके
श आप्रणखात्सर्व एव सुवर्णस्तस्य यथा कप्यासं पुंडरीकमेवमक्षिणी तस्योदिति नाम स एष स
र्वेभ्यः पाप्मभ्यः उदित उदेति ह वै सर्वेभ्यः पाप्मभ्यो य एवं वेदेत्यधिदैवतमथाध्यात्मं य एषोंतरा
क्षिणि पुरुषो दृश्यत इत्यादि उपास्ति प्रस्तावार्थोऽथशब्दः य एष शास्त्रप्रसिद्ध आदित्यमंडलमध्यवर्ति
स्थानाद्यवयववर्णनेनोपासनानंदउपास्यपुरुषैर्दृष्टश्च हिरण्मयः ज्योतिर्मयः तत्रऽवहितधिया
मनुभवं प्रमाणयति दृश्यत इति हिरण्मयं ज्योतिः परं सुवर्णपदमपि आ प्राणखादिनखाग्रं चक्षु
षोर्विशेषमाह तस्येति कपेर्मर्कटस्य आसः पृष्ठभागोऽत्यंतं तेजस्वी तत्तत्त्वा पुंडरीकं तथात्यंतं तेजः

स्थितस्यास्यदेवस्यादित्याक्षिणीनेत्रे ध्यानार्थमेवनामकरोति तस्येति नामनिर्वक्ति सइति उदित्ःउक्त
२८ तःसकार्यसर्वपाप्मस्पर्शइत्यर्थः ध्यानफलमाह उदेतीति अधिदैवतंदेवतामधिकृत्योपास्ति
17 वाक्यमित्यर्थः अधिदैवध्यानोक्त्यनंतरं आत्मानंदेहमधिकृत्यापितदुक्तिरित्याह अथेति एता
दृशंस्थानद्वयस्थंपुरुषमधिकृत्यरूपवत्वश्रुत्यासर्वपाप्मास्पर्शश्रुत्याचसंशयः किमयंपुरुषोवि
द्याकर्मातिशयवशात्प्राप्तोत्कर्षः कश्चित्संसारीउतनित्यसिद्धः परमेश्वरः इतिकिंतावत्प्राप्तंसं
सारीति कुतः हिरण्यश्मश्रुरित्यादिरूपवत्त्वश्रवणात् अक्षिपुरुषस्यापितस्यैतस्यतदेवरूपं
पदमुष्यरूपमिति रूपवत्त्वश्रवणात् येचामुष्मात्परांचोलोकास्तेषांचेष्टेदेवकामानांचेत्यादि॥
पुरुषस्यएषयेचैतस्मादर्वाचोलोकास्तेषांचेष्टेमनुष्यकामानां चेत्यक्षिपुरुषस्यचैश्वर्यमर्यादा
श्रवणात् अमुष्मादादित्यादूर्ध्वगानांलोकानामीशितादेवकामानांदेवभोगानांचेत्यर्थः नहि
परमात्मनोमर्यादावदैश्वर्यंयुक्तं सएषसर्वेश्वर इतिश्रुतेः एतस्माच्चाक्षुषादर्वाग्गतानांलोकाना
मीशिताक्षिपुरुषः मनुष्यभोगानांचेत्यर्थः तस्मान्नादित्याक्ष्योरंतःपुरुषःपरमेश्वरः इतिप्रा
प्तेउच्यते अंतस्तद्धर्मोपदेशात् यएषोंतरादित्येयएषोंतरक्षिणिचश्रूयमाणः परमेश्वरएवन
संसारीकुतः तद्धर्मोसर्वपाप्मविदूरेणादित्यपुरुषस्यनामोक्त्वातदेवनामाक्षिपुरुषस्यातिदिश। २८
तियन्नामतन्नामेतितत्सर्वपाप्मराहित्यंब्रह्मधर्म एवंसैव ऋक्तत्सामतदुक्थंतद्यजुस्तद्ब्रह्मे

17A

ति ऋग्गाद्यात्मत्वेन निर्धारयति श्रुतिः तच्च सर्वात्मकब्रह्मण एवोपपद्यते सैव ऋगित्यादेः अयमर्थः
तच्छब्देन पूर्वप्रकृतपरामर्शः विधेयापेक्षया स्त्रीलिंगव्यपदेशः उक्थं शास्त्रविशेषः तस्मादृच्याद्यात्मा
म स्तोत्रं उक्थ्याद्युक्तस्य शास्त्रस्य ऋक्सामब्रह्मत्रयो वेदा इति सर्वं सर्वगानगायमानत्वं श्रुतौ निर्दिष्टं तच्च
इमे वीणायां गायंत्येतमेव ते गायंतीत्यादौ हिरण्यश्मश्रुकेशादिकमपि वैकं परमेश्वरस्य लोकानुग्र
हार्थेन उपपद्यत इति न विरोधः तस्मादस्यादित्ययोरंतः परमात्मा किंच भेदव्यपदेशाच्चान्यः आदि
त्यादेरंतः श्रूयमाणपुरुषः आदित्यशरीराभिमानिनो जीवादन्यः कुतः भेदव्यपदेशात् आ
दित्यशरीराभिमानिनो जीवादन्यस्य परमात्मनोंतर्यामितया तदंतर्यामिब्राह्मणे भेदेन व्यपदेशादित्यर्थः
य आदित्ये तिष्ठन्नादित्यादंतरो यमादित्यो न वेद यस्यादित्यः शरीरं य आदित्यमंतरो यमयत्येष त आ
त्मांतर्याम्यमृत इत्यादिश्रुत्यंतरेन यो भेदव्यपदेशादत्रापि ऋत्रांतरशब्दश्रुत्या प्रत्यभिज्ञानात् परमे
श्वर एवास्यादित्ययोरुपास्य इति सिद्धं आकाशस्तल्लिंगात् पूर्वमव्यभिचारिब्रह्मलिंगेनापहत
पाप्मत्वादिना रूपवत्त्वादिकमन्यथा नीतं इदं तु लिंगादाकाशशब्दश्रुतिरन्यथा नेतुं न शक्यते लिं
गापेक्षया श्रुतेः प्रबलत्वादिति प्रत्युदाहरणसंगत्येदमारभ्यते छांदोग्ये श्रूयते अस्य लोकस्य
का गतिरित्याकाश इति होवाच सर्वाणि ह वा इमानि भूतान्याकाशादेव समुत्पद्यंते आका
शं प्रत्यस्तं यंत्याकाशो ह्येवैभ्यो ज्यायानाकाशः परायणमिति तत्रोभयत्राकाशशब्दस्य प्रयोगदर्श

वे॰ सू॰ १८

18

नात्रसंशयः किं भूताकाशोऽत्राकाशशब्देनाभिधीयते उत परं ब्रह्मेति संदेहे आकाशश्चाऽनंदो न स्या
दित्यादिवेदे ब्रह्मण्याकाशशब्दप्रयोगः भूताकाशो रूढ इति विषयवाक्यार्थस्तु शालावत्यनामकः
कश्चन ऋषिः जैवलिं राजानं पृच्छति अस्येति सर्वस्य प्रपंचस्य किमधिकरणमिति प्रश्नार्थः जैवलि
रुत्तरमाह आकाश इति कथंभूतः आकाशः सर्वजगदधिष्ठानं तत्राह सर्वाणीति भूताकाशव्यावृ
त्तये हेतुमाह आकाशो ह्येति [?] तत्रैव हेत्वंतरमाह आकाश इति अयं सिद्धांतार्थः तत्र रूढ्या भूता
काश इति युक्तं न च वाक्यशेषानुपपत्तिः आकाशाद्वायुरित्यादौ तस्यापि वाय्वादिकारणत्वश्रवणात्
तस्माद्भूताकाश इति प्राप्ते ब्रूतः आकाशस्तल्लिंगात् आकाशशब्देन ब्रह्मणो ग्रहणं युक्तं कुतः॥
तल्लिंगात् तस्य ब्रह्मणो यल्लिंगं महाभूतोत्पत्त्यादिकं तस्यास्मिन्वाक्ये दृष्टत्वादित्यर्थः ननु इदं भूताका
शस्यापि वाय्वादिकारणत्वं दर्शितमिति चेन्न मूलकारणब्रह्मणोऽपरिग्रहे आकाशादेवेत्यवधार
णं सर्वाणीति च भूतविशेषणं आकाशं प्रत्यस्तं यंतीति कारणे लयप्रदर्शनं चानन्वकं स्यात्॥
ज्यायस्त्वपरायणत्वप्रदर्शनं ब्रह्मण्येव समंजसं आमंतरं च स्पष्टं ब्रह्मण एव परायणत्वं दर्शय
ति विज्ञानमानंदं ब्रह्म रातेर्दातुः परायणमिति रातेर्धनस्य दातुर्यजमानस्य परागतिरिति पादेराति
र्वेधुरित्यर्थः किंच स एष परोवरीयानुद्गीथः स एषोऽनंतः इत्युद्गीथे आकाशरूपे देवतात्वमीश्वर
त्वादीनयं संहरति जैवलिः तद्भूताकाशेन युज्यते नहि तस्यानंत्यं संभवति अतो परत्वं गुणात् १८

18A उत्कृष्टत्वं वरीयस्त्वं कालतो वस्तुतश्चापरिच्छिन्नत्वं अनंतत्वं देशतोऽपरिच्छिन्नत्वंदृष्टत्वं यत्तल्लिंगात् श्रुतिर्व
लीयसीति तत्र त्यजेदेकं कुलस्यार्थे इति न्यायेन बह्वीनामनवकाशलिंगश्रुतीनामनुग्रहाय एकस्या
आकाशश्रुतेर्वाध्यस्य युक्तत्वात् तस्मादाकाशशब्दं ब्रह्मैवात्र देवतोद्गीथ उपास्ये ति सिद्धं अत एव प्रा
णः अत्र चातिदेशत्वान्न पृथक् संगत्यपेक्षा यद्वा पूर्वत्राकाशश्रुतेरव्यभिचारिब्रह्मलिंगोपबृंहितत्वा
द्वाधो युक्तं इति सदुक्तत्वात् श्रूयमाणसंवेशनादिलिंगस्य प्राणेऽपि संभवेनाव्यभिचारिब्रह्मलिंगसह
चाराभावात्प्राणश्रुतिवाधो न युक्त इति प्रत्युदाहरणसंगतिः तत्रैवाकाशवाक्यानंतरं श्रूयते उद्गीथे
प्रस्तोतर्या देवता प्रस्तावमन्वायत्ता तां चेदविद्वान्प्रस्तोष्यसि मूर्धा ते व्यपतिष्यतीति कतमा सा देवतेति॥
इति होवाच सर्वाणि ह वा इमानि भूतानि प्राणमेवाभिसंविशंति प्राणमभ्युज्जिहते सैषा देवता प्रस्ताव
मन्वायत्तेत्यादि अस्यार्थः उद्गीथाधिकारे प्रासंगिकं प्रस्तावध्यानमिति वक्तुं उद्गीथ इत्युक्तं कश्चिद्वि
द्वांश्चाक्रायणो नाम यजमानराजोपसंगतो ज्ञानवैभवं स्वस्य प्रकटयन् प्रस्तोतारमुवाच हे प्रस्तोतः या
देवता प्रस्तावं सामभक्तिविशेषं अन्वायत्तानुगता स प्रस्तोता भीतः सन् चाक्रायणं पप्रच्छ कत
मेति तस्य प्रतिवचनं प्राण इति मुख्यप्राणवायुं व्यावर्तयति सर्वाणीति संविशंति लीना भवंति
लयकाले अभ्युज्जिहते जन्मकाले प्राणमभिलक्ष्योद्गच्छंतीति तत्र प्राणवंधनं हि सोम्य मनः
प्राणस्य प्राणमित्यादौ ब्रह्मणि प्राणशब्दप्रयोगात् प्राणवायौ च प्रसिद्धतरत्वात्संशयः किमत्र प्रा

वे. णशब्देनब्रह्माभिधीयतेऽतनवायुविकारइति मनःसर्वंखल्विदंतस्मात्चित्तेतत्सं प्राणेपरस्मिन्नेकोनस्थि
१९ तमित्यर्थः प्राणस्यपंचवृत्तेर्वायुविकारस्यप्राणस्यनाम्नःश्रुतिर्त्रिदमात्मानंयेविदुस्तब्रह्मजानंतीत्यर्थः
टी. तत्रप्रसिद्धिवलाद्वायुविकारइतिप्राप्तेऽत्राकाशन्यायमतिदिशतिभगवान्सूत्रकारः अतएवप्राण
19 इति अतएवपूर्वसूत्रोक्तात्तल्लिंगादितिहेतोरेवप्राणशब्दंब्रह्मेत्यर्थः सर्वाणिहवाइमानिभूतानिप्रा
णमेवाभिसंविशंतीत्यादिनामहाभूतसंवेशनादिकंब्रह्मलिंगंप्राणवाक्येश्रूयते नचयदावैपुरुषः
स्वपितिप्राणंतर्हिवागप्येतिप्राणंचक्षुःप्राणंमनःप्राणंश्रोत्रंसयदाप्रतिबुध्यते प्राणादेवाधिपुन
र्जायंतेइतिश्रुत्यावायुविकारेपिसंवेशनादिश्रूयतेइतिवाच्यं नहितत्रमहाभूतसंवेशनादिश्रूय
तेकिंतुइंद्रियसंवेशनादिकमेव श्रुत्यर्थस्तुतर्हितस्यांसुषुप्तावस्थायामित्यर्थः वाक्पदमङ्गकर्मेंद्रि
यलक्षकंचक्षुःश्रोत्रेंद्रियाणामुपलक्षणं तस्मादनन्यथासिद्धब्रह्मलिंगात्प्राणशब्दवाच्यं ब्रह्मैवोपा
स्यप्रसंगावेदेवतेतिसिद्धं ज्योतिश्चरणाभिधानात् पूर्वप्राणवाक्ये ब्रह्मलिंगसद्भाववत्ब्रह्मपरता
इहतुवाक्येतदभावान्नब्रह्मपरतेतिप्रत्युदाहरणसंगत्याइदमारभ्यते छांदोग्येश्रूयते अथयद
तः परोदिवोज्योतिर्दीप्यतेविश्वतःपृष्ठेषु सर्वतः पृष्ठेष्वनुत्तमेषूत्तमेषु लोकेष्विदंवाव तद्यदि
दमस्मिन्नंतः पुरुषेज्योतिरिति अस्यार्थः गायत्र्युपाधिब्रह्मोपास्यनंतरमुपास्यतरीकृत्यदेर्थस्यश
ब्दः अतोदिवोद्युलोकात्परः परस्तात् यज्ज्योतिर्दीप्यतेतदिदमित्योदरज्योतिष्यध्यस्यते कुत्रत १९

दीप्यतेतत्राह विश्वत इतिविश्वस्मात्प्राणिवर्गादुपरीत्यर्थः विश्वशब्दस्यसकलपर्यायार्थकत्वंव्यावर्त्तयति॥
19A सर्वतइति सर्वस्माद्भूरादिलोकात्सर्वसंसारमण्डलादुपरीत्यर्थः उत्तमानविद्यन्तेयेभ्यस्तेऽनुत्तमास्तेषु
इदंशाब्दार्थस्फुटयति परदिति लोकावेदयोभौतिकतेजसिब्रह्मणिचप्रयोगात्संशयः किमिह ज्योतिः
शब्देनादित्यादिकंतेजस्त्वमभिधीयते अत्रब्रह्मेति किंतावदत्रयुक्तंभौतिकमिति कुतः प्रसिद्धत्वात् परो
दिवः इत्यादिनामर्यादादिश्रवणाच्च नहिसर्वव्यापिनोब्रह्मणोमर्यादादिकंयुक्तं तस्माद्भौतिकंज्यो
तिरितिप्राप्तेब्रूमः ज्योतिश्चरणाभिधानादिति अत्रज्योतिःशब्दग्राह्यंब्रह्मैवकुतः चरणाभिधा
नात् पादाभिधानादित्यर्थः तथाहि ज्योतिर्वाक्यात्पूर्ववाक्येचतुष्पाद्ब्रह्मनिर्दिश्यते तावानस्य
महिमाततोज्यायांश्चपूरुषः पादोऽस्यसर्वाभूतानित्रिपादस्यामृतंदिवीति एतदृशुक्तगाय
त्रीवाइदंसर्वमित्यत्रभूतपृथिवीशरीरहृदयवाक्प्राणैः षड्विधाचतुष्पदागायत्रीतियदुक्तं॥
तत्रयच्चतुष्पादिब्रह्मणोमहिमाविभूतिः तावान्यावान्प्रपञ्चः स्वयंपूरुषः ततोज्यायान्तदेवा
ह पादइति सर्वाणिभूतान्यस्यैकः पादः एकदेशः त्रिपादमृतंदिविद्योतनवतिस्वात्मनिस्थि
तमिति एवंचयदतः परइत्यत्रयच्छब्दस्यसर्वनामत्वेनप्रसिद्धार्थवाचकत्वात्पूर्ववाक्येद्युसंबंधित्व
नप्रसिद्धंब्रह्मस्वात्मापिद्युसंबंधायत्वेनप्रत्यभिज्ञायते नप्राकृतंभौतिकंतेजः अतः परः तस्मा
दिनाप्रकृतंब्रह्मणोमर्यादादिकमुपासनार्थमित्युक्तं ज्योतिःशब्दोब्रह्मण्यपिप्रसिद्धोवेदान्तेषु॥

वे॰ २० हं

तस्मादिह ज्योतिः शब्दं ब्रह्म ॥ छंदोभिधानान्नेति चेन्न तथा चेतोर्पणनिगदात्तथा हि दर्शनं यदुक्तं ए
वं त्र गायत्र्याख्यं छंद उपाधिकब्रह्मणः उक्तत्वान्न तत्र प्रत्यभिज्ञायत इति तन्न गायत्री वा इदं सर्वं
भूतं यदिदं किंचेति गायत्र्याख्यं छंदसः प्रकृतत्वात्तस्यैव पादोस्य सर्वा भूतानीति भूतपादव्यपदेशा
20 न्न ब्रह्मण इति पूर्ववाक्ये छंद एवाभिधीयते न ब्रह्मेति चेन्न गायत्र्याख्यछंदोद्वारेण तदनुगतब्रह्म
णि सर्वात्मकत्वं प्रतिपाद्यते गायत्री वा इदं सर्वमित्यादिना न ह्यक्षरसन्निवेशमात्राया गायत्र्याः सर्वा
त्मकत्वं प्रतिपाद्यते तस्माद्गायत्र्यां विकारे यदनुगतं ब्रह्म तदेव गायत्री वा इदं सर्वमित्यादिना प्र
तिपाद्यत इति निष्कृष्टार्थस्य छंदोभिधानाद्गायत्र्याख्यछंदस एव पूर्ववाक्ये प्रकृतत्वाद्ब्रह्मणः प्र
कृतत्वमिति चेन्नैव कुतः तथा छंदोद्वारेण तद्गते ब्रह्मणि चेतोर्पणस्य चित्तसमाधानस्य निगदा
दभिधानात् तत्र दृष्टांतः तथा हि दर्शनं अन्यत्रापि विकारद्वारेण ब्रह्मण उपासनं दृश्यत इ
ति दर्शने दृष्टमित्यर्थः एतं ह्येव बह्वृचा महत्युक्थे मीमांसंते एतमग्नावध्वर्यव एतं महाव्रते छंदोगा इ
ति तदर्थस्तु एनमेवात्मानं ऋग्वेदिनो महदुक्थे प्रधाने शास्त्रे तदनुगतमुपासते यजुर्वेदिनोग्नौ
क्रतौ सामवेदिनो महाव्रताख्ये क्रतौ तदनुगतब्रह्मानुसंदधत इत्यैतरेये दृष्टमित्यर्थः एवं च गायत्री
शब्दो ब्रह्मलक्षक इति पूर्ववाक्ये ब्रह्म निर्दिष्टं यद्वा गायत्रीशब्दो ब्रह्मणि गौणः तथा च सूत्रे स्थितोक्त।
भागस्यायमर्थः यथा गायत्री षडक्षरैः पादैश्चतुष्पदा एवं ब्रह्मापि चतुष्पादिति गायत्रीशब्दे २०

नाभिधीयते चतुष्पात्त्वगुणयोगात् तथा गायत्री साहृश्येन चेतोर्पणास्य ध्यानस्य निरादाद्दिष्यानादिति॥
20A तथाहि दर्शनमिति छंदोभिधायिशब्दस्य साहृश्याद् ब्रह्मप्रयोगे दृष्टांतः तथाहि तेवाएतेपंचान्ये
पंचान्ये दशसंतस्तत्कृतमित्युपक्रम्याह सैषा विराडिति अस्यार्थः संवर्गविद्यायां अधिदैवमग्निस्
पंचचंद्रोभासश्चवायौ लीयंते अध्यात्मं प्राणादयः पंचस्वाधिदैविकेभ्योऽन्ये एवं ते सर्वे दशसंतः कृतमि
त्युच्यते कृतायरपर्यायचतुरायनामकद्यूतगतचतुरंकवत्त्वत्वारः पदार्थाः प्रकृतेसंति अंकाय
वत्रयः त्रेकायवत् द्वौ राकांकायवदेकस्तु एवं कृते दशाके सर्वांतर्भावात्तज्जयेसर्वजयोभवति॥
यथा कृतेजिते त्रेतादिकं सत्तानि अंकायादीनि जितानि भवंति तद्वत् तत्र च तुरायकापुर पर्यायेच
तुरंकायनामकद्यूतस्य कृतमिति संज्ञा स च चतुरंकायो दशात्मकः चतुष्कंकेषु त्रयाणां त्रिषु द्वयोः
तयोरेकस्य चांतर्भावात् वायाद्योपिदश तेषां च दशत्वसंख्यासाहृश्याद् वायादयः कृतमित्युच्यते।
एवमेव दशाक्षरा विराडिति श्रुत्या विराण्नामकछंदसो दशात्मकत्वाद्वायादौ विराट्शब्दप्रयोगः
इति यथा तद्वत् ब्रह्मणश्चतुष्पात्त्वसाम्यात् गायत्रीशब्दप्रयोगः इति दृष्टांतार्थः तस्मात्सर्ववाक्ये
ब्रह्मैव निर्दिष्टं न छंद इति भूतादिपादव्यपदेशोपपत्तेश्चैवं इतस्च गायत्रीवाक्ये ब्रह्मैव प्रतिपा
द्यं इत्यभ्युपगंतव्यमिति तावेशाद्वार्थः कुतः भूतादिपादव्यपदेशोपपत्तेः भूतपृथिवीशरीरहृदयेषु
तुष्पदा गायत्रीति व्यपदेशा[illegible]ण्येवोपपत्तेरित्यर्थः नह्यक्षरसन्निवेशरूपे गायत्र्यां भूतादिपाद

वे॰ व्यपदेशः संभवति किंच ते वा एते पंच ब्रह्मपुरुषा इति श्रुतिः पूर्वब्रह्मणः प्रकृतत्वे संगच्छते तथाहि
२१ वृ॰ गायत्र्याख्यब्रह्मणो हार्दस्योपास्यांगत्वेन द्वारपालादिगुणविध्यर्थः तस्य ह वा एतस्य हृदयस्य पंच देव
सुषय इत्यादिवाक्ये तत्र ते वा एते पंच ब्रह्मपुरुषा इति श्रुतं तेषां चोपास्यांगानां द्वारपालानां हृदय
21 छिद्रेषु स्थितानां प्राणादिवायूनां ब्रह्मपुरुषत्वोक्तिर्हृदयछिद्रेष्वपि ब्रह्मसंबंधोऽवगम्यत इत्यतोऽपि पूर्व
वाक्ये ब्रह्म प्रकृतं न तु गायत्रीमात्रं स्वोपास्यत्वेन तदंगानां ब्रह्मपुरुषत्वप्रसक्तेः अतो हृदयछिद्रेषु ब्रह्म
संबंधात्तत्रस्थवायूनां ब्रह्मपुरुषत्वमिति ब्रह्मपुरुषश्रुत्युपपत्तेरिति श्रुत्यर्थः तस्य हृदयस्य पंच
देवछिद्राणि प्राङ्मादिमादिनामकैः प्राणादिवायुभिर्देवैः परिपाल्यत्वाद्देवसुषित्वं छिद्राणामुपचर्य
ते तानि हृदयछिद्राणि हृदयस्य प्राङ्मुखदक्षिणमुखप्रत्यङ्मुखोदङ्मुखोर्ध्वमुखरूपाणि अस्या
ः प्राणव्यानापानसमानोदानात्मकाः वायवः क्रमेणादित्यचंद्राऽग्निपर्जन्याकाशनामकाः पंच
ब्रह्मपुरुषा इति तस्माद्गायत्रीवाक्ये ब्रह्मैव प्रतिपाद्यमिति ज्योतिर्वाक्ये द्युसंबंधात्तदेवप्रत्यभिज्ञाप
नयनमिति द्वे उपदेशभेदान्नेति चेन्नोभयस्मिन्नप्यविरोधात् ननु पूर्वस्मिन्वाक्ये त्रिपादस्यामृतं
दिवीति सप्तम्या द्यौराधारत्वेन निर्दिश्यते अत्र यदतः परो दिवो ज्योतिरित्यत्र पंचम्याऽवधित्वेन द्यौर्नि
र्दिश्यते तथा च विभक्तिभेदेनोपदेशभेदाज्ज्योतिर्वाक्ये प्रत्यभिज्ञानं संभवतीति चेन्न कुतः उभय।
स्मिन्नप्यविरोधात् विभक्तिभेदेनोपदेशद्वयेऽपि प्रत्यभिज्ञाया अविरोधादित्यर्थः प्रधानशक्ति। २१

पदिकार्थेनप्रत्यभिज्ञायांगुणभूतविभक्तार्थेनप्रतिबंधकइतिभावः तस्मात्परंब्रह्मैवकौत्सेयकागौ
21A उपास्यंज्योतिः शाद्वंनाम्यप्रौतिकंतेजइतिसिद्धं प्राणस्तथानुगमात् पूर्वस्मिन्नधिकरणोपदर्शि
पेरहस्यत्रयपदवृत्तस्यप्रसिद्धार्थवाचकस्यबलवत्तान्नस्यहकृतब्रह्मलिंगात्तेजोलिंगापेक्षयाबलवदि
स्तुके नतथेह किंचह्लबलवत्त्वसंपादकमस्तीतिप्रत्युदाहरणसंगतिरस्याधिकरणस्य यद्वापूर्ववदि
विदिवइत्यत्रधानप्रकृत्यर्थाविरोधाद्गुणभूतप्रत्ययार्थोन्यथानीतोयथातद्वदिहापिस्वतंत्रप्रा।
णादिपदार्थभेदप्रतीतेर्नस्यापेक्षब्रह्मरूपैक्यवाक्यार्थप्रतीतेर्गुणभूतायाअपलापोयुक्तइतिदृष्टांत
त्रसंगतिः पदार्थप्रतीतेः स्वातंत्र्याजनकत्वेनवाक्यार्थप्रतीतेर्गुणत्वेतज्जन्यत्वेनतद्बाध्यत्वं अ।
स्तिकौषीतकिब्राह्मणोपनिषदिइंद्रप्रतर्दनाख्यायिका प्रतर्दनोहवैदैवोदासिरिंद्रस्यप्रियंधा
मोपजगामयुद्धेनचपौरुषेणचेत्यारभ्याम्नाताततस्याश्रूयते सहोवाचप्राणोस्मिप्रज्ञात्मातंमा
मायुरमृतमुपास्वेति तथोत्तरत्रापि अथखलुप्राणएवप्रज्ञात्मेदंशरीरंपरिगृह्योत्थापयतीति
तथानवाचंविजिज्ञासीतवक्तारंविद्यादित्यादि अंतेच सएषप्राणएवप्रज्ञात्मानंदोजरोमृतइत्या
त्यादि ॥ अस्यार्थः दिवोदासस्यापत्यंपुमान्दैवोदासिः प्रियंप्रेमास्पदंधामगृहंतत्प्राप्तोहेतुः
युद्धेनेति तत्कारणेनपुरुषकारप्रदर्शनेनचप्रतर्दनोराजाइंद्रस्यगृहंजगामेत्यन्वयः तेहइं
इंद्रउवाचप्रतर्दनवरंतेददानि सहोवाचप्रतर्दनः हेइंद्रत्वमेववरंवृणीष्व यंत्वंमनुष्यायहित

तमंमन्मसइतितंहेंद्रउवाच प्राणोस्मीत्यादि मुख्यप्राणंव्यावर्त्तयति प्रज्ञात्मेतिनिर्विशेषचिन्मा
त्रंव्यावर्त्तयति तमांमिति इंद्रंच प्राणस्यइंद्ररूपदेवतात्वेलिंगं प्राणस्यसर्वप्राणरूपत्वेलिंगमस
२२ घ्यत्वल्लिन्यादि॥ वागादीनांदेहधारणशक्त्यभावनिश्चयानंतर्यमस्यशाद्धार्थः प्राणवायोर्देह।
22 धारणंतदुत्थापनंचकार्यमिति प्रसिद्धमितित्वल्लिन्मुक्तं प्राणस्यजीवत्वेलिंगं नवाचमिति
प्राणस्यपरमात्मत्वेलिंगं सएषइत्यादि एवंचप्राणशब्दस्यइंद्रप्राणयुजीवपरमात्मपरत्वेलि
गानांविद्यमानत्वात्संशयः किंपरः प्राणशब्दइतितत्रप्रसिद्ध्यवात्प्राणवायुपरइतिप्राप्तेउच्यते।
प्राणस्तथानुगमात् तत्रप्राणोब्रह्मेत्येवकुतः तथानुगमात् तथाब्रह्मपरत्वेन अनुगमादव
गमादित्यर्थः तथाहि प्रतर्दनःखलुहिततमंपुरुषार्थंपृष्टवान् तस्यपरमपुरुषार्थकामस्य
प्राणउपास्यत्वेनोपदिश्यते प्राणोस्मीत्यादिना एवंचपरमपुरुषार्थत्वेनोपदिश्यमानः प्राणः
कथंप्राणवायुःस्यात् तथासयोहमांवेदनहवैतस्यकेनचनकर्मणालोकोमीयतेनस्तेयेन
नभ्रूणहत्ययेत्यादि ब्रह्मपरिग्रहेघटते लीयंतेचास्यकर्माणि तस्मिन्दृष्टेपरावरेइत्यादिनाब्रह्म।
ज्ञानिनःकर्मक्षयश्रवणात् तदर्थस्यापोधिकारीमांब्रह्मरूपप्रसादादनुभवति तस्यविदुषोलो
कोसाक्षात्ननमीयतेनहिंस्यतेमहतापिपापेनज्ञानमहात्म्येनसर्वस्यापिपापस्यदग्धत्वादि
तिभावः एवंप्रज्ञात्मत्वंचब्रह्मणएवमुक्तं एवंसर्वपसंहारे आनंदोजरः इत्यपिब्रह्मपरत्वेच २२ शि

22A

तेतया सनसाधुना कर्मणाभूयान्भवतिनोएवासाधुना कनीयानेषह्येवसाधुकर्मकारयत एषउएवा

ऽसाधुकर्मकारयति एषलोकाधिपतिरेषलोकपाल एषलोकेश इतिचब्रह्मणएवसमंजसं अत्रहि

धर्माद्यसंस्पृष्टत्वं तत्कारयितृत्वं तदीशितृत्वं च ब्रह्मणोसाधारणं लिंगमस्तीति तस्मात्पूर्वापरप

र्यालोचनया ब्रह्मपरमेव प्राणपदमिति नवक्तुरात्मोपदेशादितिचेदध्यात्मसंबंधभूमाह्यस्मि

न् ननुयदुक्तं प्राणो ब्रह्मेति तदयुक्तमितिनन्वर्थः कुतः वक्तुरात्मोपदेशात् वक्तुरिंद्रस्यात्मते

नोपदेशादित्यर्थः तथाहि वक्ताहीन्द्रोनामकश्चिद्विग्रहवान्देवताविशेषः सप्राणत्वेप्रतर्दनायो

पदिशति मामेव विजानीहि इत्युपक्रम्य प्राणोस्मि प्रज्ञात्मेत्यहंकारवादेन किंचदेवतायाः प्रा

णत्वेलिंगांतरमस्ति अरुन्मुखान्यतीन् शालावृकेभ्यः प्रायच्छमिति रुतवेदांतवाक्यश्रेयोम

त्वेनवर्ततेते अरुन्मुखाः शालावृकेभ्यः अरण्यश्वभ्यः नहीदं ब्रह्मणो युक्तं एवमिंद्रपरत्वे

द्रूतरयथासंभवं योजनीयमिति अत्रोच्यते अध्यात्मसंबंधभूमाह्यस्मिन्निति हि यस्मादस्मिन्न

ध्याये अध्यात्मसंबंधस्य परमात्मसंबंधस्य भूमावाहुल्यमुपलभ्यत इत्यर्थः तथा यावद्ध्य

स्मिञ्छरीरे प्राणो वसति तावदायुरिति प्राणस्यैव प्रज्ञात्मनः परमात्मभूतस्यायुः प्रदानोपसं

हारयोः स्वातंत्र्यं दर्शयति न पराचीनस्येंद्रस्य एवमस्तित्वेच प्राणानां निश्रेयसमितिप्रज्ञाति रा

त्मानमिंद्रियाश्रयं प्राणं दर्शयति प्राणस्यास्तित्वे प्राणानामिंद्रियाणां निश्रेयसंस्थितिरितिप्र

वे.
२३ सू.
23

त्यर्थः एवमेव न वाचं विजिज्ञासीत वक्तारं विद्यादिति परमात्मानं वक्तारमुपक्रम्य तद्यथा रथ
स्यारेषु नेमिरर्पिता नाभावरा अर्पिता एवमेवैता भूतमात्राः प्रज्ञामात्रास्वर्पिताः प्रज्ञामात्राः
प्राणेऽर्पिताः स एष प्राण एव प्रज्ञात्मानंदोऽजरोऽमृत इति वाक्यं विषयेंद्रियव्यवहारारनाभिभू
तप्रत्यगात्मानमेवोपसंहरति अत्रार्थस्तु तत्तत्र भूतमात्रादीनां नानात्वेनेत्यर्थः दृष्टांतः यथा
लोके प्रसिद्धस्य रथस्यारेषु मध्यवर्त्तिशलाकासु चक्रोपांतनेमिरर्पिता नाभौ चक्रपिंडिकायां च
रा अर्पिताः तद्वद्भूतानि पृथिव्यादीनि मात्राः शब्दादयो विषयाः मीयंत इति मात्राः प्रज्ञामात्रासु वि
षयबोधकेष्विंद्रियेषु बुद्धिद्वारा अर्पिताः कर्मेंद्रियार्पितास्तद्विषयाः अर्पिताः तदधीनत्वात्तद्व्यवहा
रस्य ताश्च प्रज्ञामात्राः प्राणे परस्मिन्नर्पिताः प्राणस्य ब्रह्मत्वे लिंगमस्य स्पष्टमिति तस्माद्ध्यात्म
संबंधबाहुल्यात्परमात्मकब्रह्मोपदेश एवायं न देवतात्मोपदेश इति सिद्धं कथं तर्हि वक्तुरात्मो
पदेश इत्याशंक्याह शास्त्रदृष्ट्या तूपदेशो वामदेववत् इंद्रस्य वक्तुर्मामेव विजानीहीत्युपदे
शः शास्त्रदृष्ट्या ज्ञातव्यः अहमेव परं ब्रह्मेति शास्त्रदृष्ट्या पश्यन्नेवमुक्तवानित्यर्थः तत्र दृष्टां
तः वामदेववदिति यथा वामदेवः शास्त्रदृष्ट्या अहं मनुरभवं सूर्यश्चेत्याह तद्वदित्यर्थः यदु
क्तं इंद्रोपदेशनीतिन्यायादिदेवतापरत्वे लिंगमिति तत्र यद्वेदांतवाक्योत्थज्ञानप्रभावाद्दहमेवं भूतो
स्मीतीदृशवेदांतवाक्यान्यध्येयानि तानि चेदानीमस्मभ्यः प्रायच्छमिति तदर्थकत्वेनाविरोधात्तस्मा २३

23A

ष्प्राणात्मकब्रह्मपरमेतद्वाक्यमिति सिद्धं बंधवाहुल्यान्न देवतात्मा प्राण इति तत्त्वं तथापि न ब्रह्म
परमेवेदं वाक्यं किंतु जीवमुख्यप्राणवायुपरमपि कुतः जीवलिंगात् मुख्यप्राणलिंगाच्च न वाचं वि
जिज्ञासीत वक्तारं विद्यादिति जीवलिंगं वागादिकरणैर्व्यापृतस्य वक्तुर्जीवस्य विज्ञेयत्वमुपल।
भ्यते एवं प्राण एव प्रज्ञात्मेदं शरीरं परिगृह्योत्थापयतीति प्राणलिंगं देहधारणस्य प्राणलिंग
त्वात् तथाहि प्राणसंवादे श्रूयते वागादयः सर्वे प्राणाः प्रत्येकं श्रेष्ठतामात्मनो मन्यमानास्त्रि
धीरयिषया प्रजापतिं जग्मुः स च तानुवाच यस्मिन्नुत्क्रान्ते शरीरं पापिष्ठतरमिव भवति स युष्माकं
मध्ये श्रेष्ठ इति तस्मिन्प्रजापतावेवमुक्तवति वागादिषूत्क्रान्तेष्वपि मूकादिभावेन शरीरं स्वस्थम।
स्थात् मुख्यप्राणस्योच्चिक्रमिषायां तु वागादीनां व्याकुलता तान्प्रति प्राण उवाच मा मोहमाप
द्यथ यतो हमेवैतत्करोमि किं तत् पंचधा प्राणापानादिभेदेनात्मानं विभज्य एतद्बाणं शरीरं वा
तिगच्छतीति वानं वा नमेव बाणमस्थिरं शरीरमिति यावत् तदवष्टभ्य विधारयामीति श्रवणा
त् देहधारणं प्राणलिंगमेव श्रूयते तो न क्रान्तास्वपि तिष्ठ मा मोहमापद्यथाहमेवैतत्पंचधात्मानं
विभज्यैतद्बाणमवष्टभ्य विधारयामीति प्राणवायोः प्रज्ञात्मत्वं कथमिति चेत् ज्ञानेंद्रियाश्रयत्वा
दिति ब्रूमः तस्मादुपक्रमादिपर्यालोचनया ब्रह्मरूपैकवाक्यार्थप्रतीतावपि तस्य जीवमुख्य।
प्राणरूपपदार्थप्रतीतिजनकत्वेन गुणत्वात् पदार्थप्रतीतेश्च तज्जनकतया प्रधानत्वादेकवाक्या

र्थप्रतीतिमयोग्यवाक्यभेदावन्याप्यस्तिजीवमुख्यप्राणब्रह्मणांत्रयाणामुपास्यानांप्रत्येकंस्वातंत्र्येण
२४ वाक्यार्थत्वमितित्रीणिवाक्यानिनैकंब्रह्मवाक्यमिति चेन्न उपासात्रैविध्यात् त्रीण्युपासनानिप्र
सज्येरन्नित्यर्थः उपक्रमोपसंहाराभ्यांब्रह्मपरत्वेनैकवाक्यत्वेसंभवतिवाक्यभेदोनयुक्तः नचपदा
24 र्थप्रतीतेर्मुख्यत्वं तस्यावाक्यार्थप्रतीत्येशेषत्वेनतस्याएवप्रधानत्वात् नहिजनकत्वमात्रेणप्रधा
नत्वंयुक्तं सन्निपत्योपकारकाणामपिप्रधानत्वापत्तेः अन्यत्रब्रह्मलिंगवशात्प्राणशब्दस्यब्रह्म
णिवृत्त्याश्रितत्वाच्च इहापितत्त्वमोपन्यासादिब्रह्मलिंगयोगात् ब्रह्मणएवायमुपदेशइति यत्तु
जीवादिलिंगमस्तीतितत्परत्वमितितन्न प्राणव्यापारस्यापिपरमेश्वरायतत्वेनदेहधारणस्यापि
ब्रह्मण्युपचरितत्वशक्यत्वेनतत्र्यथासिद्धप्राणवायुलिंगाभावात् तथाचश्रुतिः नप्राणेननापा
नेनमर्त्योजीवतिकश्चन इतरेणतुजीवंतियस्मिन्नेतावुपाश्रितावितिप्राणादिव्यापारस्येश्वरा।
यतत्वमाह नापिनवाचंविजिज्ञासीतेत्यादिजीवलिंगविरोधः जीवस्यब्रह्मात्मत्वेनसर्वोपाधिप
रित्यागेनजीवस्यस्वरूपंब्रह्मदर्शयितुं नकचविजिज्ञासीतेत्यादिप्रत्यगात्माभिमुखीकरणार्थं उ
पदेशोनविरुध्यते यद्वाचानभ्युदितंयेनवाग्भ्युद्यतेतदेवब्रह्मत्वंविद्धि इतिश्रुत्यंतरंवागादिव्या
पतस्यवक्तृब्रह्मत्वंदर्शयति तस्माद्ब्रह्मपरमेवेदंवाक्यंनप्राणादिचित्रितयपरं एकदेशिनस्तुजीवोपा २४
सात्रैविध्यादाश्रितत्वादिहतद्योगादित्यस्यार्थीनरमाचक्षते तथाहि नब्रह्मवाक्येजीवमुख्यप्राण

24A

लिंगयोर्विरोधः कुतः उपासात्रैविध्यात् जीवधर्मेण प्राणधर्मेण ब्रह्मधर्मेण च मदितस्य त्रिविध
स्योपासनस्यैकस्य विवक्षितत्वादित्यर्थः अतो न वाक्यभेद इति तत्रायुरमृतमित्युपास्वायुः प्राणइ
तिइन्द्रशरीरस्य परिग्रहोऽस्य पद्यति तस्मादेतमेवोक्थमुपासीतेति प्राणधर्मः अथ यथास्यै प्रज्ञा
यै सर्वाणि भूतान्येकं भवन्ति तद्व्याख्यास्याम इत्युपक्रम्य वागेवास्या एकमंगमदूदुहत्तस्यै नामपर
स्तात्प्रतिविहिता भूतमात्रा प्रज्ञया वाचं समारुह्य वाचा सर्वाणि नामान्याप्नोतीत्यादि जीवधर्मः ता
वा एता दशैव भूतमात्रा अधिप्रज्ञं दश प्रज्ञामात्रा अधिभूतं यद्धि भूतमात्रा न स्युर्न प्रज्ञामात्राः स्यु
र्यद्वा प्रज्ञामात्रा न स्युर्न भूतमात्राः स्युर्न ह्यन्यतरतो रूपं किंचन सिध्येन्नो एतन्नाना तद्यथा रथस्या
रेषु नेमिरर्पिता नाभावरा अर्पिता एवमेवैता भूतमात्राः प्रज्ञामात्रास्वर्पिताः प्रज्ञामात्राः प्राणे
ऽर्पिताः स एष प्राण एव प्रज्ञात्मेत्यादि ब्रह्मधर्मः तदर्थस्तु प्राणो हि भूतानामायुरिति श्रुतेत
रेण प्राणस्यायुष्ट्वं सिद्धं जीवनस्य तदधीनत्वात् ॥ तस्मात्प्राणस्यैव देहव्यापकत्वाद्धार्दि
कमप्याययतीत्युक्तायं प्राणः एवमायुष्ट्वामृतत्वे उच्यते प्राणधर्मत्वस्य सहवासः सहो
त्क्रान्तिश्चेत्युक्तानेतद्धर्मद्वयं राज्ञायैः अस्य जीवात्मप्रज्ञायाः संबंधीति भूतानां सर्वाणि भूतानि त
हृदयेनेन कलितानि वस्तुतो यथैकं भवति तथा तद्व्याख्यास्याम इत्युपक्रम्योक्तं वागे
वेति श्रुतेः सा भासायाः स्वरूपतोऽज्ञातत्वे पिविमयित्व रूपस्य शरीरमिंद्रियमात्र्य तत्र।

वै·
२५ हं·
25

नामप्रपंचविषयत्वमर्थशरीरं बुद्धेरहंकारलक्षणायाः तथा रूपप्रपंचविषयित्वमर्थशरीरं ॥
तथाचकमैंद्रिस्मध्येवागेवास्याः प्रज्ञाया देहार्थमेकमंगमदूदुहत तदुद्रेचितवतीप्रकटयामासे
त्यर्थः नामात्मकप्रपंचे वाक्द्वारा प्रविष्टा बुद्धिर्नामप्रपंचविषयित्वलक्षणमर्थशरीरमाप्नो
तीतियावत् तस्याः प्रज्ञायाः पुनर्नाम किल परस्तात्परभागे रूपप्रपंचविषयित्वलक्षणोऽ
र्थशरीरे चक्षुरादिना प्रतिविहिता समन्याधिता भूतमात्रा रूपादिरूपाकारेण भवतीत्यर्थः॥
चक्षुरादिना प्रकाशितार्थप्रपंचो बुद्धेरितरभागे रूपप्रपंचविषयित्वलक्षणे परयामासेतिया
वत् एवं वागिंद्रियेणार्थप्रपंचे न च जीवाख्यप्रज्ञापूर्णविषयित्वलक्षणे शरीरे प्राप्यदृष्टी भ
वतीति सिद्धं तदुपहितचैतन्यद्वारा स्वरूपे दृष्ट्वा ध्यानमाह प्रज्ञयेति तया द्वारा वाचं कर
णं प्रतिचिदात्माहं वक्तेत्यध्यासमनुभूय वाचाकरणेन सर्वाणि नामानि वक्तव्यत्वेनाप्नोति च
क्षुषा सर्वाणि रूपाणि पश्यतीत्येव दृष्टत्वमनुभवतीत्यर्थः सर्वस्वतविषयकत्वस्यात्मनि दृष्ट
त्वादिसंपादकत्वं च बुद्धेर्धर्म इति फलितं चक्षुरेवास्या इत्यादिवर्ण्योत्तरांशो विस्तरहीनः सर्वो
पारत्वानेदत्वादिवुद्धधर्मइत्याह नावाइति भूतानि पृथिव्यादीनि पंच मात्राश्च शब्दादयः
पंच एताः दशभूतमात्राः अधिप्रज्ञं प्रज्ञा इंद्रियाणि तदुपलक्षितानिवा अधिकृत्य प्रवर्तन्ते द
श प्रज्ञामात्राः पंचेंद्रियाणि तदुपबुद्धयश्च अधिभूतं भूतानि पृथिव्यादीनि शब्दादीनि च अधि २५रा·

25A

हृत्प्रवर्त्तते एवंभूतमात्राणां दशानां ग्राह्यत्वेन प्रज्ञामात्रात्मकग्राहकापेक्षत्वमुक्तं प्रज्ञामात्राणां दशानां ग्राहकाणां ग्राहकभूतमात्रापेक्षत्वं चोक्तं इदमेव मिथः सापेक्षत्वे ग्राह्यग्राहकयोः साधयति यद्वीति तदेव स्पष्टयति नहीति ग्राह्यात् ग्राह्यं न सिध्यति किं तु ग्राहकादेव एवं ग्राह्यं विना ग्राहकं न निर्वहतीत्यन्योन्यसापेक्षत्वमित्यर्थः इदं ग्राह्यग्राहकद्वयं वस्तुतो न भिन्नमित्याह नो इति किं त्वेकस्मिन्नात्मन्यारोपितमिति शेषः तथ्यथेत्यादिकं तद्व्याख्यानं तस्माद्ब्रह्मण एव धर्मत्रयेणोपासनमेकं विवक्षितं अन्यत्रापि मनोमयः प्राणशरीर इत्यादौ उपाधिधर्मेण ब्रह्मोपासनस्य आश्रितत्वादिहापि तद्युज्यते तस्मान्न ब्रह्मवाक्यमिति इदमेकदेशिमतमप्युक्तं तथा हि किं मन्त्रोपासात्रयविशिष्टं ब्रह्म विधेयं उत ब्रह्मविशिष्टोपासात्रयं किं वा ब्रह्मानुवादेन तदाश्रितोपासनत्रयं नाद्यः ब्रह्मणः सिद्धत्वेन विध्ययोगात् नापि द्वितीयः वाक्यान्तरेण ब्रह्मणो ज्ञातत्वात् नापि तृतीयः ब्रह्मानुवादे नोपास्तिविधायकविशेषाभावात् वशीकारद्युपास्तीनां मिथोऽसंबंधात् उपास्तिविध्यावृत्त्या वाक्यभेदस्तदुरयकूवतात् तस्मात् यथाव्याख्यानमेव रमणीयमिति सिद्धं॥ शिव ॥ राम॥

॥ इति श्रीमत्ब्रह्मसूत्रवृत्तौ ब्रह्मामृतवर्षिण्यां प्रथमस्याध्यायस्य प्रथमः पादः॥

श्रीगणेशाय नमः एकादशान्यायाः अस्मिन्पादे सूत्राण्येकत्रिंशत्॥ एवं प्रथमे पादे स्पष्टब्रह्मलिंगानि कानि सर्वज्ञसर्वशक्तिजगदुत्पत्तिस्थितिलयकारणब्रह्मपराणि तानि कानिचि

सू॰ ब्रं॰ वे॰ २६ ह 26

तवाक्यान्यस्पष्टब्रह्मलिंगानि संदिह्यमानानि द्वितीयपादाभ्यां ब्रह्मपरतया नीयंते तत्र द्वितीयपादे प्रा
यशः उपास्यब्रह्मपराणि विचार्यंते तृतीये ज्ञेयपराणीति विभागः सर्वत्र प्रसिद्धोपदेशात् सर्व
स्तिन्यादेस्सर्वस्वत्वादिगुणस्य ब्रह्मणः सिद्धत्वात्तदुपजीव्योऽत्र स्योऽन्यानाद्धेतुहेतुमद्भवः संगतिः पू
र्वोत्तरयोः पूर्वाधिकरणेनास्यावांतरसंगतिर्यथा पूर्वं जीवादिलिंगबाधया ब्रह्मपरत्वमुक्तं ब्रह्मलि
गवशात् न तथेह ब्रह्मलिंगमस्ति किंतु ब्रह्मणः प्राकरणिकत्वमेव तथाच प्रकरणापेक्षया लिं
गस्य बलवत्त्वाज्जीवस्य मनोमयत्वादिलिंगैर्गम्यमानत्वात्तत्परमेवास्त्विति प्रत्युदाहरणसंगतिः य
थापादांतरत्वान्नावांतरसंगत्यपेक्षेति सर्वत्राधिकरणे सविशेषवाक्यविचाररूपे पूर्वोत्तरपक्षयो
रुपास्तिरेव फलं यत्र तु निर्विशेषवाक्यविचारः तत्र पूर्वपक्षे तदुपास्तिः सिद्धांते प्रमितिरिति भे
दः छांदोग्ये श्रूयते सर्वं खल्विदं ब्रह्म तज्जलानिति शांत उपासीत अथ खलु क्रतुमयः पुरुषो य
था क्रतुरस्मिंल्लोके पुरुषो भवति तथेतः प्रेत्य भवति स क्रतुं कुर्वीत मनोमयः प्राणशरीर इत्यादि
अस्यार्थः सर्वं जगत् ब्रह्मैवेत्यत्र हेतुमाह तज्जेति तस्माज्जायत इति तज्जं तस्मिँल्लीयत इति त
ल्लं तस्मिन्ननितिचेष्टत इति तदनं तज्जं च तल्लं च तदनं च तज्जलान् अत्र वर्णलोपः छांदसः इ
ति शब्दो हेतौ यस्मादेवं तस्मात्सर्वं जगत् ब्रह्मैवेत्यर्थः स क्रतुं कुर्वीतेत्यत्र सरितमुत्पास्यमनूद्य
शांतिरूपगुणं विदधाति शांत इति यतो ब्रह्मातिरिक्तं किंचिन्नास्ति अतो द्वेषादीनामभावात्॥ २६

शातः सन्नुपासीतेत्यर्थः गुणं विधाय गुणिविधित्सया पुंप्रयत्नसाध्योपासनायाः फलमाह अथेति पुरु
26A षोधिकृत उपासकः क्रतुमयः संकल्पमयः तत्र हेतुमाह यथेति ज्ञानं कर्म वा यथास्मिन्देहे स्थितः
संकल्पयति तथा तदनुसारेण फलं परत्र लभते तेनाधिकृतः क्रतुं ध्यानं कुर्वीत किं ध्यायेदित्याकांक्षा
यामाह मनोमय इति विभक्तिव्यत्ययेन मनोमयं प्राणशरीरं परमात्मानं ध्यायेदित्यर्थः अत्र मनो
मयत्वादेः प्रकृतब्रह्मसापेक्षत्वनिरपेक्षत्वाभ्यां संशयः किमत्र मनोमयत्वादिगुणकः शारीर उपास्य
त्वेन गृह्यते किं वा परमात्मेतिमत्रयुक्तं शारीरः इति कुतः अयं प्राणोऽयं मनाः श्रुभरित्यादिना ब्रह्मणो
मनआदिसंबंधनिरासात् जीवस्य मनआदिसंबंधस्य सर्वप्रसिद्धत्वात् तस्मान्मनोमयत्वादेः प्रकृत
ब्रह्मनिरपेक्षत्वात् तद्गुणकः शारीर एवोपास्य इति प्राप्ते ब्रूमः सर्वत्रप्रसिद्धोपदेशात् अत्र परमेव ब्रह्मउ
पास्यत्वेन परिगृह्यते कुतः सर्वत्र प्रसिद्धोपदेशात् सर्वेषु वेदान्तेषु यत्प्रसिद्धं ब्रह्म जगत्कारणं तस्ये
वात्र सर्वं खल्वित्यादिना उपदेशादित्यर्थः यदुक्तं मनोमयत्वादि प्रकृतब्रह्मासंबंधीति तत्र मनो
मयत्वादेर्विशेष्याकांक्षायां सर्वं खल्विदं ब्रह्मेति प्रकृते तदेवान्वेतिना प्रकृतो जीवः अन्यथा प्र
कृतहानिप्रसंगात् न च तदसंभवः सर्वात्मकत्वेन सर्वस्याप्युपपत्तेरिति किंच विवक्षितगुणोप
पत्तेश्च विवक्षिताः उपासनायामुपादेयत्वेनोपदिष्टा ये गुणाः सत्यसंकल्पत्वादयः ते ब्रह्मण्ये
वोपपन्ना इत्यर्थः मनोमयः प्राणशरीरो भारूपः सत्यसंकल्पः आकाशात्मा सर्वकर्मा सर्व

वे॰ सं॰ वृ॰ २७ 27

कमारस्त्वादिनाउपदिष्टंयद्यपिमनोमयत्वादि जीवस्याधारणं तथापि सत्यसंकल्पत्वाद्यवरोधेनस
र्वात्मकेब्रह्मणिमनोमयत्वाद्युपपत्तेः जीवधर्मानब्रह्मणिदर्शयतिचश्रुतिः त्वंस्त्रीत्वंपुमानसित्वं
कुमारउतवाकुमारीत्वंजीर्णोदंडेनवंचतित्वंजातोभवसिविश्वतोमुख इतिजीर्णःस्थविरोभूत्वायोदं
डेनवंचतिगच्छतिसोपित्वमेवेत्यर्थः अप्रमाणत्वादिश्रुतिस्तुनिर्गुणब्रह्मविषयेत्यविरोधः एवं
सत्यसंकल्पत्वादीनांब्रह्मण्युपपत्तिमुक्त्वाजीवेतेषामानुपपत्तिमाह अनुपपत्तेस्तुनशारीरः तुश
ब्दोवधारणार्थः अत्रमनोमयत्वादिगुणकंब्रह्मैवोपास्यंनतुशारीरः कुतः अनुपपत्तेः सत्य
संकल्पत्वादीनांजीवे अंशजस्यनानुपपत्तिरित्यर्थः शारीरस्यमनोमयत्वादिगुणकत्वाभावेहेत्वंत
रमाह कर्मकर्तृव्यपदेशाच्च नशारीरइत्यनुषंगः नशारीरोमनोमयत्वादिगुणकब्रह्मोपास्यः
कुतः कर्मकर्तृव्यपदेशात् एतमितिप्रेत्याभिसंभवितास्मीति एतमिति प्रकृतंमनोमयत्वादिगु
णकमुपास्यकत्वेनव्यपदिशति अभिसंभवितास्मिप्राप्तास्मीतिशारीरमुपाशकंकर्तृत्वेनव्य
पदिशति नचमुख्यंगतौएकस्मिन्शारीरे कर्मकर्तृभाव अंशजस्योपपद्यते तस्मात्नशा
रीरउपास्यइति किंच शब्दविशेषात् मनोमयत्वादिगुणःकः परमात्मैवनशारीरः कुतः शब्द
विशेषात् मनोमयत्वादिविशिष्टपरमात्माभिधायकस्यप्रथमांतशब्दस्यसत्वादित्यर्थः तथाहि स
मानप्रकरणेव्रीहिर्वायवोवाश्यामाकोवाश्यामाकतंडुलोवाएवमयमंतरात्मन्पुरुषोहिरण्मये २७

27A

इत्यादौ गुहमयोऽहिरण्मय इति प्रथमांतशब्देन परमात्माभिधानं अंतरात्मन्निति सप्तम्यंतेन शारीराभिधा
नं दृष्टमिति इत्यापि प्रथमांतत्वेनश्रुतो मनोमय इत्यादिशब्दः परमात्मपराएवेति ननु कर्मकर्तृव्य
पदेशो न संभवति जीवब्रह्मणोरभेदादित्याशंक्याह स्मृतेश्च स्मृतिवशाज्जीवपरमात्मनोर्भेद इ
त्यर्थः ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति भ्रामयन्सर्वभूतानि यंत्रारूढानि मायया इत्यादिस्मृ
तिः कल्पितं भेदं दर्शयति अतः कर्मकर्तृव्यपदेश उपपद्यते इत्यर्थः अर्भकौकस्त्वात्तद्व्यपदे
शाच्च नेति चेन्न निचाय्यत्वादेवं व्योमवच्च ननु नात्र परमात्मोपास्यः कुतः अर्भकौकस्त्वात् अर्भ
कं अल्पं ओकः स्थानं यस्य स अर्भकौकः तस्य भावस्तत्त्वं तस्मादित्यर्थः एष त आत्मांतर्हृदय इ
ति हृदयस्य परिच्छिन्नायतनत्वादित्यर्थः किंच तद्व्यपदेशाच्च स्वशब्देनैव एष अणीयान् ब्रीहेर्वा
यवाद्वेत्यणीयस्त्वास्य व्यपदेशादाराग्रमात्रो जीव इहोपास्यः न सर्वगतः परमात्मेति चेत् न।
निचाय्यत्वादेवं एवमर्भकौकस्त्वादिणीयस्त्वादिविशिष्टत्वेन रूपेण परमात्मन इह निचाय्यत्वा
त् उपास्यत्वादित्यर्थः सर्वगतस्याप्यल्पदेशगतत्वं कयाचिदपेक्षया संगच्छते यथा सकल
लोकाधीशः परमात्मा श्रीरामचंद्रः अयोध्याधीश इति व्यपदिश्यते एवं शालिग्रामे विष्णु
बुद्धिवत् हृदयपुंडरीके परमात्मा अर्भकौकस्त्वादिगुणकउपासनापेक्षया व्यपदिश्यते नैता
वता सर्वगतत्वहानिः तत्र दृष्टांतः व्योमवदिति यथा सर्वगतत्वमपि व्योम्नः सूचीपाशाद्यवच्छेदे

वे॰ सू॰ नन्वर्भकौकोपि स्वल्पाणीयो विव्यपदिश्यते न तद्व्याप्यीत्यर्थः संभोगप्राप्तिरिति चेन्न वैशेष्यात् नन्वी
२८ हं॰ श्वरस्य व्योमवत्सर्वगतत्वे चेतनत्वाविशेषाज्जीववत्सुखदुःखानुभवरूपसंभोगप्राप्तिरिति चे
28 न्न वैशेष्यात् जीवपरमात्मनोरत्यन्तविशेषादित्यर्थः जीवः कर्त्ता भोक्ता धर्मादिमांश्चेति तस्य
सुखदुःखसंबंधो युक्तः परमात्मा तु तद्विलक्षण इति न तस्य संभोगप्राप्तिरिति विशेष एव वैशे
ष्यस्यार्थे ष्यञ् विशेषातिशयद्योतनार्थो वा नच जीवपरमात्मनोरभेदात् भोक्तृत्वादिवैलक्ष
ण्यमपि न स्यादिति वाच्यं बिंबप्रतिबिंबयोः परस्परधर्मोऽसांकर्यस्याबालं सिद्धत्वादिति तस्मा
न्मनोमयत्वादिगुणकः परमात्मैवोपास्यो न शारीर इति सिद्धं अत्ता चराचरग्रहणात् पूर्वं ब्र
ह्मणो भोक्तृत्वाभावेऽप्युक्ते तर्हि तद्दत्तृत्वमपि जीवस्यैव न च ब्रह्मण इति दृष्टान्तसंगत्या इदमारभ्य
ते अत्र पूर्वपक्षे उपास्तिः फलं सिद्धान्ते निर्विशेषब्रह्मप्रमितिरिति विवेकः कठवल्लीषु श्रूयते॥
यस्य ब्रह्म च क्षत्रं चोभे भवत ओदनः मृत्युर्यस्योपसेचनं क इत्था वेद यत्र स इति अस्यार्थः यस्य
परमात्मनो ब्रह्म च क्षत्रं चोभे जात्युपलक्षिते अत्र ओदनः यस्य च मृत्युः सर्वमारकः उपसेच
नं ओदनमिश्रद्रव्यं भवति तत्सर्वसंहर्त्ता स परमात्मा वक्तव्येन तेन निर्विशेषं आत्मानं नाविरतो दुश्चरि
तादिति मंत्रोक्तोपायवान्यथा वेदायमस्तु उपायरहितो न वेदेति काक्वर्थः अत्रौदनोपसेचन २८
सूचितः कश्चिदत्ता प्रतीयते स तत्र किमग्निरुताहो जीवः आहोस्वित्परमात्मेति संशयः तत्रात्ता

मथास्मिन्ग्रंथेप्रश्नोपन्यासः संशयबीजं किं तावत्प्राप्तं अग्निरिति कुतः अग्निरन्नाद इति श्रुतिप्रसि
द्धिभ्यांजीवोवास्मात् तयोरन्यःपिप्पलंस्वाद्वत्तीतिश्रुतेः नपरमात्मेतिप्राप्तेब्रूमः अत्ताचराचरग्रहणा
28A त् अत्तात्रैश्वरोभवितुमर्हति कुतः चराचरग्रहणात् चराचरयोःस्थावरजंगमयोरद्यत्वेनग्र
हणात् श्रवणादित्यर्थः मृत्युपसेचनत्वेनसर्वप्राणिमात्रस्याद्यत्वेनप्रतीयमानत्वात् ब्रह्मक्ष
त्रग्रहणमुपलक्षणार्थं नहिसर्वसंहर्तुः परमात्मनोऽन्यस्यजीवादेः चराचरात्तृत्वंयुक्तं॥
तस्मादत्तेश्वरएव प्रकरणाच्च इतश्चेश्वरएवात्ता कुतः प्रकरणात् परमात्मनः प्रकृ
तत्वादित्यर्थः नजायतेम्रियतेवाविपश्चिदित्यादिनापरमात्मनः प्रकृतत्वात्कइत्थावेदय
त्रसइतिचदुर्विज्ञेयत्वंब्रह्मणोऽसाधारणंलिंगंदृष्टं गुहांप्रविष्टावात्मानौहितद्दर्शनात् इदं
ब्रह्मतत्रप्राहुर्मस्तुपदस्तात्रिर्यादितिनवल्गुपरस्यवदिहाविपिबत्कृस्यपसन्निदितगुहाप्रवे
शादिनाबुद्धिक्षेत्रज्ञपरत्वमुक्तमितिदृष्टांतसंगत्यास्यारंभः पूर्वपदेबुद्धिभिन्नजीवस्तानेफलं॥
सिद्धांतेतुनिर्गुणब्रह्मज्ञानमितिविभागः अनन्तवाक्यानंतरंकठवल्लीषुपठ्यते ऋतंपिबं
तौसुकृतस्यलोकेगुहांप्रविष्टौपरमेपरार्द्धे छायातपौब्रह्मविदोवदंतिपंचाग्नयोयेचत्रिणाचि
केताइति अस्यार्थः ऋतंअवश्यकर्मफलंपिबंतौभुंजानौजीवपरमात्मानौ छत्रिणोगच्छंती।
तिवदेकस्यजीवस्यभोक्तृत्वेनब्रह्मणोऽपिभोक्तृत्वव्यपदेशः सुकृतस्यधर्मस्यकार्येदेहस्य

सू: वे.
२९
29

सुकृतलोके वर्तमानौ परार्ध्ये परस्य ब्रह्मणः अर्धं स्थानमर्हतीति परार्ध्यं हृदयं तस्मिन् परमे श्रेष्ठे
याग्गुहा नभोलक्षणानां प्रविश्य स्थितौ छायातपवन्मिथो विरुद्धौ कर्तृत्वादिना ह्येलक्षणाभ्यां
तौ ब्रह्मविदः पंचाग्नयः कर्मिणश्च वदंति त्रिणाचिकेताऽग्निश्चितो यैस्ते त्रिणाचिकेताः ते
पि वदंतीत्यर्थः तत्र संशयः किमेह बुद्धिजीवौ निर्दिष्टौ उत जीवपरमात्मानाविति तत्र बुद्धिजी
वाविति प्राप्ते कुतः जीवस्य बुद्धिभिन्नत्वेन तस्यानार्थप्रश्नदर्शनात् येयं प्रेते विचिकित्सा मनुष्येऽस्ती
त्येके नायमस्तीति चैके एतद्विद्यामनुशिष्टस्त्वयाहं वराणामेष वरस्तृतीय इति मनुष्ये प्रेतेऽस्
तेऽस्ति येयं विचिकित्सा संशयः परलोकगामी भोक्ता जीवोऽस्तीत्येके नास्तीति चान्ये अतस्त्वयो
पदिष्टोऽहमेतन्निर्विचिकित्सं तत्त्वं ज्ञातुमिच्छामीति मृत्युं प्रति नचिकेतसो वचनमिति वरणं नचि
केता मृत्युं वरत्रयं पृष्टवान् स्वपितुः सौमनस्यं अग्निविद्यात्मविद्या चेति तेषां वराणां मध्ये
एष तृतीयो वर इत्यर्थः एवं च बुद्धिजीवयोः पृष्टत्वात्तावेवात्र निर्दिश्येते किं च गुहाप्रवेशस्य
ब्रह्मणोऽसंभवाद्ब्रह्मपानासंभवाच्च बुद्धिजीवाविति प्राप्ते ब्रूमः गुहां प्रविष्टावात्मानौ हि तद्द
र्शनात् गुहां प्रविष्टाविह जीवपरमात्मानावेव कुतः आत्मानौ हि ह्ययस्मादात्मनौ तस्मादि
त्यर्थः ऋतं पिबंताविति कर्मफलभोगश्रवणे नैकत्वावदात्मनि द्वितीयोऽप्यात्मैव न्याय्यः तत्र
हेतुमाह तद्दर्शनादिति संख्याश्रवणादिसंख्यावतेरेकसुकृतस्य लोके दर्शनादित्यर्थः तद्य २९

29A

यास्सगोर्द्वितीयोन्वेष्टव्यइत्युक्तेगौरेवद्वितीयोन्वेष्टव्यः नाश्वोनवामनुष्यः एवमिहापिचेतन
त्वसामान्याज्जीवपरमात्मानावेवबुद्धिविलक्षणजीवप्रश्नस्यान्यदेवोत्तरंनैतद्वाक्यंनापिगुहा
प्रवेशानुपपत्तिर्ब्रह्मणः योवेदनिहितंगुहायांपरमेव्योमन्नित्यादौब्रह्मणोगुहाप्रवेशश्रवणात्॥नचकर्मफलपा
नपानानुपपत्तिः छत्रिन्यायस्यदर्शितत्वादिति तस्माज्जीवपरमात्मनावेवगुहांप्रविष्टौ किंच॥
विशेषणाच्च जीवपरमात्मनोरेवास्मिन्ग्रंथेगंतृगंतव्यभावेनमंतृमंतव्यभावेनचविशेषि
तत्वादित्यर्थः आत्मानंरथिनंविद्धिशरीरंरथमेवचेत्यादिनाअनंतरेणग्रंथेनरथादिकल्पनया
विशिष्टात्मानंरथिनंसंसारमोक्षयोर्गंतारंकल्पयति सोध्वनःपारमाप्नोतितद्विष्णोःपरमंपद
मिति परमात्मानंगंतव्यंकल्पयति तथातंदुर्दर्शंगूढमनुप्रविष्टंगुहाहितंगह्वरेष्ठंपुराणं अ
ध्यात्मयोगाधिगमेनदेवंमत्वाधीरोहर्षशोकौजहातीतिपूर्वस्मिन्ग्रंथेमंतृमंतव्यत्वेनैनावेववि
शेषितौ सजीवःअध्वनःसंसारमार्गस्यपारमेवविशिनष्टि तदिति व्यापनशीलस्यब्रह्म
णःस्वरूपंपरमंकार्यकारणातीतंपदंतदेवपारंज्ञेयंनान्यदित्यर्थः दुर्दर्शंसूक्ष्मत्वात्दुर्ज्ञा
नंअतएवगूढंअनुप्रविष्टं आच्छादितंरूपेणविद्यमानं कुत्रेत्यतआह गुहेति गुहायां।
बुद्धावाहितंनिहितंगह्वरेष्ठंविषमेनसंकटदेशेस्थितंपुराणंचिरंतनंनमीश्वरं अध्यात्म
योगः प्रत्यगात्मन्येवचित्तसमाधानंतत्स्फुरत्तावाक्यादधिगमः साक्षात्कारःतेनसोहमे

मुं॰ टी॰
३०
30

वेतिनिश्चित्यधीरोविद्वान् हर्षाद्युपलक्षितंसंसारंजहातीत्यर्थः तथासमानेचवृक्षेपुरुषोनिम
ग्नोऽनीशयाशोचतिमुह्यमानः जुष्टंयदापश्यत्यमीशमस्यमहिमानमिति वीतशोकइतिम
न्त्रांतरेपिजीवपरमात्मानावेवविशिनष्टि मंत्रमंतव्यभावेन आत्मेश्वरयोः समानस्तुल्योवृ
क्षोदेहः पुरुषोजीवोनिमग्नः मनुष्योहमित्यभिनिवेशवान् अनीशयास्वनिच्छयामुह्यमानः
तत्त्वमजानन् अनिशंशोचति संसारमनुभवति जुष्टंध्यानादिनासेवितं यदा तत्प्रकर्षदशा
यामात्मबिंबभूतमीश्वरं प्रत्यक्त्वेनपश्यति तदा अस्यैवात्मत्वेनदृष्टस्यमहिमानंस्वरूपंप्राप्नो
ति ततश्च वीतशोकोभवति तत्रहेतुरितिशब्देनोक्तः बंधहेतोरविद्यायादास्तत्वादित्यर्थः
नह्यविद्याध्वंसानंतरंबंधकल्पनं नहवाएवंविदिकिंचरजआध्वंसनइतिश्रुतेः रजः अवि
द्याविदुषिकिंचनईषदपिस्वकल्पितंनाध्वंसनेनसंपादयतिस्वस्याएवाभावादित्यर्थः तस्मा
त्सर्वस्मिन्परस्मिंश्चग्रंथेजीवपरयोरेवविशेषितत्वात्तावेवगुहांप्रविष्टाविति जीवत्वादिधर्मवि
निर्मुक्तः परमात्माज्ञेयः इतिसिद्धं अंतरउपपत्तेः पूर्वेपिचैवंनाविति प्राथमिकद्वित्वश्रुत्याचे
तनेवनतुल्यजीवपरदृष्टान्तमाराच्चरमणुताः गुहाप्रवेशादयोनीताः तर्हितत्रहृदेवदृश्यत
इतिप्राथमिकप्रत्यक्ततोन्यात्रद्विप्रतिबिंबात्मावगत्युन्तरोपाच्चरमणुताऽस्मत्तत्वादयः स्तु
त्यर्थत्वेनकथंचित्रेयाः इति दृष्टांतसंगत्यास्यारंभः सर्वपक्षेप्रतिबिंबोप्यात्मनः फलसिद्धांतेव ३०

30A

श्रोपाग्निरिति उपकोसलविद्यायां छंदोग्ये श्रूयते य एषोऽक्षिणि पुरुषो दृश्यत एष आत्मे
ति होवाचैतदमृतमभयमेतद्ब्रह्मेति तद्यद्यप्यस्मिन्सर्पिर्वोदकं वा सिंचति वर्त्मनी एव ग
च्छतीत्यादि अस्यार्थः पुरुषः परमात्मा दृश्यते शास्त्रतः एष आत्मेति उपकोसलं प्रति।
आचार्य उवाच प्रतिबिंबात्मकछायाव्यावृत्त्यर्थमाह एतदिति इत्युवाचेत्यन्वयः अ
क्षिरूपस्थानस्य ब्रह्मसारूप्यमाह तदिति वर्त्मनी पक्ष्मस्थाने गच्छतीति द्वितीयाद्विवचने॥
ब्रह्मणो निर्लेपत्वात् चक्षुषोऽपि निर्लेपत्वात् सारूप्यमित्यर्थः तत्राक्षिण्यपन्नर उपदिश्य
मानः परमात्मा उत प्रतिबिंबादिरिति संशये दृश्यत इति वचनात्सर्वगतस्याक्षिस्थान
त्वानुपपत्तेश्च न परमात्मा किंतु प्रतिबिंबादिरिति प्राप्ते ब्रूमः अंतर उपपत्तेः अंतरः
अक्षिमध्यगतः परमात्मैव कुतः उपपत्तेः आत्मत्वामृतत्वाभयत्वादीनामिहोक्तानां प
रमात्मन्येवोपपत्तेरित्यर्थः न च दृश्यत इति श्रुत्यानेन विरोधः दर्शनस्य शास्त्रीयत्वेनावि
रोधात् किंच एतं संयद्वाम इत्याचक्षते एतं हि सर्वाणि वामान्यभिसंयंति एष उ एव
वामनीरेष हि सर्वाणि वामानि नयति एष उ एव भामनीरेष हि सर्वेषु लोकेषु भातीत्य
त्र निर्दिष्टसंयद्वामत्वादिगुणानां परमात्मन्येवोपपत्तेरंतरः परमात्मैव तदर्थ्यस्तु संय
द्वामशब्दार्थमाह एतमिति वामानि कर्मफलानि राजमहिषपुरुषदेहमाश्रित्याभिसं

छा. वे. वृं. यंतिउपयंतेसंयंतिवामान्यस्माद्यंतिसंयद्वामः सर्वफलोदयहेतुरित्यर्थः वामनीरप्ययम
३१ वेत्याह एषउइति वामनीशब्दार्थमाह एषहीति वामानिशोभनानि जनंप्रापयतिजन
31 स्यसर्वस्यभाग्यापकोप्ययमेवेत्यर्थः भामनीरप्ययमेवेत्याह एषउइति भामनीपदार्थमा
ह एषहीति भामानिभानानिनयतीतिभामनीः अयमेवसर्वप्रकाशकइत्यर्थः नहि
प्रतिबिंबस्यान्यस्यवारोक्तादृशागुणाः संभवंति तस्मादयमंतर पुरुषःपरमात्मा कथंपु
नः सर्वगतस्यात्मनोक्षिस्थानंव्यपदिश्यतइत्यत्रोत्तरंपठति स्थानादिव्यपदेशाच्च ईश्व
रस्यात्मस्थानादिव्यपदेशोनानुपपन्नः कुतः स्थानादिव्यपदेशात यःपृथिव्यांतिष्ठत्रि
त्यादौईश्वरस्यचतत्स्थानव्यपदेशस्यदृष्टत्वादित्यर्थः आदिपदेनरूपवत्त्वपरिग्रहोदृ।
ष्टांतत्वेनोक्तः हिरण्यश्मश्रुरित्यादौरूपवत्त्वस्योपासनार्थेनोपादानादित्युपासना
र्थमत्यस्थानव्यपदेशोनविरुध्यतइतिभावः अपिच सुखविशिष्टाभिधानादेवच अ
क्षिपुरुषः परमात्मैवोपदिश्यते कुतः सुखविशिष्टाभिधानात् एवकारेणनात्रसंश
यः कार्यइतिसूच्यते सुखविशिष्टंब्रह्मवाक्योपक्रमेश्रूयते तस्यैवेहाभिधानादित्यर्थः
तथाहि गुरुगृहेस्याचार्यान्तपरिचिरकालेवर्तमानमुपकोसलंगार्हपत्यादयग्नय ऊचुः।
प्राणोब्रह्मकंब्रह्मखंब्रह्मेति तत्रकंयदेवैषयिदस्त्विहतः खंशब्दश्चाकाशेरूढः इतिय ३१

31A

रस्याववि शिष्टंवृह्मवाक्योपक्रमेश्रुतमितितस्यैवात्रग्रहणंयुक्तमितिनाऽप्रकृतग्रहणायादेरित्यस्ये
तरः परमात्मा किंच श्रुतोपनिषत्कगत्यभिधानाच्च इतश्चायमंतरः परमात्मा कुतः श्रुतोपनि
षत्कगत्यभिधानात् श्रुताभ्यस्ताउपनिषद्रहस्यविद्यायेन स श्रुतोपनिषत्कः तस्य या गतिर
र्चिरादिरूपा तस्याः प्रकृतेऽत्राभिधानादित्यर्थः अथ योत्तरेण तपसा ब्रह्मचर्येण श्रद्धया वि
द्ययात्मानमन्विष्यादित्यमभिजयंत एतद्वै प्राणानामायतनमेतदमृतमभयमेतत्परा
यणमेतस्मान्न पुनरावर्त्तंत इति स्मृतावपि अग्निर्ज्योतिरहः शुक्लः षण्मासा उत्तरायणं॥
तत्र प्रयाता गच्छंति ब्रह्म ब्रह्मविदो जना इति या गतिर्ब्रह्मविदो दर्शिता सैवाक्षिपुरुषविदः श्रु
यते अथ यदु चैवास्मिञ्छव्यं कुर्वंति यदि च नार्चिषमेवाभिसंभवंतीत्युपक्रम्यादित्याच्चंद्रमसं
चंद्रमसो विद्युतं तत्पुरुषोऽमानव एनान् ब्रह्म गमयत्येष देवपथो ब्रह्मपथ एतेन प्रतिपद्य
माना इमं मानवमावर्त्तं नावर्त्तंत इति निगमितत्वादुक्तं अथ देहपातानंतरं ब्रह्मचर्यादितपसा देहा
नात्मानमनुसंधाय तद्विद्यया ध्यानात्प्रेयाउत्तरमार्गमर्चिराद्युपलक्षितं प्राप्य तेनादित्यादि
द्वारा कार्यब्रह्म प्राप्नुवंतीत्यर्थः कार्यब्रह्म विशिनष्टि एतदिति व्यष्टिसमस्तेंद्रियाणां सम
ष्ट्यभिमानी हिरण्यगर्भः स्थानमित्यर्थः तस्य वास्तवं स्वरूपमाह एतदमृतमिति एतद्विशे
षणानां सिद्ध्यर्थं हेतुमाह एतस्मादिति स्मृतावप्यादिशब्दैरातिवाहिकास्तदभिमानिन्यो देव।

नाम्टशंते अथेतुकार्थं अस्मिन्नुपासकेमृतेयदिपुत्रादयः शाव्यंशावसंवंधिसंस्कारादिकर्मकु
र्वंतियदिवानकुर्वंतिउभयथाप्यप्रतिहतोपास्तिफलात्तउपासकाअर्चिराद्यभिमानीदेवतांप्रा
प्नुवंति अर्चिषोहर्देवतांततः शुक्लपक्षदेवतांततः षण्मासोपलक्षितोत्तरायणदेवतांततः
संवत्सरदेवतांततआदित्यंततश्चंद्रंततोविद्युतंप्राप्नुवंति ततस्तत्रस्थितानुपासकान् ब्रह्मलो
कादागत्यामानवः मनुष्यभावरहितः ब्रह्मलोकभवइतियावत् सपुरुषोगत्वैनंकार्यंब्रह्मग
मयतिप्रापयतीतिअर्चिरादिदेवैर्नेतृभिरुपलक्षितत्वाद्देवपथः गंतव्येनब्रह्मणोपलक्षितत्वा
द्ब्रह्मपथस्तेनपथाकार्यंब्रह्मप्रतिपद्यमानाः पुनरिमंमानवंमनोःसर्गंजन्ममरणाद्याव
र्तिपुनरावर्तरूपंनावर्ततेनप्रविशंति तस्माद्विपुरुषः परमात्माइतस्मादपिपुरुषःपर
मात्मानप्रतिविंवात्मेत्याह अनवस्थितेरसंभवाच्चनेतरः इतरःछायापुरुषादिरक्षिगतइतिनयुक्तो॥
अनवस्थितेः उपासकस्यसर्वत्राक्षिणिछायासंपादकविंवभावात्पुरुषस्यानवस्थानादित
र्थः असंभवाच्च अमृतत्वादिगुणानांछायापुरुषेअसंभवादित्यर्थः तस्मात्परमात्मैवाक्षि
स्थानेउपास्यइतिसिद्धं अंतर्याम्यधिदैवादिषुतद्धर्मव्यपदेशात् पूर्वस्यानादिव्यपदेशाच्च
तिसूत्रेयः पृथिव्यांतिष्ठन्नित्याद्यंतर्यामिब्राह्मणस्थंयस्यात्मविनिष्ठन्नित्यादिवाक्यमंतर्यामि
णाब्रह्मवस्तुवल्लभोदाहृतं तदसितिमसमाधीयतइत्याक्षेपसंगत्याइदमारभ्यते पूर्वपदे ३२

यमतथावाक्यं नीयतेतदुपास्तिः फलं सर्वत्रस्य विशेषविचारे दृष्टत्वं सिद्धांतेत्र ज्ञोपास्तिरेवेतीहापितया
फलं दृष्टत्वं अंतर्यामिब्राह्मणेप्युपपतेर्थ इदं च लोकं परं लोकं सर्वाणि च भूतानि योंतरो यमयतीत्युपक्र
32A म्यः पृथिव्यां तिष्ठन् पृथिव्या अंतरो यं पृथिवी न वेद यस्य पृथिवी शरीरं यः पृथिवीमंतरो यमय
त्येष त आत्मांतर्याम्यमृत इत्यादि अत्र पृथिव्यां तिष्ठन् अंतर्यामीत्युक्ते स्थावरादिरिति शंकां वार
यति पृथिव्या इति तदभिमानिदेवतां प्रत्याह यमिति अशरीरस्य कथं नियंतृत्वमित्यत आह॥
यस्येति नियम्यकार्यकारणसंघातेनैव नियंतृत्वमिति फलितमाह य इति तस्मिन्नंतस्थमेवा
रयति एष इति तेममृचेत्यर्थः एवं यः पृथिव्यां तिष्ठन्नित्याद्यधिदैवतानंतरं यः सर्वेषु लोकेषि
त्यधिलोकं यः सर्वेषु वेदेष्वित्यधिवेदं यः सर्वेषु यज्ञेष्वित्यधियज्ञं यः सर्वेषु भूतेष्वित्यधिभूतं यः प्रा
णिष्वित्याद्यध्यात्मनीमं तमध्यात्मं च कश्चिदंतरस्त्ववस्थितो यमयितांतर्यामीत्युच्यते स किमधि
दैवाद्यभिमानी देवतात्मा किं वा प्राप्ताणिमाद्यैश्वर्यः कश्चिद्योगी किं वा परमात्मेति संशयः किं ताव
त्प्राप्तं देवतात्मेति कुतः पृथिव्येव यस्यायतनं अग्निर्लोको मनो ज्योतिरिति होन्यादिना कार्यकार
णसंघातस्य देवतायाः श्रवणत्वेन तस्य नियंतृत्वोपपत्तेः यस्य देवस्य पृथिवी आयतनं शरीरं अग्नि
र्लोकः लोक्यते अनेन रूपादिरिति लोकश्चक्षुर्ज्योतिरेवं मन इत्यर्थः नचाशरीरस्येश्वरस्य
नियंतृत्वं युक्तं तस्माद्देवतात्मा योगी वेति प्राप्ते ब्रूमः अंतर्याम्यधिदैवतादिषु तद्धर्मव्यपदेशा

वे. सू. ३३ 33

त अधिदैवादिषु श्रूयमाणोऽन्तर्यामी परमात्मैव कुतः तद्धर्मव्यपदेशात् तस्य परमात्मनो धर्मा
णामिह व्यपदेशादित्यर्थः सर्वान्तर्यामित्वममृतत्वमदृष्टत्वं चेदं परमात्मनो साधारणधर्माः उ
दाहृतवाक्ये दृष्टव्याः वा शारीरस्य कथं नियंतृत्वं तेनेति वाच्यं नियम्यशारीरेणैव तस्य नियंतृत्वोपप
त्तेरिति नन्वप्रधानमेवान्तर्याम्यस्तु इत्याशंक्याह नच स्मार्तमतद्धर्माभिलापात् स्मार्तं सांख्यस्मृति
कल्पितं प्रधानं नान्तर्यामिशब्दवाच्यं कुतः अतद्धर्माभिलापात् तत्कर्तृत्वेन प्रधानमुच्यते न गत
त्वात् प्रधानभिन्नः परमात्मेत्यर्थः तस्यैव चेतनस्य ये धर्माः दृष्टृत्वादयः तेषामिहाभिलापा
त् अभिधानादित्यर्थः अदृष्टो द्रष्टाऽश्रुतः श्रोताऽमतो मन्ताऽविज्ञातो विज्ञातेति वाक्यशेषे द्र
ष्टृत्वादयश्चेतनधर्माः श्रूयंते इति नाचेतनं प्रधानमन्तर्यामीत्यर्थः नर्हि चेतनो जीवो योगी भव
त्वन्तर्यामीत्यत आह शारीरश्चोभयेपि हि भेदेनैनमधीयते शारीरो नान्तर्यामीति नकारस्यापकर्ष
सूत्रादनुवृत्तिः कस्मात् उभयेपि हि काण्वाः माध्यंदिकाश्चान्तर्यामिणो भेदेनैनं जं शारीरं पृ
थिव्यादिवदधिष्ठानत्वेन नियम्यत्वेन चाधीयते यो विज्ञाने तिष्ठन्निति काण्वाः विज्ञानपदं जीव
परं य आत्मनि तिष्ठन्निति माध्यंदिनाः तस्मात् पृथिव्यादिवन्नियम्यत्वमेव जीवस्य न नियंतृत्व
भेदेनैवमधीयत इति पाठे एव यो विज्ञाने तिष्ठन्नित्यादिना प्रकारेणान्तर्यामी वोध्यः तस्मादधि
दैवादिष्वन्तर्यामी परमात्मेति सिद्धं अदृश्यत्वादिगुणको धर्मोक्तेः पूर्वं प्रधानविरोधि दृष्ट ३३

33A

त्वादिधर्मवच्छारीरप्रधानमंतर्यामीत्युक्तं तर्हि तद्विरोधिधर्माणामश्रवणात्प्रधानमेवादृश्य
त्वादिगुणको भूतयोनिः स्यादिति प्रत्युदाहरणसंगत्यास्यारंभः आथर्वणिकवाक्यमाम्नायते अ
थ परा यया तदक्षरमधिगम्यते यत्तदद्रेश्यमग्राह्यमगोत्रवर्णमचक्षुःश्रोत्रं तदपाणिपादं
नित्यं विभुं सर्वगतं सुसूक्ष्मं तदव्ययं यद्भूतयोनिं परिपश्यंति धीरा इत्यादि अस्यार्थः एवमपरा
ऋग्वेदादिलक्षणा विद्योक्ता तदानंतर्यमथशब्दार्थः यया तदक्षरमधिगम्यते सा परा उक्तं
दृष्टफलकविद्येत्यर्थः अक्षरस्य वर्णसमुदायत्वं वारयति यदिति अद्रेश्यमदृश्यं ज्ञानेंद्रियागम्यं
अग्राह्यं कर्मेंद्रियाविषयः अगोत्रं वंशरहितं अवर्णं जातिहीनं न केवलमिंद्रियाविषयः किंतु तद्रहि
तं चेत्याह अचक्षुरिति न विद्येते चक्षुःश्रोत्रे यस्य तत्तथा इदं च ज्ञानेंद्रियोपलक्षणं कर्मेंद्रियाभा
वमाह तदिति पाणिश्च पादश्च पाणिपादे न यस्य नास्ति तत्तथा उपलक्षणमेतत्कर्मेंद्रियाणां नि
त्यमनाशोपलक्षितं विभुं प्रभुं सर्वगतं सर्वकल्पनाधिष्ठानं सुसूक्ष्मं दुर्लीनत्वात् तदव्ययं नाशाभावा
त् यत्तथाविधमक्षरं भूतयोनिं यया परिपश्यंति धीराः सा परा विद्येत्यन्वयः तत्र संशयः किमदृ
श्यत्वादिगुणको भूतयोनिः प्रधानं वा शारीरो परमात्मा वेति अदृश्यत्वादीनां प्रधाने संभवात्प्र
धानमिति प्राप्ते ब्रूमः अदृश्यत्वादिगुणको धर्मोक्तेः अदृश्यत्वादिगुणको भूतयोनिः परमा
त्मैव कुतः धर्मोक्तेः यः सर्वज्ञः सर्वविद्यस्य ज्ञानमयं तपः तस्मादेतद्ब्रह्म नाम रूपमन्नं च जा

पतइतिईश्वरधर्मस्यसर्वज्ञत्वादेर्भूतयोनिनिर्देशादित्यर्थ सामान्यतः सर्वज्ञत्वंविशेषः सर्ववित्त्वं
३४ यस्यज्ञानमेवतपः तस्मादीश्वरादेतत्कार्यरूपंब्रह्महिरण्यगर्भः सूत्रभूतात्मकंनामस्थूलभू
34 तात्मकंरूपंचव्रीहियवादिसर्वंभौतिकमन्नंचजायतइत्यर्थः नन्वक्षरात्परतःपरः इत्यक्षरा
द्भूतयोनेः परस्येश्वरस्यसर्वज्ञत्वंश्रूयतेनभूतयोनेरितिचेन्न येनाक्षरंपुरुषंवेदसत्यंप्रोवाच
तांतत्वतोब्रह्मविद्यामितियेनज्ञानेनाक्षरंप्रकृतंभूतयोनिंसर्वज्ञपुरुषंसंवेदनंब्रह्मविद्यामुप
सन्नाययथावत्प्रोवाचाचार्यः प्रकृत्यादित्युपक्रमादक्षरात्परतः परइत्युच्यमानःपरोनभूतयो
नेः अतिरिच्यतेकिंत्वक्षरादित्यविद्यानिर्देशः ततःपरइतिनविरोधः किंचविषयत्वाकोऽक्षरा
त्मकभूतयोनिविद्यायाः परत्वंश्रूयमाणाभूतयोनेर्ब्रह्मत्वंगमयति नहिब्रह्मविद्यातोऽन्याविद्या
पराभवितुंयुक्ता मोक्षफलत्वात्मकपरत्वमब्रह्मविद्यायाएवसंभवाच्च ब्रह्मविद्योपक्रमेश्रूय
माणामपरविद्यांऋग्वेदादिलक्षणांकर्मविद्यामनित्यफलकत्वेननिंदतिचनित्यफलकब्र
ह्मविद्याप्रशंसार्थेतस्मात्परविद्याविषयभूतमक्षरंभूतयोनिः ब्रह्मैवनिंदादिश्रूयतेप्लवाह्ये
तेअदृढायज्ञरूपा अष्टादशोक्तमवरंयेषुकर्म एतच्छ्रेयोयेऽभिनंदन्तिमूढाजरामृत्युंतेपुन
रेवापियंतीतिनिंदिताचकर्मविद्यांततोविरक्तस्यब्रह्मविद्याधिकारंदर्शयति परीक्ष्यलोकान्क ३४ग.
र्मचितान्ब्राह्मणोनिर्वेदमायान्नास्त्यकृतःकृतेन तद्विज्ञानार्थंसगुरुमेवाभिगच्छेत्समित्पाणिः

34A
श्रोत्रियं ब्रह्मनिष्ठमिति अयमर्थः। एवं ते गच्छंतीति अवाः ऋषिसंगुरुमेवाभिगच्छेत्समित्पाणिः श्रोत्रि
यं ब्रह्मनिष्ठं विनाशिनः तत्प्रसिद्धो हि शाह्वः अत एवादृढाः के ते यज्ञरूपाः यज्ञो रूपमुपाधिर्येषां ते तेन तथा
ऋत्विगाः अष्टादश अंतर्भाव्य यंनीति ऋत्विजः षोडश यज्ञोपाधिकाः तद्वत्पत्नीयजमानश्च यज्ञोपा
धिकौ एवं अष्टादश यज्ञरूपाः क्षयिफलकत्वादवरं जघन्यं कर्म येषु अष्टादशसु विहितं एवं देवकर्म श्रो
यो हेतुर्न ब्रह्मसमीपीरिति ये मूढा अभिनंदंति ते पुनर्जरां पूर्वं मरणमेवाप्नुवंतीत्यर्थः कर्मजन्याँल्लोकानत्र अ
त्वादिना अनित्यतया परीक्ष्य ज्ञात्वा निर्वेदं वैराग्यमायात् गच्छेत् कथं नास्त्यकृतो मोक्षः कृतेन क
र्मणा अहं नित्यफलार्थी तस्मात् किं कर्मणेति विरक्तः सन् तस्य ब्रह्मणो ज्ञानार्थं गुरुपादोपसर्प
णं कुर्यात् तत्कृत्वा सत्कृत्य धनज्ञानाय श्रवणादि कुर्यादित्यर्थः रिक्तहस्तस्तु नोपेयाद्राजानं देवतां गु
रुमित्यादिना रिक्तहस्तगमनस्य निषिद्धत्वात् समित्पाणिरित्युक्तं श्रोत्रियमित्यादिना अध्ययनहीनस्य क
र्मिणो वा गुरुत्वं वार्यते कर्मनिंदया ततो विरक्तस्याधिकारोक्ते रक्तस्य विद्या ब्रह्मविद्येति फलितं तस्मा
ददृश्यत्वादिगुणकः परमात्मा अपि च विशेषणभेदव्यपदेशाभ्यां च नेतरौ अदृश्यत्वादिगुण
कः परमात्मैव नेतरौ प्रधानजीवौ विशेषणात् दिव्यो ह्यमूर्तः पुरुषः सबाह्याभ्यंतरो ह्यजः॥
अप्राणो ह्यमनाः शुभ्र इत्यादिना दिव्यत्वादिविशेषणश्रवणादित्यर्थः प्रधाननिरासे हेत्वंतरमाह॥
भेदव्यपदेशादिति अक्षरात्परतः पर इति प्रपंचोपादानस्याव्याकृतस्येश्वरशक्तिभूतस्याव्यक्त

दृश्यजडस्यपरमात्मनश्चभेदेनव्यपदिष्टत्वादित्यर्थः अव्याकृतस्याक्षरत्वं तस्य कार्यव्यापित्वेनपरत्वंवि
वे॰ सा॰ ३५ कारान्तरेनिदृष्टव्यं दिव्यत्वादेरयमर्थः दिव्यः स्वयंज्योतिः अमूर्तः निरवयवः पुरुषः पूर्णः वा
ह्यंकार्यमभ्यंतरंकारणं ताभ्यांकल्पिताभ्यां सहाधिष्ठानत्वेनतिष्ठतीति सबाह्याभ्यंतरः सर्वकल्पनाधि
35 ष्ठानमितियावत् अजः कूटस्थः नह्येतादृशाविशेषणानिअव्यक्तेजीवेवासंभवंति तस्मात्परमात्मैव
भूतयोनिः रूपोपन्यासाच्च किंचभूतयोनिः परमात्मैवनेतराविति तत्प्रकरणं कुतः रूपोपन्यासात्॥
सर्वविकारात्मकंशरीरं तस्योपन्यासादित्यर्थः अक्षरात्परतः पर इत्यस्यानंतरमेतस्माज्जायते
प्राण इत्यादिनाप्राणादिपृथिव्यंतानां सृष्टिमुक्त्वा तस्यैवभूतयोनेः सर्वकार्यात्मकंरूपमुपन्यस्यति अ
ग्निर्मूर्धाचक्षुषीचंद्रसूर्यौ दिशः श्रोत्रेवाग्विवृताश्चवेदाः वायुः प्राणोहृदयंविश्वमस्यपद्भ्यांपृथिवीह्ये
षसर्वभूतांतरात्मेति अग्निर्द्युलोकः असौवावद्युलोकोगौतमाग्निरितिश्रुतेः विवृतावेदावागित्यन्व
यः पद्भ्यामितिप्रथमार्थेपदोपृथिवीयस्यैतादृशंशरीरं सएषसर्वभूतानामंतरात्मेत्यर्थः
नह्येतादृशरूपोपन्यासः जीवाव्यक्तयोः परिग्रहेघटते परमात्मनस्तुसर्वात्मकत्वात्संयुज्यते अ
स्मत्तत्रसवृत्तिकारमतरीत्यायमर्थः प्रदर्शितः शंकरभगवत्पादास्तुअग्निर्मूर्धेतिवाक्यं।
स्यजायमानमध्यपातात्जायमानहिरण्यगर्भरूपस्यत्वात्मपरत्वेनपरमात्मपरत्वमितिवदंति तथा
हि एतस्माज्जायतेप्राणोमनः सर्वेंद्रियाणिचखंवायुर्ज्योतिरापश्चपृथिवीविश्वस्यधारिणीइति पूर्वं ३५

35A

प्राणादीनां सृष्टिरुक्तान्तर्यामिरत्राणि तस्मादग्निः समिधो यस्य सूर्य इति यस्य द्युलोकाद्यः सूर्यः स
ग्नेरिव भासकः यद्वा स्वग्निर्द्युलोकः यस्य सूर्य एव समिधः तस्मादित्य एव समिद्दीप्यते सोपि त
स्मादेव जायत इत्यर्थः एवमन्तरत्रे च जायमानानां निर्दिष्टत्वादग्निरदृश्ये इति वाक्यं जायमानहिरण्य
गर्भपरमेव हिरण्यगर्भस्यात्मन उत्पत्तिः श्रूयते हिरण्यगर्भः समवर्तताग्रे भूतस्य
जातः पतिरेक आसीत् स दाधार पृथिवीं द्यामुतेमां कस्मै देवाय हविषा विधेमेति सम
वर्तत प्रजायत जातः सन् भूतानां पतिर्बभूव भूतग्रामस्य कस्मै हिरण्यगर्भाय विधेम परि
चरेम सूत्रार्थस्तु भूतयोनिः परमात्मैव कुतः पुरुष एवेदं विश्वं कर्मेत्यादिना सर्वात्मत्वा
रूपोपन्यासादिति सर्वकर्मसमाप्तितपोज्ञानं च पुरुष एवेत्यर्थः तस्माददृश्यत्वादिगुणको भूत
योनिः परमात्मा निर्विशेषोक्तेयोऽ इति सिद्धं वैश्वानरः साधारणशब्दविशेषात् अत्र रूपोपन्या
स प्रसंगात्त्रैलोक्यदेहो वैश्वानरः स्मृतो विचार्यत इति प्रसंगसंगतिः यद्वा पूर्ववाक्ये पूर्वक्रमस्या
दृश्यत्वादिसाधारणधर्मस्य वाक्यशेषस्य सर्वज्ञत्वाद्युक्त्या ब्रह्मविषयत्वमुक्तं न हि तद्वदेवेहापि
उपक्रमस्थवैश्वानरसाधारणशब्दस्य वाक्यशेषस्थहोमाधारत्वोक्त्या प्रसिद्धानलग्रहीतयोजा
ठराग्निकतमस्तीति दृष्टान्तसंगतिः को न आत्मा किं ब्रह्मेत्यात्मानमेवेमं वैश्वानरं संप्रत्यध्येषि
तमेव नो ब्रूहीत्युपक्रम्याम्नायते यस्त्वेतमेवं प्रादेशमात्रमभिविमानमात्मानं वैश्वानरमुपा

ले सर्वेषु लोकेषु सर्वेषु भूतेषु सर्वेष्वात्मस्वन्नमत्ति तस्य ह वा एतस्यात्मनो वैश्वानरस्य मूर्द्धैव सुतेजा
३६ श्चक्षुर्विश्वरूपः प्राणः पृथग्वर्त्मात्मा संदेहो बहुलो बस्तिरेव रयिः पृथिव्येव पादावुर एव वेदिर्लोमानि
36 बर्हिर्हृदयं गार्हपत्यो मनोऽन्वाहार्यपचन आस्यमाहवनीय इत्यादि अस्यार्थः आत्मनोऽसंसारित्वार्थं
ब्रह्मपदं ब्रह्मणोऽपरोक्षत्वार्थमात्मपदं प्राचीनशाल सत्ययज्ञेन्द्रद्युम्नजिनबुडिलाः समेत्य मीमांसां
चक्रुः को नः आत्मा किं ब्रह्मेति ते च निश्चयार्थमुद्दालकमाजग्मुः सोऽपि सम्यक् न वेदेति तेनोद्दा
लकेन सह वैश्वानरोऽयमिति निश्चयार्थं केकयराजमश्वपतिमागताः सोचुः आत्मानमित्यादि सेय
सयेषि सर्वेदा ध्यायसि स च कैकेयराजः द्युलोकस्वरूपं वा वाकाशं वा रविपृथिवीनामध्येयं द्युलोका
दिकैक एव वैश्वानर इति मीमांसाकाले विवदमानाः प्राचीनशालादयः षडृषयो मत्समीपमागता
इति ज्ञात्वा तान्नादृशविपरीतबुद्धिनिरासेन सम्यग्वैश्वानरबुद्धिं जिग्राहयिषया तानेव पप्रच्छ औप
मन्यव कं त्वमात्मानमुपास्स इत्यादिना पृष्टाः ते तत्तत्रैकैकऋषिभिः द्युलोक एव वैश्वानर इत्युवाच॥
अन्यस्तु स्तेयो वैश्वानर इमे वक्रमेण पृथिवीपर्यंतमेकैकस्य वैश्वानरत्वं श्रुत्वा तेषां द्युसूर्यादीनां
क्रमेण सुतेजस्त्वविश्वरूपत्वपृथग्वर्त्मात्मत्वबहुलत्वरयित्वप्रसादत्वगुणयोगं विधाय प्रत्येकं वै
श्वानरयत्वं मूर्द्धपातांधत्वप्राणोत्क्रमणदेहशीर्णताबस्तिभेदपादशोषणदोषैर्निंदिता तेषां
मेव द्युसूर्यादीनां वैश्वानरपुरुषप्रतिमूर्द्धादिभावमुक्त्वा कृत्स्नं वैश्वानरोपासनमुपदिशति॥ य ३६

36A

ह्येतमित्यादिना आभमुखेन विश्वं मिमीते जानातीत्यभिविमानः तं प्रादेशपरिमाणमुपास्ते यस्तु
स सर्वलोकाद्याश्रयं फलमित्यर्थः लोकाः भोगभूमयः भूतानि तदुपादानः भोक्तारः स्वयमात्मन इ
ति भेदः तत्तत्संबंधिफलमन्नशब्दार्थः ध्यानफलमुक्त्वा ध्येयमाह तस्येति सुतेजस्त्वगुणात् द्यौर्वै
श्वानरस्य मूर्द्धा विश्वरूपत्वगुणकः सूर्यश्चक्षुः एष शुक्ल एष नील इत्यादि श्रुतेर्विश्वरूपत्वं बोध्यं॥
पृथग्वर्त्मा नानावर्त्मगामित्वमात्मा स्वभावो यस्य वायोः सततयानानागतित्वगुणो वायुः प्राणः बहुल
त्वगुण आकाशो संदेहः देहमध्यमित्यर्थः रयिर्धनं तद्गुणा आपो ऽस्य बस्तिः मूत्रस्थाने वैश्वा
नरस्य हि मायाधारत्वं संपादनार्थमुपकरणं वेत्यादि एवं सति वैश्वानरशब्दस्य अयमग्निर्वैश्वानरो यो ऽय
मंत पुरुषइत्यादौ जाठरे विश्वामाग्निं भुवनाय देवा वैश्वानरं केतुमह्नामकृण्वन्नित्यादावग्निसा
मान्ये वैश्वानरस्य सुमतौ स्याम राजाहिकं भुवनामभिश्रीरित्यादावग्निशरीरायां देवतायां च प्रयोगद
र्शनात् उपक्रमे च को न आत्मेत्युपक्रमाच्च संशयः किमत्र वैश्वानरो जाठरः उताऽग्निसामान्य
उताग्निशरीरा देवता आहोस्विच्छारीरः अथवा परमात्मेति सूत्रार्थस्तु पुरुषे पुरुषाकारे देहे॥
विश्वस्मै भुवनाय वैश्वानरमग्निमह्नां केतुं चिकृत्यरूपमकृण्वन् कृतवंतो देवा स्तुदुद्ये दिनव्यवहा
रादित्यर्थः वैश्वानरस्याग्न्याधिष्ठानस्य देवस्य सुमतौ शोभनबुद्धौ वयं स्याम भवेम तस्मात्स्मद्धि ब्रया
सुमतिर्भवत्वित्यर्थः अत्र हेतुः राजाहीति यस्माद्भुवनानामयं राजा कं सुखहेतुरभिश्रीर्वा श्रीरस्य

सभिरुग्रीरीय्स्र: तस्मात्तस्यस्तुमतोस्मामेतिस्ततिवाक्यार्थः तत्रजाठरादौवैश्वानरशब्दस्यप्रसिद्ध
स्मृ: २८ वै. त्वाज्जठरादिरेववैश्वानरइतिप्राप्तेब्रूमः वैश्वानरः साधारणशब्दविशेषात् वैश्वानरः परमात्मै
व कुतः साधारणशब्दविशेषात् साधारणशब्दयोरपिविशेषः साधारणशब्दविशेषस्तस्मादि
37 त्यर्थः जठराग्निसामान्यतद्देवतासाधारणोवैश्वानरोवैश्वानरशब्दः जीवपरयोः साधारणः आ।
त्मनः शब्दः तयोर्वैश्वानरात्मशब्दयोर्जाठरादौजीवादौचसाधारणयोरपिसतोः परमात्मपर
त्वएवविशेषोवगम्यते तस्यहवाएतस्यात्मनोवैश्वानरस्यमूर्धैवसुतेजाइत्यादावुक्तद्युमूर्धत्वा
दैः सर्वात्मकपरमात्मपरिग्रहेएवोपपन्नतरत्वात् तस्माद्वैश्वानरः परमात्मा स्मर्यमाणम
नुमानंस्यादिति किंचवैश्वानरपदस्यपरमात्मपरत्वेस्मर्यमाणंस्मृत्युक्तरूपंअनुमानंस्यात् अनु
मापकलिंगंस्यादित्यर्थः यस्याग्निरास्यंद्यौर्मूर्धाखंनाभिश्चरणौक्षितिः सूर्यश्चक्षुर्दिशः श्रोत्रंतस्मै
लोकात्मनेनमइत्यस्याः स्मृतेः शरीरात्मकरूपप्रतिपादनपरायाउक्ताद्दतत्श्रुतिरेवमूलांतरक
ल्पनेमानाभावात् तथाचस्मृतौपरमेश्वरस्यैवोक्तत्वात् तन्मूलश्रुतौविद्यमानवैश्वानरशब्दः पर
मात्मपरएवेतितात्पर्यं सूत्रेइतिशब्दोहेतौ यस्मादेवंलिंगमस्ति तस्माद्वैश्वानरः परमात्मैवेति॥
शब्दादिभ्योंतः प्रतिष्ठानान्नेतिचेन्नतथादृष्ट्युपदेशासंभवात्पुरुषमपिचैनमधीयते ननुवैश्वा
नरोनपरमात्मा कुतः शब्दादिभ्योंतः प्रतिष्ठानाच्च शब्दस्तावद्वैश्वानरशब्दोनपरमात्मपरः॥ २७ शब्द.

जाठरादौ रूढत्वात् आदिशब्दात् हृदयं गार्हपत्य इत्यादि अग्नित्रेताकल्पनं तद्यद्भक्तं प्रथममागच्छेत्तद्धो
मीयं इत्यादिना प्राणाहुत्याधारतासंकीर्तनं च गृह्यते एतेभ्यो जाठराग्नेः जाठर एव वैश्वानरः किं
37A चांतः प्रतिष्ठानात् पुरुषेऽन्तः प्रतिष्ठितं वेदेति वैश्वानरस्यान्तः प्रतिष्ठानश्रवणादिकं च जाठरे संभ
वति नच द्युमूर्द्धत्वाद्युपपत्तिः अग्निसामान्यात्मकभूताग्निपरिग्रहे तस्योपपत्तेः द्युलोका
दिस्थेवं यसतिस्सन्मंत्रेण व्रतात्तपोभावनात्पृथिवीं द्यामुतेमामाततान रोदसी मंतरिक्षमिति
मंत्रः इमां पृथिवीमुत द्यामपि द्यावापृथिव्यावेव रोदसी यो भानुना रूपेणाततान व्याप्तवानंतरि
क्षं तयोर्मध्यं चांतरा ततान स देवोऽग्निः द्युलोकाद्यावयवो ध्येय इति सेवार्थः तस्मान्न वैश्वानरः परमात्मेति
चेन्नायं दोषः कुतः तथा दृष्ट्युपदेशात् तथा जाठररूपेण परमेश्वरस्य दृष्टेरुपासनोपदे
शादित्यर्थः मनोमयः प्राणशरीरो भारूप इतिवत् यद्वा तथा तस्मिन् जाठरे परमेश्वरदृष्टेरुपदे
शात् मनो ब्रह्मेत्युपासीतेतिवदित्यर्थः ननु जाठर एव कस्मान्न वैश्वानरोऽस्तु तत्राह असंभवा
दिति मूर्द्धैवमतेनाद्युतादेः जाठरेऽसंभवादित्यर्थः नच भूताग्नेरपि तत्संभवः इत्युत्तरसूत्रे च वक्ष्यते
अपि च पुरुषमपि चैनं वैश्वानरं वाजसनेयिनः अधीयते स एषोऽग्निर्वैश्वानरो यत्पुरुषः स यो हैत
मेवमग्निं वैश्वानरं पुरुषविधं पुरुषेऽन्तः प्रतिष्ठितं वेदेति परमेश्वरस्य सर्वात्मकत्वात्पुरुषत्वं पु
रुषेऽन्तः प्रतिष्ठितत्वं च सर्वमप्युपपद्यते पुरुषविधमपि चैवमधीयते इति सूत्रपाठेऽयमेवार्थः ॥

वे॰सू॰वृ॰ नहिजाठरस्यएवंविधत्वंसंभवति परमात्मनस्तुयास्त्रायं सर्वात्मकत्वादविरुद्धं यथाचैतत्तथा
३८ स्पष्टयिष्यामः संपद्यतेतितिसूत्रे ननुद्युमूर्द्धत्वादिकंप्रदर्शितंमंत्रवर्णाद्भूताग्नौसंभवति तच्छरी
38 रायाद्देवतायावाऐश्वर्ययोगादित्यतआह अतएवनदेवताभूतंच २७ देवताचभूतंचदेवता
भूतंएकवाम्नावाद्युभय मपिनवैश्वानरः कुतः अतएवउक्तेभ्योहेतुभ्यः नहिविकारस्याग्नेर्विका
रांतरद्युलोकाद्यात्मकत्वंसंभवति अग्निशरीरायादेवतायाअपिनसंभवति ईश्वराधीनऐश्व
र्यत्वात् तस्मात्सर्वात्मकः परमात्मैववैश्वानरः साक्षादप्यविरोधंजैमिनिः २८ [illegible]ार्थ
कत्वमग्न्यादिशब्दस्यमुपेत्यजाठरोपाधिकंवाजाठरप्रतीकंवाब्रह्मोपास्यमित्युक्तं इदानींविने
वोपाध्यादिकल्पनांसाक्षादेवपरमेश्वरोपासनपरिग्रहेविरोधाभावंजैमिनिराचार्योमन्यतेपूर्वाप
रपर्यालोचनयावैश्वानरस्यब्रह्मत्वेनिर्णीतेवैश्वानरपदेग्निशब्दस्यकेनचिद्योगेनब्रह्मपर
तयानेतव्यइतितात्पर्यं विश्वाश्चासौनरश्चेतिविश्वनरः सर्वात्मकत्वात्विश्वेषांनरः कर्त्ते
तिवासर्वकारणत्वात्विश्वेनरानियम्याअस्येतिवासर्वेश्वरत्वात् विश्वानरएववैश्वानरः राक्ष
सवायसादिवत्स्वार्थेतद्धितः एवमग्निःपरमात्माअगिधातोर्गत्यर्थः कस्मिन्प्रलयांतस्मा।
ग्निरितिरूपं तत्रांगयतिनामयतिजगतोग्रंजन्मप्रापयतीत्यग्निरग्रणीरित्युक्तः एवंचपरमात्मनोग्र।
णीत्वादग्नित्वमिति तस्माद्वैश्वानरः परमात्मोपास्यः इतिसिद्धं ननु परमात्मपरिग्रहेकथंप्रा ३८रा॰

38A

देशमात्रश्रुतिरित्याशंक्य तां व्याख्यातुमारभते अभिव्यक्तेरित्याश्मरथ्यः अनवच्छिन्नस्यापि परमा
त्मनः प्रादेशमात्रत्वमुपपद्यते कथं अभिव्यक्तेः उपासकानामनुग्रहाय परमेश्वरो हृदयाद्युपा
सनास्थानेषु प्रादेशपरिमाणेन अभिव्यज्यते किलेत्याश्मरथ्यः आचार्यो मन्यते अनुस्मृतेर्बादरिः
प्रादेशमात्रहृत्पुण्डरीकस्थेन मनसानुस्मर्यतेऽतः यानात्प्रादेशमात्र इत्युच्यते इति बादरिराचा
र्यो मन्यते यथा प्रस्थपरिमिताः सक्तवः प्रस्था इत्युच्यन्ते तद्वत् संपत्तेरिति जैमिनिस्तथा हि
दर्शयति मूर्द्धप्रभृति चिबुकान्ते प्रादेशमात्रे वैश्वानरस्योपास्यत्वप्रतिपादनात्परमेश्वरस्य प्रादे
शमात्रत्वसंपत्तेः ततः प्रादेशमात्रत्वसंपत्तेः प्रादेशमात्रश्रुतिरुपपद्यत इति जैमिनिराचार्यो मन्य
ते अस्मिन्नर्थे श्रुतेः संवादमाह सूत्रकारः तथा हि दर्शयतीति वैश्वानरस्य प्रादेशमात्रत्व
प संपत्तिद्वारा श्रुतिरपि दर्शयतीत्यर्थः तथा हि समानप्रकरणे वाजसनेयिब्राह्मणे द्युप्रभृती
न् पृथिवीपर्यन्तान् त्रैलोक्यात्मनो वैश्वानरस्यावयवान् अध्यात्मं मूर्द्धादिषु चिबुकपर्यन्तेषु
प्रसिद्धपुरुषावयवेषु संपादयन् परमात्मनो वैश्वानरस्य प्रादेशमात्रत्वसंपत्तिं दर्शयति एवं
च पुरुषावयवेषु वैश्वानरस्य संपादनात्पुरुषविधत्वं पुरुषावयवेषु संपादितस्य वैश्वानरस्य
स्थितेः पुरुषेतः प्रतिष्ठितत्वं यद्यपि कार्यकरणसंघातरूपस्य पुरुषस्य वैश्वानरस्य द्यावाद्यव
यवसमुदायरूपत्वान्मूर्द्धादिचिबुकान्तेषु कतिपयावयवेषु स्थितत्वं तस्य वैश्वानरस्य न पुरुषेन्तस्थ

त्वं तथाधियावदवयवसमुदायात्मके पुरुषसमुदायिनो मूर्द्धादिचिबुकांतस्यावयवस्य शाखा
याइव वृक्षे विद्यमानत्वात्तन्निष्ठस्य वैश्वानरस्य पुरुषस्य त्वं व्यपदिश्यते शाखास्य प्रादेशगोच
३९ रत्वनिष्ठत्वमपदेशवदविरुद्धं ब्राह्मणे पठ्यते प्रादेशमात्रमिव ह वै देवाः सुविदिता अभि
39 संपन्नास्तथा तु व एतान्वक्ष्यामि यथा प्रादेशमात्रमेवाभिसंपादयिष्यामीति स होवाच मूर्द्धान
मुपदिशन्नुवाचैष वा अतिष्ठा वैश्वानर इति चक्षुषी उपदिशन्नुवाचैव स तेजा वैश्वानर इति ना
सिके उपदिशन्नुवाचैष वै पृथग्वर्त्मात्मा वैश्वानर इति मुख्यमाकाशमुपदिशन्नुवाचैष वै बहु
लो वैश्वानर इति मुख्या अप उपदिशन्नुवाचैष वै रयिर्वैश्वानर इति चिबुकमुपदिशन्नुवाचैष
वै प्रतिष्ठा वैश्वानर इति अस्यार्थः परमेश्वरमप्रादेशमात्रमपि संपदा प्रादेशमात्रमिव सम्य
ग्विदितवंतो देवास्तमेवेश्वरं पूर्वमभिसंपन्नास्ततो वो युष्मभ्यं तयासुप्रभृतीन्त्वयावान्वक्ष्यामि
यथा प्रादेशपरिमाणं वैश्वानरं संपादयिष्यामीति प्राचीनशालादीन्प्रति अश्वपतिः कैकेयो
राजोवाच किं कुर्वन्नित्युक्ते स्वस्य मूर्द्धानमुपदिशन्करांगेणादर्शयत् एष वै स्वर्लोकादीनतीत्य ति
ष्ठतीत्यतिष्ठा द्यौर्वैश्वानरस्यावयव इति प्रसिद्धं मनुष्यमूर्द्धनि अध्यधिदैवं यो मूर्द्धा द्युलोकस्त
द्दृष्टिः कर्त्तव्येत्युवाच एवमेव स्वस्य चक्षुषी दर्शयन्स तेजाः सूर्यो वैश्वानरस्य चक्षुरिति प्रसिद्ध
चक्षुषो वैश्वानरस्याधिदैवं पदादित्यास्यं चक्षुस्तत्र दृष्टिः कर्त्तव्येत्युवाच एवमग्रेपि स्वावय ३९

39A

वेषु वैश्वानरावयवदृष्टिरिति द्रष्टव्यं पृथग्वर्त्मात्मवायुर्वैश्वानरस्य प्राणः संदेहमुखावच्छिन्नं य
न्नभः तस्मिन्नध्यात्मनभसि योऽधिदैवं बहुलश्चाकाशो वैश्वानरस्य देहमध्यात्मकावयवः तद
दृष्टिरित्युवाचेत्यर्थः स्थूलाः सर्वास्तेभवाः नाडयो वैश्वानरस्य वस्तिभूता रयिवाच्याः याश्चापल
दृष्टिरित्युवाच एवं स्वचिबुके अधरमुखफलके प्रतिष्ठापदवाच्या वैश्वानरपादभूता पृथिवी द्रष्ट
व्येति आमनंति चैनमस्मिन् अस्मिन्प्रादेशपरिमाणे मूर्द्धचिबुकांतराले एनं परमेश्वरं जाबा
लाश्चामनंतीति अनेनापि प्रादेशमात्रश्रुतिरुपपन्नेत्यर्थः एवमामनंति य एषोऽनंतोऽव्यक्त आत्मा सो
ऽविमुक्ते प्रतिष्ठित इति सोऽविमुक्तः कस्मिन्प्रतिष्ठित इति वरणायां नास्यां मध्ये प्रतिष्ठित इति का वै
वरणा का च नासीति सर्वाणींद्रियकृतानि पापानि वारयतीति नाशयतीति वरणा नाशीति कतमच्चा
स्य स्थानं भवतीति भ्रुवोर्घ्राणस्य च यः संधिः स एव द्यौर्लोकस्य च परस्य च संधिर्भवतीति अस्या
र्थः य एषः प्रसिद्धः परमात्मा अनंतः अव्यक्तः स्वरूपेणानभिव्यक्तः दुर्विज्ञेयः इति यावत् तं कथं वि
जानीयामिति अत्रिप्रश्ने याज्ञवल्क्यस्योत्तरं स इति सद्धि परमात्मा जीवात्मन्यविमुक्तेऽव्यवहारतः सं
सारिणि प्रतिष्ठितः पुरस्यैव प्रत्यक्त्वादित्यर्थः पुनरत्रिरपृच्छत् स इति याज्ञवल्क्यो ब्रूते वरणाया।
मिति वरणादिपदार्थवदनपदे निर्वक्ति सर्वाणीति सर्वाणींद्रियवृत्तिकृतान् दोषान् वारयति
तेन वरणा भवतीत्यर्थः तान्दोषान्नाशयतीति नाशीति तथा च नियम्यजीवद्वारा नियंतरीश्वरस्या

वे.सू.वृ. धिष्ठानत्वान्नाम्नः भुवोः पाप्मनाशकत्वमिति सिद्धं तत्राधिस्थानविशेषजिज्ञासया पृच्छति कतमच्छेति
४० पूर्वोक्तमध्यमागावर्णस्य सूचयति भ्रुवोरिति तदेवस्थानमित्यर्थः समसंधिर्द्युलोकस्य स्वर्गस्य परस्य
40 च ब्रह्मलोकस्य संधित्वेन ध्येयत्वमाह स इति तस्मात्परमेश्वरोऽस्मात्परं वैश्वानरत्वादस्मादिति सिद्धं ॥
॥ इति श्रीमद्ब्रह्मसूत्रवृत्तौ ब्रह्मामृतवर्षिण्यां प्रथमाध्यायस्य द्वितीयः पादः ॥ २ ॥
द्युभ्वाद्यायतनं स्वशब्दात् पूर्वं त्रैलोक्यात्मा वैश्वानरः परमात्मेत्युक्तं तर्हि त्रैलोक्यायतनमन्यदित्याशं
क्य समाधानाद् तेयसंगतिः यद्वोपक्रमे स्वमना धारणशब्दस्य वाक्यशेषस्य लिंगेन द्युमूर्द्धत्वादि
रूपस्य ब्रह्मपरत्ववदिहाप्युपक्रमस्थस्य धारणायतनत्वस्य वाक्यशेषस्य सेतुश्रुत्या परिच्छिन्न
प्रधानदौ सेतुशब्दाद्धैतव्यवस्थाक्षितिति दृष्टान्तसंगतिः प्राप्यशोनिर्विशेषब्रह्मणि अस्मिन्पादे वा
क्यानां समन्वयप्रतिपादनाच्छ्रुत्याध्यायपादसंगतयो बोध्याः अत्र पूर्वपक्षे प्रधानाद्युपास्तिः फले
सिद्धान्ते ब्रह्मज्ञानमिति विवेकः अथर्वणे श्रूयते यस्मिन्द्यौः पृथिवी चान्तरिक्षमोतं मनः सह प्रा
णैश्च सर्वैः तमेवैकं जानथ आत्मानमन्या वाचो विमुञ्चथ अमृतस्यैष सेतुरिति अस्यार्थः लो
कत्रयाधिष्ठानतोक्त्या पंचीकृतभूताधिष्ठानत्वमाह यस्मिन्द्यौरिति कार्यब्रह्माण्डसमष्टेः करण
स्यान्नमेव कल्पितत्वमाह मन इति इंद्रियसमष्टिदेवतानां तत्रैव कल्पितत्वं सूचयति सहेति प्रा
णैरिंद्रियाधिष्ठानदेवैः चकारेणाभूतसूक्ष्माविद्याजीवानां तथात्वमित्यध्यस्तत्वं यन्निते सविला ए.४०

40A साप्रकृतिंमायांब्रह्मतत्त्वतर्काग्निनाविलाप्यतमेवाधिष्ठानभूतमद्वयमात्मानंविजानथेतिश्रुत
त्यन्यस्मरमानाश्रुतिः तमेवेति वाच्यवाचककल्पनानिरोकसाक्षात्काराहाथमाह अमृत
ति एषसाक्षात्कारः सविलासाविद्यानिवृत्तिलक्षणामृतत्वस्य सेतुः व्यवस्थापकः इत्याह
अमृतस्येति विजानथेत्यनेनोक्तः साक्षात्कारः एष इत्युच्यते अमृतस्यामृतत्वस्य
त्र द्युभ्वादीनामोतत्वश्रवणात्किंचिदायतनंप्रतीयते तत्किंप्रधानमुतजीवः आहोस्वित्ब्र
ह्मेतिसंशये तत्रप्रधानादिरितिप्राप्ते ब्रूमः द्युभ्वाद्यायतनंस्वशब्दात् द्यौश्चभूश्चद्युभ्वौद्यु
भ्वादीयस्यद्यौःपृथिवीचान्तरिक्षमित्येवमात्मकस्यतत् द्युभ्वादितदायतनंब्रह्मैव कुतः स्वश
ब्दात् स्वस्यपरब्रह्मणोवाचकोयमात्मशब्दस्तस्मादित्यर्थः तमेवैकंजानथआत्मानमित्यात्म
शब्दश्रवणादिति॥ मुक्तोपसृप्यव्यपदेशात् किंच द्युभ्वाद्यायतनंब्रह्मैव कुतः मुक्तैरु
पसृप्यंप्राप्यंमुक्तोपसृप्यंभावप्रधानोनिर्देशः मुक्तोपसृप्यत्वस्यव्यपदेशादित्यर्थः य
द्वामुक्तैरुपसृप्यंप्राप्यंयत्तस्यैवात्रनिर्देशादित्यर्थः मुक्तप्राप्यत्वव्यपदेशादितिपाठेनकश्चित्ता
यतः भिद्यतेहृदयग्रन्थिः छिद्यन्तेसर्वसंशयाः क्षीयन्तेचास्यकर्माणितस्मिन्दृष्टेपरावरे यथा
नद्यः स्यन्दमानाः समुद्रेऽस्तंगच्छन्तिनामरूपेविहाय तथाविद्वान्नामरूपाद्विमुक्तः परात्परंपु
रुषमुपैतिदिव्यमिति इदंचमुक्तोपसृप्यत्वंब्रह्मणएवश्रुतंतत्रैवप्रसिद्धं यदासर्वेप्रमुच्यन्तेकामा

वे. सू.वृ. येस्यहृदिस्थिताः अथमर्त्योमृतोभवत्यत्रब्रह्मसमश्नुतेइति अपिचतमेवैकंजानथआत्मानम
४१ न्यावाचोविमुंचथेतिचश्रुतोकःएवैकंविज्ञेयत्वब्रह्मलिंगंश्रुत्यंतरेतथाष्टत्वात् तमेवंधीरोवि
41 ज्ञायप्रज्ञांकुर्वीतब्राह्मणः नानुध्यायाद्बहूञ्छब्दान्वाचोविग्लापनंहितदिति हृदयग्रंथिः मि
थ्याज्ञानरागद्वेषादि तद्रहितोभवत्यच्छिन्नसंशयः सनक्षीणकल्मषोयस्तस्यहृदयेपरमा
त्मप्रकाशात्इत्यर्थः दृष्टइतिनिमित्तसप्तमीतद्दर्शनार्थमित्यर्थः यद्वायथाश्रुतएवार्थः
यथानद्यःस्वनामरूपाभ्यांविनिर्मुक्ताःसमुद्रंप्राप्यतदात्मनातिष्ठंतितथाविद्वानपिस्वाविद्या
कृतब्रह्मनामरूपकारणादविद्यातोविमुक्तःपरात्मात्कृताख्यादज्ञानात्परंअक्षरशब्दार्थं
पुरुषंपूर्णंदिव्यमविदुविद्वानुमात्मत्वेनाजानीतिमुक्तोभवत्यत्ववाक्यार्थः यदाज्ञानाद्व
स्थायामस्यविदुषोहृदिस्थिताः कामादयस्तन्मूलाविद्याचनिवर्तंतेपुनर्जन्मसंपादककर्मा
भावावस्थायांतु अथेति धीरोविवेकज्ञानीविवेकज्ञानमत्रपदार्थज्ञानं प्रज्ञां अभेदलक्ष
णवाक्यार्थज्ञानंवाक्यार्थज्ञानार्थत्वेनकर्मकांडवैमुख्यमस्मद्युक्तकार्यमित्याह नानुध्याया
दिति अनात्मार्थशास्त्राध्ययनफलमाह वाचइति वाचइत्येनतत्कंठताल्वादीनामप्यस्या
नामफलंक्षणंवागादिशोषणमेवबहुशास्त्रचिंतनफलमित्यर्थः तस्मात्युभ्याध्ययनंतप ४१
रंब्रह्म नानुमानमतद्धात् अनुमीयतइत्यनुमानंसांख्यपरिकल्पितंप्रधानंनयुभ्याध्याय

42A

तनेकस्मात् अतच्छब्दात् तस्य प्रधानस्यानुमानस्याशब्दत्वात् न सः अतच्छब्दः प्रधानप्रतिपाद
कशब्दस्याश्रवणादित्यर्थः प्रस्तुततद्विरोधिशब्दा एव यः सर्वज्ञः सर्वविदित्यादयो वर्त्तन्त इति भा
वः प्राणभृच्च प्राणभृज्जीवोपि न द्युभ्वाद्यायतनं अतच्छब्दादेव यद्यप्यात्मशब्दः साधारणः
तथापि जीवस्य सर्वज्ञत्वं द्युभ्वाद्यायतनत्वं चाजन्मानसंभवनीमात्मशब्दस्यातच्छब्दत्वमेव जी
वनिरासे हेत्वन्तरमाह भेदव्यपदेशात् न प्राणभृत्तभ्वाद्यायतनं कुतः भेदव्यपदेशात् त
मेवैकं जानथेति ज्ञातृज्ञेयभावेन भेदव्यपदेशादित्यर्थः जीवस्य मुमुक्षुत्वेन ज्ञातृत्वात्परिशेषा
त् तेयं द्युभ्वाद्यायतनं परं ब्रह्मेति तत्रैव हेत्वन्तरमाह प्रकरणाच्च कस्मिन्नु भगवो विज्ञाते सर्व
मिदं विज्ञातं भवतीत्युपक्रमात्परमात्मन एवेदं प्रकरणं न हि जीवज्ञानात्सर्वज्ञानं भवति त
स्मात्प्रकरणादपि न प्राणभृदित्यर्थः अपि च स्थित्यदनाभ्यां च न प्राणभृत् द्युभ्वाद्या
यतनं कुतः स्थित्यदनाभ्यां स्थितिश्चादनेन च ताभ्यामिति निर्यंचमीद्विवचने द्युभ्वाद्यायत
नं प्रकृत्य द्वा सुपर्णेति मन्त्रे जीवस्यादनं परमात्मनः स्थितिरिति हि निर्दिश्यते तयोरन्यः पिप्पलं
स्वाद्वत्त्यनश्नन्नन्योऽभिचाकशीतीत्यौदासीन्येन स्थितिर्निर्दिश्यते इदं च द्युभ्वाद्यायतन
स्य ब्रह्मत्वे घटनेनान्यथेति तस्मात् द्युभ्वाद्यायतनं परं ब्रह्मेति सिद्धं भूमा संप्रसादादध्यु
पदेशात् एवमात्मशब्दात् द्युभ्वाद्यायतनं ब्रह्मेत्युक्ते तद्वदुक्ते तरति शोकमात्मविदित्यत्र ब्रह्म

वे. सू. वृ. एवमात्मशब्दप्रयोगादित्याशयेनासंगमास्यारंभः पूर्वपक्षे प्राणोपास्तिः फलं सिद्धान्ते ब्रह्मप्राप्ति
४३ रिति एवमेव निर्विशेषवाक्यविचारे पूर्वपक्षे यस्य कस्यचिदुपास्तिः सिद्धान्ते ब्रह्मज्ञानमेवे
43 ति बोध्यं छान्दोग्ये श्रूयते श्रुतं ह्येव मे भगवद्दृशेभ्यस्तरति शोकमात्मविदिति सोहं भगवः शो
चामि तं मा भगवाञ्छोकस्य पारं तारयत्विति नारदेन पृष्टः सनत्कुमारो नामब्रह्मेत्युपदि
देश पुनर्नारदः अस्ति भगवो नाम्नो भूय इति पप्रच्छ तस्योत्तरं वाग्वाव नाम्नो भूयसीति त
या अस्ति भगवो वाचो भूय इति प्रश्ने मनो वाव वाचो भूय इत्युत्तरं एवं प्राणपर्यंतं भूयः प्रश्नोत्तरे
दृश्येते प्राणोपदेशानंतरं च प्रश्नाविनैवेदं श्रूयते एष तु वा अतिवदति यः सत्येनातिवदतीति
भूमात्वेव विजिज्ञासितव्य इति भूमानं भगवो विजिज्ञास इति यत्र नान्यत्पश्यति नान्यच्छृणोति ना
न्यद्विजानाति स भूमा अथ यत्रान्यत्पश्यत्यन्यच्छृणोत्यन्यद्विजानाति तदल्पमित्यादि अस्यार्थः
नाल्पे सुखमस्तीति भूमैव सुखं तस्मान्निरतिशयं सुखमिच्छता भूमैव विजिज्ञासितव्यः विशे
षेण ज्ञातुमेष्टव्यः इति सनत्कुमारेणोक्ते सम्यक् नारदस्तदुपशुश्रुत्स भगवन्भूमानमेव वि
शेषेण ज्ञातुमिच्छामीत्याह भूमानं भगव इति भूम्नो लक्षणमाह यत्रेति व्यवहारातीतं पूर्णं
सुखं भूमेत्यर्थः लक्षणव्यतिरेकमुखेन स्पष्टयितुं परिच्छिन्नलक्षणमाह अथेति एवं स्थि
ते संशयः किं प्राणो भूम उत परमात्मेति प्राणो वा आशाया भूयानिति पूर्वं प्राणस्य सन्निधो ४३

43A

नात्प्राणो भूमेति पूर्वः नच तरति शोकमात्मविदिति प्रश्नवाक्यस्यात्मोपक्रमेणात्मप्रकरणत्वात् त्रि
धेर्दुर्वलत्वमिति वाच्यं नाम ब्रह्मेत्युपास्त इति नामाद्यासनवाक्ये नामादेर्ब्रह्मण एवोपदेशो न प्रत्य
स्यात्मशब्दस्यापि नामादिपरत्वेनानात्मपरत्वादनात्मप्रकरणमिति हेतुः प्रश्नोत्तरयोः एकार्थत्व
नियमात् तस्मात्प्राणो भूमेति प्राप्ते क्रमः भूमा परमात्मैव कुतः संप्रसादादध्युपदेशात्॥
सम्यक्प्रसीदत्यस्मिन् जीव स्वस्वरूपमिति संप्रसादः सुषुप्त्यवस्थात्तस्यां चावस्थायां प्राणो जागर्ती
ति संप्रसादशब्देन प्राण उच्यते प्राणादूर्ध्वं भूम्नः उपदेशादित्यर्थः प्राणोपदेशानंतरं एष
तु वा अतिवदति यः सत्येनातिवदतीति तु शब्देन प्राणवादस्यानतिवादत्वमुक्त्वा सत्यशब्दवाच्य
परमात्मवादस्यातिवादत्वं ब्रुवन् भूमानमुपादिदेश अतो भूम्नः प्राणादूर्ध्वमुपदेशादिति गम्य
ते किंच तरति शोकमात्मविदिति सात्मप्रकरणात् भूमा परमात्मा नच प्रकरणासिद्धिः आ
त्मोपदेशार्थं नामाद्युपदेशेन नाम ब्रह्मेत्युपास्त इत्यादेश्च तरति शोकमात्मविदिति प्रश्नोत्तरस्य
सिद्धेः अतो भूमा परमात्मा नामादि प्राणांतमतीत्य सत्यशब्दवाच्यात्मोत्कृष्ट इति यो वदति
स एषोतिवादीत्यस्यार्थः धर्मोपपत्तेश्च किंच यत्र नान्यत्पश्यतीत्यादिना उक्तानां सर्वव्य
वहाराभावादिधर्माणां परमात्मन्येवोपपत्तेः परमात्मैव भूमा यत्र त्वस्य सर्वमात्मैवाभूत्तत्के
न कं पश्येदित्यादिश्रुत्यंतरे सर्वव्यवहाराभावात् परमात्मधर्मत्वेनावगतत्वात् यावभूमातत्व

स्वेनात्मसुखमस्तीति भूमैव सुखमिति दुःखसहितस्य सुखस्य निराकरणेन भूम्नः सुखत्वं दर्शितं ब्रह्मस्वध
र्मः एवं यो वै भूमा तदमृतमिति श्रूयमाणममृतत्वं ब्रह्मधर्मः अतोऽन्यदार्त्तमिति श्रुतेः आर्त्त
र्त्तिमहिनाशीतियावत् एवं स्वे महिम्नि प्रतिष्ठितत्व सर्वगतत्वं सर्वात्मकत्वं चेते धर्माः ब्र
ह्मण्येवोपपद्यन्ते तस्मात्प्राणो नोपास्यः किन्तु भूमा परमात्मा ज्ञेय इति सिद्धं अक्षरमम्बरान्त
धृतेः पूर्वं सत्यशब्दस्य ब्रह्मणि रूढत्वात् भूमा ब्रह्मेत्युक्तं तद्वदत्राप्यक्षरशब्दस्य वर्णप्र
सिद्धत्वाद्वर्णा एवाक्षरमस्त्विति दृष्टान्तसंगति ओंकाररूपोपास्तिः ब्रह्मज्ञानमित्युभयत्र फले बृ
हदारण्यके श्रूयते कस्मिन्नु खल्वाकाश ओतश्च प्रोतश्चेति स होवाचैतद्वै तदक्षरं गार्गि ब्राह्मणा अ
भिवदन्त्यस्थूलमनण्वित्यादि अस्यार्थः यदूर्ध्वं दिवो यदधस्तात्पृथिव्याः ये चोभे द्यावापृथिव्यौ
यदन्तरिक्षं यद्भूतं भवद्भविष्यच्च तत्सर्वं कस्मिन्नोतं प्रोतं चेति गार्ग्या प्रश्ने कृते याज्ञवल्क्येन ना
काशेन तत्सर्वमोतं प्रोतं चेति निरस्ते गार्गी पुनरपृच्छत् अत्राकाशोऽव्याकृताख्यः कस्मिन्नोतःप्रो
तश्चेन तिष्ठतीति याज्ञवल्क्यस्त्वाह हे गार्गि त्वया यत्पृष्टं आकाशस्याधिकरणं तदेतदक्षरं ॥
अस्थूलादिविशेषणकं ब्रह्मविदो वदन्तीति तत्र संशयः किमक्षरशब्देन वर्ण उच्यते उत ब्रह्मे
ति अक्षरसमाम्नायः इत्यादावक्षरशब्दस्य वर्णे प्रसिद्धत्वाद्वर्ण एवाक्षरशब्दवाच्य इति प्राप्ते
ब्रूमः अक्षरं ब्रह्मैव कुतः अम्बरान्तधृतेः पृथिव्यादेराकाशान्तस्य विकारजातस्य धारणादि।

44A

स्यर्थः विषयवाक्यार्थकथनसमयेंबरान्तधारणं प्रतिपादितं ननु अंबरान्तधृतिः प्रधानेपि सं
भवतीत्यत आह सा च प्रशासनात् सा च धृतिः परमेश्वरस्यैव कर्म नान्यस्याचेतनस्य कुतः
प्रशासनात् एतस्य वा अक्षरस्य प्रशासने गार्गि सूर्याचंद्रमसौ विधृतौ तिष्ठत इत्यादिना प्रशासन
श्रवणादित्यर्थः प्रशासनं नाम आज्ञा सा च चेतनस्यैव नाचेतनस्य प्रधानस्येति तस्माद
क्षरं ब्रह्म अन्यभावव्यावृत्तेश्च इतश्च परमात्मैवाक्षरशब्दवाच्यः तस्यैवेश्वरस्य प्रशास
नं कर्म कुतः अन्यभावव्यावृत्ते अन्यस्य प्रधानादेर्भावो धर्मोन्यभावः तस्या वृत्तेः तद्विप
रीतधर्मश्रवणादित्यर्थः तद्वा एतदक्षरं गार्गि अदृष्टं द्रष्टृ अश्रुतं श्रोत्रऽमतं मंत्रऽविज्ञातं
विज्ञात्रिति द्रष्टृत्वादयो नाचेतनस्य भवति तस्माद् द्रष्टृत्वादिसमानाधिकरणप्रशासनत्वा
न्परमात्मैवाक्षरं नान्यदतोस्ति द्रष्टृ नान्यदतोऽस्ति श्रोतृ नान्यदतोस्ति मन्तृ नान्यदतोऽस्ति
विज्ञात्रिति द्रष्टाद्यन्तरनिषेधाच्च न जीवोप्यक्षरमिति तस्मादक्षरं ब्रह्म ज्ञेयमिति सिद्धं ईक्षति
कर्मव्यपदेशात्सः पूर्वमोंकारस्य पूर्वपदत्वेन बुद्धेः सान्निध्यात्तस्मिन्नोंकारे ध्यातव्यमिति नि
रूप्यत इति बुद्धिसान्निध्यसंगतिः यद्वा पूर्वमक्षरशब्दस्य वर्णे रूढस्यापि जगद्धृतिलक्षण
लिंगेन ब्रह्मणि नयतीति ब्रुवतस्तस्याश्चलनादनादितो अपि नादयोगवृत्तिराश्रिता तद्व
दिहापि देशपरिच्छिन्नफलश्रुतिलिंगेन परशब्दस्यापेक्षिकपरत्वविशिष्टहिरण्यगर्भे वृत्तिरस्ति

वे॰सू॰टी॰
४५
45

तिदृष्टांतसंगतिः कार्यब्रह्मणः उपास्तिः पूर्वपक्षेफलं सिद्धांते परब्रह्मोपास्तिरिति भेदः अथ
वेणश्रूयते एतद्वैसत्यकामपरंचापरंचब्रह्म यदोंकारस्तस्माद्विद्वानेतेनैवायतनेनैकतरम
न्वेतीतिप्रकृत्य यः पुनरेतंत्रिमात्रेणोमित्येतेनैवाक्षरेणपरंपुरुषमभिध्यायीतेत्यादि अस्यार्थः
पिप्पलादेनोमस्याचार्यः सत्यकामेनपृष्टोव्याचष्टे हे सत्यकामपरंनिर्विशेषंअपरंचकार्यब्र
ह्मयत्तत्तदेतदेवयोयमोंकारः सहिप्रतिमेवविष्णोस्तस्यप्रतीकः तस्मादेवंब्रह्मात्मनाविद्वा
नेनेनोंकारध्यानेनायतनेनप्राप्तिसाधनेनपरापरयोरेकतरमन्वेति यथाध्यानंएकमात्रंद्वि
मात्रंवाहिरण्यगर्भोपास्तिंकुर्यादिति दर्शयित्वाब्रवीति यः पुनरोमित्येतदक्षरंत्रिमात्रेणेतितृती
यियाविनेया ब्रह्मोंकाराभेदोपक्रमात् तथाविधमक्षरमर्थात् स्वयंपरंध्यायीतेति सः उपा
सकः सूर्येप्राप्तः सामभिः ब्रह्मलोकेप्रणीनीयतइति अत्रसंशयः किमपरंब्रह्मध्यातव्य
मुपदिश्यते किंवापरंब्रह्मेति अपरमितिप्राप्तेब्रूमः सः ध्यातव्यः परमात्मैव कुतः ईक्षतिक
र्मव्यपदेशात् वाक्यशेषेध्यातव्यस्येक्षतिकर्मत्वेनव्यपदेशादित्यर्थः सएतस्माज्जीवघनात्प
रात्परंपुरिशयंपुरुषमीक्षतइति सध्यात जीवघनशब्देनब्रह्मलोकउच्यते सकलजीवा
भिमानीहिरण्यगर्भीयरूपत्वात् तथाच ब्रह्मलोकाल्लोकांतरापेक्षयापरात्परंपुरुषंपरमा ४५
त्मानमीक्षतेसाक्षात्करोतीत्यर्थः ईक्षतिपदार्थस्यदर्शनस्यलोकेयथाविषयत्वकत्वाद्यपार्थ

स्वरूपपरमात्मैवेक्षतिकर्मेति तत्समानविषयकध्यानस्यापि परमात्मैव विषयः ध्यानेक्षणयोः एकवि
45A षयत्वनियमात् यथा पादोदरस्त्वचा निर्मुच्यते एवं ह वै स पाप्मना विनिर्मुक्त इति पापविनिर्मोक
फलवचनेन परमात्मानं ध्येयं सूचयति पादोदरः सर्पः तस्मात्त्रिमात्रमन्त्रार्थः सोंकारे ध्यातव्यः परमा
त्मेति सिद्धं दहर उत्तरेभ्यः दहरं परमपुरुषशब्दस्य ब्रह्मणि रूढत्वात् ब्रह्मोपास्यमित्युक्तं भवति न
हृदिस्थापि आकाशशब्दस्य भूताकाशे रूढत्वात् स एवोपास्यत्वमर्हतीति दृष्टान्तसंगतिः पूर्वपक्षे आ
काशस्योपास्तिः फले सिद्धान्ते परोपास्तिद्वारा प्रमितिरिति छान्दोग्ये भूमविद्यानन्तरं श्रूयते अथ य
दिदमस्मिन्ब्रह्मपुरे दहरं पुण्डरीकं वेश्म दहरोऽस्मिन्नन्तराकाशस्तस्मिन्यदन्तस्तदन्वेष्टव्यं तद्वाव वि
जिज्ञासितव्यमित्यादि अस्यार्थः विद्यान्तरारंभार्थोऽथशब्दः यदिदमिति प्रसिद्धं हृदयं परामृश्य अ
स्मिन्निति प्रत्यक्षत्वोक्तिः ब्रह्मपुरं शरीरं तस्मिन्दहरं स्वल्पं पुण्डरीकं तदाकारत्वात् हृदयस्य वे
श्मत्वं संपादयति दहर इति दहरः स्वल्पः अस्मिन्हृदयेऽन्तराकाशः परमात्मा सदा तिष्ठतीत्यर्थः
तस्मिन्हृदये व्यवहितत्वेपि योग्यत्वात्तच्छब्देन हृदयपरामर्शः तत् आकाशाख्यं ब्रह्म अन्वेष्टव्यं
विजिज्ञासितव्यं श्रेयमिति अत्र दहरपुण्डरीकेपि दहराकाशः अतः स किं भूताकाश आहोस्वित्पर
मात्मेति संशये प्रसिद्धिबलात् भूताकाश इति प्राप्ते यद्वा ब्रह्मपुरशब्देन शरीरमभिदधता तत्स्वामि
जीवोपस्थितेः जीवो दहर इति प्राप्ते ब्रूमः दहराकाशः परमात्मैव कस्मात् उत्तरेभ्यः वाक्यशे

वे.सू.वृ.
४६
46

ष्योपगतेभ्योदहेतुभ्यः तथाहि जिज्ञास्यत्वेनाभिहितस्य दहरस्याकाशस्य तेचेद्ब्रूयुरित्युपक्रम्य किं
तदत्र विद्यते यदन्वेष्टव्यं यद्वाव विजिज्ञासितव्यमित्याक्षेपपूर्वकं समाधानवाक्ये स ब्रूयाद्यावान्वा
अयमाकाशस्तावानेषोन्तर्हृदय आकाश उभे अस्मिन् द्यावापृथिवी अन्तरेव समाहिते इत्यादिक
माकाशोपमानत्वं द्यावापृथिव्यधिष्ठानत्वं दर्शयति अयमर्थस्तु तमाचार्यं ते शिष्या ब्रूयुः किमिति
ब्रूयुः किं तदिति हृदयपुंडरीकमेव तावदल्पं तस्मिन्विद्यमानाकाशोल्पतराद्यल्पो पुंडरीके किम।
स्ति यच्छ्रुतियुक्तिभ्यामन्वेष्टव्यं यद्वावसाक्षात्कर्तव्यमित्यल्पतादोषेणादहरस्याज्ञेयत्वमाक्षिप्तं शिष्यैः त
त्र समाधानं स ब्रूयादिति सः आचार्यः ब्रूयात् किमिति यावानिति अस्मिन्निति दहराकाशोक्तिः अ
ल्पत्वदोषस्याकाशोपमानेन निराकृतः तथा च द्यावापृथिव्याद्यधिष्ठानं आकाशोपमितं दहराका
शं ब्रह्मैव एवं एष आत्मापहतपाप्मा विजरो विमृत्युर्विशोको विजिघत्सोपिपासः सत्यकामः
सत्यसंकल्प इति च आत्मत्वापहतपाप्मत्वादयो गुणाः न भूताकाशे जीवे च संभवति जीवे आत्म
त्वसंभवेप्युत्तरगुणानामसंभवो बोध्यः विमृत्युः मरणरहितः विजिघत्सः विगता विजिघत्सा
अत्तुमिच्छा यस्य सः विजिघत्सः तथा तद्यथेह कर्मजितो लोकः क्षीयते एवमेवामुत्र पुण्यजितो लो
कः क्षीयते इति कर्मणामन्तवत्फलत्वमुक्त्वा अथ य इहात्मानमनुविद्य व्रजन्त्येतांश्च सत्यान्का
मांस्तेषां सर्वेषु लोकेषु कामचारो भवतीति प्रकृतदहराकाशविज्ञानस्यानन्तफलवत्त्वं वदन् पर

शि ४६

46A

मात्मत्वमस्य सूचयति सत्यान्कामांश्चेति चकारात्तेषामप्युपास्यत्वमुक्तं तथा च सत्यकामादि
गुणकमात्मानमनुविद्यानुभूय ये परलोकं व्रजन्ति तेषां सर्वेषु लोकेषु कामचारः स्वेच्छया संचर
णं अप्रतिहतमनन्तमैश्वर्यं भवतीत्यर्थः तस्मादेतेभ्य उत्तरेभ्यो हेतुभ्यो दहर आकाशः परमात्मा
गतिशब्दाभ्यां तथा हि दृष्टं लिंगं च उत्तरेभ्यः इत्यस्य प्रपंचो यं किं च इमाः प्रजाः अहरहर्गच्छन्त्य एतं
ब्रह्मलोकं न विंदंतीति दहराकाशप्रकृतपरमेश्वरं ब्रह्मलोकशब्देनाभिधाय प्रजाशब्दवाच्या।
नां जीवानां ब्रह्मसदनं तद्विषया निरुच्यमाना गतिर्दहराकाशस्य ब्रह्मतां गमयति गतिर्ब्रह्म
लोकशब्दं चाभिप्रेत्य गतिशब्दाभ्यामित्युक्तं सूत्रकारैः प्रत्यहं सुषुप्त्यवस्थायां जीवस्य ब्रह्मगमनं॥
तथा हि दृष्टं श्रुत्यन्तरे सता सोम्य तदा संपन्नो भवतीत्यादौ तथा च दहराकाशगमनं ब्रह्मगमन
मेवेति दृष्टीकृतं तथा हि दृष्टमित्यनेन प्रत्यहं हिरण्यगर्भब्रह्मलोकगमनासंभवात् ब्रह्मै
व लोक इति कर्मधारयसमास एव ग्राह्य इत्यस्मिन्नर्थे अहरहर्गमनमेव लिंगमित्यनेनोक्तं च
शब्देन निषादस्थपतिन्यायोऽपि कर्मधारयग्रहणे न सूचितः धृतेश्च महिम्नोऽस्यास्मिन्नुपल
ब्धेः धृतेरपि हेतोः परमेश्वर एव दहराकाशः अनतिक्रान्तप्रकरणे दहराकाशं निर्दिश्य ति
॥अथ य आत्मा स सेतुर्विधृतिरेषां लोकानामसंभेदायेति विधृतिरिति तं तत्त्वाद्विधारक उच्य
ते सेतुशब्देन वर्णाश्रमाद्यसंकरहेतुत्वमुच्यते न हि सर्वलोकविधारकत्वं ब्रह्मणोऽन्यस्य संभ

वे॰ सू॰ वृ॰ ४७ वति अस्य च विधारणलक्षणम् हिम्नो ऽस्मिन् परमात्मन्य् अन्यत्राधिष्ठानंतरे उपलब्धेः परमात्मलिंगत्व
मेव एतस्य वा अक्षरस्य प्रशासने गार्गि सूर्याचंद्रमसौ विधृतौ तिष्ठत इति तथा एष सर्वेश्वर एष
भूताधिपतिरेष भूतपाल एष सेतुर्विधरण एषां लोकानाम् असंभेदायेति प्रसिद्धेश्च दहराकाश
47 शब्दोपि परमात्मन्येव प्रसिद्धः न जीवेष्वाकाशो ह वै नाम नामरूपयोर्निर्वहिता सर्वाणि ह वा इमा
नि भूतान्याकाशादेव समुत्पद्यंत इत्यादि दर्शनात् यद्यप्याकाशशब्दस्य भूताकाशेपि प्रसिद्धि
रस्ति तथापि यावान्वा अयमाकाशः तावानेषोन्तर्हृदय आकाश इति तस्योपमानत्वेन ग्रहणान्नो
पमेयं दहराकाशत्वं संभवतीति दहराकाशः परमेश्वर एव इतरपरामर्शात् स इति चेन्नासंभवा
त् ननु य एष संप्रसादोस्माच्छरीरात् समुत्थाय परं ज्योतिरुपसंपद्य स्वेन रूपेणाभिनिष्पद्यत एष
आत्मेति होवाचेति संप्रसादशब्देन इतरस्य जीवस्याप्यस्मिन् प्रकरणे परामर्शात् स जीवो दहरा
काशोस्त्विति चेत् न असंभवात् जीवेष्वाकाशोपमेयत्वापहतपाप्मत्वादीनाम् असंभवादि
त्यर्थः अत्र यस्तु य एष इति सर्वनामभ्यां विहानुक्तः तमेव सहसा सर्वकालुष्यनिर्मुक्तं वक्ति सं
प्रसाद इति संप्रसादशब्देन सुषुप्त्यवस्थावाचकेनावस्थावानुच्यते अस्मात् अभिमानद्वयविषया
त् समुत्थाय विविक्तमात्मानं ज्ञात्वा अविवेकज्ञानं चात्र श्रवणमनननिदिध्यासनानि तत्फलमाह ४६
अभिनिष्पद्यत इति अभिनिष्पत्तिः साक्षात्कारः अस्य फलमाह परमिति उपसंपद्य निष्पद्य शि॰

तदेतेनात्मसुखं व्याददीयस्वपितीति वतद्दृष्टं ज्योतिः पादरूपसूर्यादिपरत्वभ्रमं वारयति एवमुक्तिं
47A गुहारिति शेषः उत्तराच्चेदाविर्भूतस्वरूपस्तु तत्वपहतपाप्मत्वादीनामसंभवान्न जीवो दहराका
श इत्यस्य संगतं प्रतिबले न जीवस्याप्यपहतपाप्मत्वादिसंभवान्नथा इति दहरविद्याया उपरि प्रजाप
तिविद्यायां य एषोऽक्षिणि पुरुषो दृश्यते एष आत्मेति होवाचेति जाग्रत्स्वप्नावस्थापन्नं द्रष्टारं जीव
मुपक्रम्य एतं त्वेव ते भूयोऽनुव्याख्यास्यामीति जीवमेव परामृश्य य एष स्वप्ने महीयमानश्चरत्येष आ
त्मेति तद्यत्रैतत्सुप्तः समस्तः संप्रसन्नः स्वप्नं न विजानातीत्येष आत्मेति स्वप्नावस्थात्रयविशिष्टं जीव
मेव प्रतिपाद्य तस्यैव जीवस्यापहतपाप्मत्वादि दर्शयति एतदमृतमभयमेतद्ब्रह्मेति नाह खल्व
यमेवं संप्रत्यात्मानं जानात्ययमहमस्मीति नो एवेमानि भूतानीति सुषुप्त्यवस्थायां दोषो
दोषमुपलभ्य पुनः प्रजापतिरेतं त्वेव ते भूयोऽनुव्याख्यास्यामीति एवान्यत्र एतस्मादित्युपक्रम्य श
रीरनिन्दापूर्वकमेष संप्रसादोऽस्माच्छरीरात्समुत्थाय परं ज्योतिरुपसंपद्य स्वेन रूपेणाभिनिष्पद्यते स
उत्तमः पुरुष इति जीवमेव शरीरात्समुत्थितं पुरुषं दर्शयति तस्मादपहतपाप्मत्वादीनां प्रति
बलाज्जीवे संभवा जीवो दहराकाश इत्युत्तराच्चेदिति सूत्रावयवार्थः उत्तरात् य एषोऽक्षिणीत्या
दिवाक्यात् अत्यर्थस्तु इन्द्रविरोचनौ खलु सुरासुरराजानौ आत्मानं विविदिषन्तौ समित्पाणी प्र
जापतिं जग्मतुः द्वात्रिंशद्वर्षाणि ब्रह्मचर्यमूषतुः अथैतौ प्रजापतिरुवाच किंकामावि

वे.सू.वृ.
४८
48

दृष्ट्याववामितितावूचतुः य आत्मापहतपाप्मा तमावां विविदिषावइति ततः प्रजापतिरुवाच य
मे य एषोक्षिणीति जाग्रदवस्थायामक्षिस्थानः सत्यो दृष्टपते पाप्मनः स आत्मापहतपाप्मेत्यु
वाच य एवापहतपाप्मत्वादिगुण एतदमृतमभयमेतद्ब्रह्मेति एतच्छ्रुत्वा तौ अप्रक्षीणकल्मष
तया ग्रहितानि छायापुरुषमात्मत्वेन गृहीत्वा पुनः प्रजापतिं पप्रच्छतुः अथ योयं भगवोप्स्वाद
र्शे विज्ञादौ च दृश्यते कतम एतेषु सो अयं वा सर्वेष्वेतेषु एवेति तमेवं पृष्टं श्रुत्वा प्रजापतिरेतौ भ्रान्तौ
विति ज्ञात्वा यदि वयं प्रवोध्यान्तौ स्यइति ब्रूमः तदा दोषेन मत्येन तत्वं न गृहीयातामित्यनयोराशायमन
रुध्य प्रत्युवाच उदशरावे आत्मानमीक्ष्यैथां तत्र यत् दृश्यते तन्मां प्रतिब्रूतमिति तौ दृष्ट्वा से न दृष्ट
हृदयौ नो हृतौ अथ प्रजापतिरेतौ विपरीतग्राहिणौ माभूतामित्याशयवान् पप्रच्छ किमत्रापश्य
तमिति तौ होचतुः नखलोमादिमन्तं प्रतिबिम्बं पुरुषमुदशरावे अपश्यावेति उत्पत्तिनाशवत्वा
द्यथा शरीरमात्मा न भवति एवं छायापुरुषोऽपि नात्मेत्येवं तौ जानीयातामित्याशयवान् प्रजाप
तिरुवाच साधु अलंकृतौ सुवसनौ परिष्कृतौ भूत्वा पुनरुदशरावे पश्यतं तमात्मानमिति तौ साध्वलं
कृतौ सुवसनौ छिन्ननखलोमानौ भूत्वा तथैव चक्रतुः पुनः प्रजापतिना पृष्टौ तमेव छायात्मा
नमूचतुः तदुपश्रुत्य प्रजापतिर्वं ताहोअयावधिभ्रमोनष्टांतौ नपोरितिमत्वा तत्तत्वं कथयामित्याव
ताकालेन कल्मषक्षये अस्मदवाक्यसंदर्भपर्यालोचनया तत्वं प्रतिपत्स्येते स्वयमेवेत्युवाच ४८

48A

यत्रात्मापहतपाप्मा यतदमृतदमृतमभयमेतत् ब्रह्मेति तयोर्मध्ये विरोचनो देहानुसारि(त्वा)छायायाः देह
एवात्मा तत्वमिति मत्वा स्वगृहमाययौ तथैवासुरानुपदिदेशः इंद्रस्तु स्वगृहमागच्छन्मार्ग एव छायाः
त्मनो नित्यत्वादि दोषं चिंतयित्वा पुनः समित्पाणिः सन्प्रजापतिसमीपमागत्य तेन पृष्टः सन्मार्ग
चिंतितं तदुवाच प्रजापतिस्तु हे इंद्र त्वं कल्मषहतपाप पुनर्द्वात्रिंशतं वर्षाणि ब्रह्मचर्यं चर अथप्रवी।
णकल्मषाय ते अहमेतमात्मानं भूयोनुव्याख्यास्यामीत्यवोचत् स च तथाचरितब्रह्मचर्यः प्रजा
पतिमुपससाद उपसत्त्वाय इंद्राय प्रजापतिर्व्याचष्टे योऽक्षिणि पुरुषो दर्शितः प्रथमपर्याये सोऽयमेव
स्वप्ने वासनामयैर्वनितादिभिर्विषयैर्महीयमानः सेव्यमानः अनेकविधानभोगान्भुंजानो विह
रतीत्यावत् इदं श्रुत्वा देवेंद्रः शोकभयादिविविधबाधानुभवात् स्वप्ने किंचिद्दलीमुवाच एवमुक्त
वति मघवति प्रजापतिः पुनर्द्वात्रिंशतं वर्षाणि ब्रह्मचर्यं चर अथाप्यप्रवीणकल्मषासीत्युवाच।
चरित्वा आगताय इंद्राय प्रजापतिर्व्याचष्टे योपमाच द्वितीयपर्याययोरक्षिणि स्वप्ने चात्मा दर्शितः॥
स एव सुषुप्त्यवस्थायां प्रकाशत इत्याह तद्यत्रैतत्सुप्त इति तदेतदिति संवेद्यः यत्र यस्यां सुषुप्त्य
वस्थायामेतत्स्वप्नं यथा स्यात्तथा सुप्तस्तस्यामवस्थायामुपसंहृतकरणग्रामः समस्तः करण
व्यापारकृतकालुष्यहीनः संप्रसन्नः स्वप्नमलानमात्रतथाविलापयन्मुक्ताश्चावृतः स्वप्नप्रयु
क्तैर्जसत्वं विज्ञाय प्राप्तो [illegible] ज्ञानक्रियां विना स्वरूपचैतन्येनाज्ञानसाक्षी साक्षस्य देहादेः संज्ञा

४९ स्मृतिनाशात्मेत्यर्थः इदंस्मृत्वापुनरिंद्रोनकिंचिदत्रत्रायतइत्याह नाहेति अहेतिनिपातः खेदार्थे विद्यमा
नोहिंद्र उवाच अयंसन्नः पुरुषः अयमहमस्मीत्येवंनात्मानमस्यामवस्थायांजानाति इमानिभूता
49 निनोएवजानातिविनाशमेवप्राप्तोभवतिनाहमत्रभोग्यंपश्यामीत्येवंदोषंदृष्ट्वापुनःप्रजापतिमु
पसमाद उपसन्नंपुनरुवाचवसापराण्यपितेकल्मषक्षयोनाभवत्तदर्थं पुनःपंचवर्षाणिब्रह्मचर्यं
चरेति तदेवमेकोत्तरशतंब्रह्मचर्यंचचरतेसहस्राक्षायब्रह्मचर्यसंपन्नदलितकषायप्रजापतिर्व्या
चष्टेयोयमाद्यद्वितीयतृतीयपर्यायेषुअक्षिणिस्वप्नेसुषुप्तौचानुसृतोपहतपाप्मत्वादिगुणोदर्शि
तः तमेवभूयोनुव्याख्यास्यामीति तस्मादन्यमित्युपक्रम्यतुरीयेमघवन्मर्त्यंवाइदंशरीरमित्यादिना
शरीरंनिंदित्वातस्मात्समुत्थितंजीवमेवोत्तमपुरुषंदर्शयतिप्रजापतिः परात्संप्रसादोऽस्मादित्या
दिनातस्मादपहतपाप्मत्वादीनांजीवेसंभवाज्जीवएवदहराकाशइतिप्राप्तेब्रूमः आविर्भूतस्व
रूपस्तु तुशब्देनपूर्वपक्षव्यावृत्तिः उत्तरात्प्रजापतिवाक्यादपिनजीवाशंकायुक्तेत्यर्थः यत
आविर्भूतस्वरूपोत्रजीवोविवक्षितः नतुजीवत्वेनरूपेण परंज्योतिरुपसंपद्यस्वेनरूपेणाभि
निष्पद्यतइत्युपसंहारदर्शनात् यदपहतपाप्मत्वादिभिःप्रतिपाद्यंब्रह्मतदेवजीवस्यपारमा ४९
र्थिकंस्वरूपंनतुजीवत्व तयाचआविर्भूतस्वरूपस्यजीवस्यब्रह्मत्वेनापहतपाप्मत्वादिकमुपप
द्यते नतुजीवत्वेनरूपेणेतिनासंभवादितिपूर्वसूत्रस्यहेतुर्नासिद्ध इतिभावः नतुदहराकाश

49A सेश्वरत्वे ऽथ य एष संप्रसाद इत्यादिना जीवपरामर्शोऽर्थः स्यादित्यत उत्तरं पठति अन्यार्थश्च परा
मर्शः अन्यार्थोऽयं जीवपरामर्शः न जीवप्रतिपादनाय परं ज्योतिरुपसंपद्य स्वेन रूपेणाभिनिष्पद्य
त इत्युपसंपत्तव्यपरमात्मपर एवायं जीवपरामर्शः जीवो यमुपसंपत्तव्यत्वेन हि परमात्मोपदिश्यते स
चोपदेशो जीवपरामर्शं विना न संभवतीति तदर्थं जीवपरामर्शो न जीवप्रतिपादनार्थमिति अ।
ल्पश्रुतेरिति चेत् दुक्तं न तु दहरोऽस्मिन्नन्तराकाश इत्याकाशस्याल्पत्वश्रवणात्तत्र परमात्मत्वे किं त्वारा
ग्रमात्रं जीवत्वं युक्तमिति चेत् तत्र समाधानमुक्तं अर्भकौकस्त्वात्तद्व्यपदेशाच्चेत्यत्र उपासनार्थमौपा
धिकमल्पत्वं परमेश्वरेऽप्यविरुद्धमित्यर्थः तस्माद्दहराकाशः परमात्मैवोपास्य इति सिद्धं अनुकृ
तेस्तस्य च पूर्वं परं ज्योतिरुपसंपद्येति वाक्यार्थविचारप्रसंगात् तच्छुभ्रं ज्योतिषां ज्योतिरिति वाक्योक्त
परंज्योतिष्ट्वसाधकं न तत्रेति वाक्यं विचार्यत इति प्रसंगसंगतिरस्याधिकरणस्य यद्वा पूर्वत्रात्मश्रु।
त्याघटरोधादाकाशशब्दस्य रूढित्यागेनेश्वरे वृत्तिरुक्ता तथेहापि तत्रेत्यनिसन्नमात्र तत्रेशब्दो वा।
च्यस्य तेजोनिराभिभावकत्वप्रतीत्यनुरोधात् भातीत्यस्य वर्तमानार्थत्यागेन यस्मिन्सति सूर्यादिकं न
भास्यतीति स तेजोधातुरूपास्यतेनोच्यत इति पूर्वपक्षोऽयमतादृष्टान्तसंगतिः पूर्वपक्षे अलौकिकतेजः
उपास्तिफलं सिद्धान्ते निर्विशेषब्रह्मसिद्धिरिति भेदः मुंडकोपनिषदि श्रूयते न तत्र सूर्यो भाति
न चंद्रतारकं नेमा विद्युतो भांति कुतोऽयमग्निः तमेव भांतमनुभाति सर्वं तस्य भासा सर्वमिदं विभाति

तिसिद्धांते तत्रेति विषयसप्तमी तथा च तत्र तस्मिन्ब्रह्मणि विषये सूर्यादयो न भासकत्वेन भासंते य
५० था घटादौ विषये आलोकादिकं भासकत्वेन भासते तद्वत् अस्य तेजसो वह्नेः फलितमभिप्रेत्य वैषम्
50 तिकन्यायमाह कुतइति इतश्च सूर्यादेर्न ब्रह्मणि भासकत्वमित्याह तमेवेति यथा सूर्यादिप्रकाश्यो
घटादिर्न सूर्यादिप्रकाशकः एवं ब्रह्मप्रकाश्यः सूर्यादिर्न ब्रह्मप्रकाशक इत्यर्थः ननु यथा गुरौ गच्छ
ति शिष्यस्यानुगमनं स्वनिष्ठगमनेन कृतं एवं सूर्यादेः स्वनिष्ठभानकृतमनुभानं किं न स्यात् तत्राह त
स्येति यथायः पिंडस्य दाहक्रिया वह्निनिष्ठैव तथा सूर्यादेर्भानं ब्रह्मनिष्ठमेव न तद्यकभानमित्यर्थः॥
अत्र केचित् सूर्यादिजगद्भासकत्वेन प्रतीयमानं तेजोविशेषो वा ब्रह्मैवेति तेजस एव प्रकाशकत्वप्र
सिद्धेः प्रबलेन तेजसा दुर्बलस्याभिभवदर्शनाच्च तेजोविशेष एवेति प्राप्ते ब्रूमः अत्र तथा प्रतीयमा
नं ब्रह्मैव कुतः अनुकृतेः अनुकृतिरनुकरणं यत्तमेव भांतमनुभाति सर्वमित्यनुभानं तदनुकृति
शब्देनोच्यते न हि तेजस्तेजोंतरे भासमाने भासते तस्मात्स्वप्रकाशतया भासमाने चैतन्यमनु सर्वं
सूर्यादि भासत इति युक्तं सूत्रे तस्य चेत्यनेन उदाहृतवाक्ये चतुर्थचरणोभिप्रेतः तस्य भासा सर्वमि
दं विभातीति सर्वभासकत्वं तेजोंतरस्याप्रसिद्धं विरुद्धं च भासमानस्य तेजसस्तेजोंतराभिभाकत्वेन भा
सकत्वाभावात् ब्रह्मण्युपपन्नं तद्देवा ज्योतिषां ज्योतिरित्यादौ प्रसिद्धं च न तत्रेति तच्छुभ्रेन च॥
हिरण्मये परे कोशे विरजं ब्रह्म निष्कलं तच्छुभ्रं ज्योतिषां ज्योतिस्तद्यदात्मविदो विदुरिति प्रकृतब्रह्म ए. ५०

50.A ग्रहणमेवयुक्तमिति अत्रार्थस्तु हिरण्मये ज्योतिर्मये आनंदमय इत्यर्थः तस्मिन्नन्नमयाद्यपेक्षयाप
रेकोशे ब्रह्मपुच्छं प्रतिष्ठेति यत्प्रतिष्ठाभूतं ब्रह्म तत्स्तुतिष्ठितं तत्तच्च विरजं आगंतुकमलशून्यं निष्कलं नि
रवयवं शुभ्रं नैसर्गिकदोषशून्यं ज्योतिषां सूर्यादीनां ज्योतिरवभासकं तच्च विदुषामनुभवसिद्धं इति
अपि च स्मर्यते अपि च ब्रह्मणः सूर्याद्यप्रकाश्यत्वे तत्प्रकाशकत्वे च भगवद्गीतासु स्मर्यते न तद्भास
यते सूर्यो न शशांको न पावकः यद्गत्वा न निवर्त्तन्ते तद्धाम परमं मम यदादित्यगतं तेजो जगद्भासयते
ऽखिलं यच्चन्द्रमसि यच्चाग्नौ तत्तेजो विद्धि मामकमिति तस्मादनन्यप्रकाश्यः सर्वजगद्भासकः परमा
त्मात्रेय इति सिद्धं। शब्दादेव प्रमितः पूर्वं ज्ञानुमानादिना लिंगेन तत्रेनिविषसत्रमीकृतानभानीत्यादौ णि
जऽध्याहारेण न भासयतीत्यर्थो वर्णितो भवति भासकत्वेन न भाति सूर्योदय इत्यर्थकथनात् तथेहा
पि अंगुष्ठमात्र इति परिमाणलिंगाज्जीवमादाय ईशानो भूतभव्यस्येति स्मरयेदिति विध्यध्याहारेणोपास्तिपर
मंगुष्ठवाक्यमस्त्विति दृष्टांतसंगतिः पूर्वपक्षे उपास्तिफलं सिद्धांते अभेदप्रमितिः फलं कठवल्ली
षु पठ्यते अंगुष्ठमात्रः पुरुषो मध्य आत्मनि तिष्ठतीति तथा अंगुष्ठमात्रः पुरुषो ज्योतिरिवाऽ
धूमकः ईशानो भूतभव्यस्य स एवाद्य स उ श्वः एतद्वै तदिति च अस्यार्थः स्वाभाविकं परिच्छेदं वारय
ति पुरुष इति पूर्णत्वेन सर्वत्रोपलभ्यमान इत्यर्थः तर्हि कथमंगुष्ठमात्रत्वमित्याशंक्याभिव्यक्तिस्था
नद्वारा तदाह मध्य इति आत्मनि देहमध्ये हृदयसद्मनीत्यर्थः जीवभावमापन्नस्य ब्रह्मण इदम

गुष्ठमात्रत्वसमर्थनमितिबोध्यं ईशानोभूतभव्यस्येत्यादिना त्वंपदवाच्यांगुष्ठमात्रजीवानुवादेनाभेद
५१ बोधनादिति तस्यैवपरमात्मत्ववादिवाक्यांतरमुदाहरति तथेति अधूमकमितिलिंगव्यत्ययः ज्योतिः
51 परत्वात् यथाऽधूमकंज्योतिरकलुषितमेकरूपंप्रकाशमात्रंदृष्टं तथाऽयमपिवस्तुतः कूटस्थ।
प्रकाशयात्मेत्यर्थः बोधितत्वमर्थस्य तदर्थतामाह ईशानइति भूतभव्यग्रहणंभवतोपि।
प्रदर्शनार्थं अद्वितीयत्वमाह सएवेति अद्यवर्त्तमानकालेसएवास्ति श्वः भविष्यत्कालेसएवभ
विताअतीतकालेसएवासीत् तयन्नचिकेतसापृष्टं अन्यत्रधर्मादित्यादिना तदेवाद्वितीयंब्रह्मेति अत्र
संशयः किमिदमंगुष्ठवाक्यंजीवमुपब्रह्मपरमिति तत्रांगुष्ठपरिमाणस्य ब्रह्मण्यसंभवाज्जीवपर
मिदंवाक्यमितिप्राप्तेब्रूमः प्रत्यगभिन्नः परमात्मावाक्यप्रतिपाद्यः प्रमितः कस्मात् शब्दादेव ईशानो
भूतभव्यस्येशानशब्दात् नहिजीवेईशानशब्दः अंजसः नचांगुष्ठपरिमाणलिंगाज्जीवः प्रतिपा
द्य इतियुक्तं लिंगश्रुत्योर्विरोधेश्रुतेः प्रबलत्वात् एतेन्सूचनार्थमेवकारः ननुवाक्यस्यपरमात्मवे
कथमंगुष्ठमात्रत्वस्योपपत्तिरितिचेत् कात्रकथंतात्वंपदवाच्यांगुष्ठमात्रजीवानुवादेनब्रह्माभेदप
रेवाक्येऽनुपपत्त्यभावादिति ननुजीवस्यवस्तुतः सर्वतस्य कथमंगुष्ठमात्रत्वंइत्यतआह हृद्य
पेक्षयातुमनुष्याधिकारत्वात् तुशब्दः शंकानिरासार्थः वस्तुतः सर्वगतस्यापिजीवभावमापन्न
स्यपरमात्मनोंगुष्ठपरिमाणहृदयावछिन्नतयांगुष्ठमात्रत्वमुपपद्यतइत्यर्थः ननुगजकुंतिकादि ५१

51A

शरीरेषु हृत्पुंडरीकस्यानियतपरिमाणत्वात्कथं जीवस्यांगुष्ठमात्रत्वनियमस्तत्राह मनुष्याधिकारत्वा
दिति शास्त्रस्येति शेषः अविशेषफलार्थेषु कर्मणि तिर्यगादेरपि स्वर्गकामस्याधिकारः स्वर्गकामश्रुतेर
विशेषादित्याशंक्यानाग्रस्यार्थवत्वाय समर्थविषयतया तिर्यगादेः सामर्थ्याभावेन स्वर्गकामपदं
संकोच्य मनुष्याधिकारत्वेऽप्यते चातुर्वर्ण्यमधिकरोति शास्त्रमिति प्राप्य एवं वसंते ब्राह्मणोऽग्नीनाद
धीत ग्रीष्मे राजन्यः शरदि वैश्य इति त्रयाणामेवाग्निसंबंधश्रवणात्त्रयाणामेवाधिकार इति राद्धांति
तं तथा च मनुष्याणां हृदयस्यांगुष्ठमात्रत्वात्तदपेक्षयांगुष्ठमात्रत्वमित्यविरोध इति तात्पर्यार्थः॥
एवमंगुष्ठमात्रजीवात्ववादेन विरुद्धांशपरित्यज्याभेदो बोध्यते अनेन वाक्येनेत्यममर्थमुत्तरग्रं
थसंदर्भेण स्पष्टीकरिष्यति अंगुष्ठमात्रः पुरुषोंतरात्मा सदा जनानां हृदये सन्निविष्टः तं स्वा
च्छरीरात्प्रवृहेन्मुंजादिवेषीकां धैर्येण तं विद्याच्छुक्रममृतमिति अस्यार्थः योंतरात्मा पुरुषत्वात्स
र्णोऽयं जनानां हृदये सदा सन्निविष्टः अतोंगुष्ठमात्र इति तत्पदवाच्यानुवादः तस्मात्त्वयव्यतिरे
कोऽयं तदनुसारिश्रुता च शोध्यत्वमाह तं स्वादिति शरीरेस्थूलसूक्ष्मं च तस्मात्स्वात्स्वाभिमानविष
यात् प्रवृहेत् पृथक्कुर्याद्धैर्येण समाधिनेति यावत् तं विविक्तमात्मानं विशुद्धममृतं ब्रह्मैव जा
नीयादित्याह तमिति तदेवं काठकवाक्यं प्रत्यक्ब्रह्मणोस्तात्त्विकसमन्वितमिति सिद्धं तदुपर्यपि
बादरायणः संभवात् एवं मनुष्याधिकारं शास्त्रमित्युक्तं तर्हि क्रममुक्त्यर्थाभिरुपासनाभिर्मनु

वे॰स॰वृ॰ ष्याणां देवत्वं प्राप्तानां अधिकारो न स्यादित्याशंक्य समाधीयत इत्याक्षेपसंगत्यास्यारंभः पूर्वसंगतसंग
५२ त्या वा अत्र चाधिकारनिरूपणद्वारा मंत्रार्थवादादीनां मानान्तरप्राप्तिविरोधयो रसतो देवताविग्र
52 हादौ समन्वयोक्तेरध्यायसंगतिः एवं मंत्रादीनां स्वार्थे प्रामाण्येन्यापत्त्या उपासनाधिकार्यादि समर्प
काणां स्वार्थे प्रमाणत्वात् तत्त्वमस्यादि वाक्यानां ब्रह्मात्मैक्ये पर्यवसानमिति श्रुतिशास्त्रपादसंगतयः
पूर्वपक्षे मंत्राद्यप्रामाण्याद् उपगमनादिवाक्यानामपि स्वार्थे तदयोगात् तत्त्वमस्यादिविरोधि नैक्यनिष्ठते
ति फलं इति सिद्धांते न तत्सर्वं संभवादैक्यनिष्ठते फलं यद्वा देवानामनधिकारात् क्रममुक्तिसाधनोपास
नेषु देवादिभोगद्वारा मोक्षकामस्य मनुष्यस्य प्रवृत्तिर्नास्तीति पूर्वपक्षे फलं सिद्धान्ते तादृशप्रवृत्तिरस्ती
ति बृहदारण्यके श्रूयते तद्यो यो देवानां प्रत्यबुध्यत स एव तदभवत्तथर्षीणां तथा मनुष्याणामिति
देवादीनां मध्ये यो यो ब्रह्म प्रत्यक्त्वेन साक्षादकरोत् स तावद् ब्रह्मात्मना अतिष्ठदित्यर्थः अत्र किं दे
वादीनां ब्रह्मविद्यायामधिकारोस्ति उत नास्तीति विषये शास्त्रस्य मनुष्याधिकारत्वान्नास्तीति प्रा
प्तेऽभिधीयते तदुपर्यपि बादरायणः संभवादिति तेषां मनुष्याणां उपरिष्टाद्ये देवादयस्तेषा
मपि ब्रह्मविद्यायामधिकारोस्तीति बादरायण आचार्यो मन्यते कस्मात् संभवात् अर्थित्वसामर्थ्या
द्यधिकारकारणस्य संभवादित्यर्थः देवादीनां सदा भोगशालित्वेपि भोग्यवस्तुषु नित्यत्वदोषदर्श शि॰ ५२
नाद्वैराग्यादिकं निरतिशयानंदमोक्षार्थित्वं च संभवतीति भावः विरोधः कर्मणीति चेन्नानेकप्रति

52A

पत्तेर्दर्शनात् ननु देवादीनां विग्रहवत्त्वं विना ब्रह्मविद्यायामनधिकारात् तदंगीकरणीयं तथा स
ति कर्मण्यपि शरीरतया ऋत्विगादिवत्संनिधानेनैवोपकारकत्वं स्यात् तच्च न संभवति एक
स्य शरीरस्यानेकत्र युगपत्संनिधानासंभवात् तस्माद्विग्रहवत्त्वांगीकारे कर्मणि देवतानां
उपकारकत्वविरोधः प्रसज्येतेति चेन्नैष दोषः कस्मात् अनेकप्रतिपत्तेर्दर्शनात् एक
स्य देवस्यानेकेषां शरीरग्रहणं कति देवा याज्ञवल्क्येत्युपक्रम्य त्रयश्च त्री च त्रयश्च त्री च सहस्रेत्यु
क्त्वा कतमे ते इति पृष्टवान् महिमान एवैषामेते त्रयस्त्रिंशत्त्वेव देवा इति त्रिसहस्रषडधिक
त्रिशतदेवानां त्रयस्त्रिंशद्देवेष्वन्तर्भावमुक्त्वा त्रयस्त्रिंशतोऽपि षट्सु षण्णां त्रिषु त्रयाणां द्व
योः द्वयोरेकस्मिन् प्राणात्मके देवेऽन्तर्भावं ब्रुवन् एकस्यैव देवस्यानेकरूपतां दर्शयति अस्यार्थः
एनं याज्ञवल्क्यं विदग्धः शाकल्यो वैश्वदेवनामकस्य शास्त्रस्य निविदि शस्यमाना देवाः कति
इति पृष्टवान् याज्ञवल्क्यस्योत्तरं निविदि त्रयश्चैता दिश्यमाना देवसंख्यावाचकं मंत्र
पदं निविष्टं प्रायते एवं षडधिकत्रिशताधिकत्रिसहस्रसंख्यानिर्णयानंतरं कतमे ते इति संक्षे
परूपप्रश्ने अष्टौ वसव एकादश रुद्रा द्वादशादित्याः प्रजापतिरिंद्रश्चेति त्रयस्त्रिंशद्देवेषु पूर्वे
षां मंतर्भावो दर्शितो महिमान एवैषामित्यादिना एषां त्रयस्त्रिंशद्देवानां महिमानो विस्तारा एव
वस्तुतस्त्वयस्त्रिंशद्देवेत्यर्थः तेऽपि त्रयस्त्रिंशद्देवाः षण्मात्रमग्निपृथिवीवाय्वंतरिक्षादित्यदिवां म

वे॰ सू॰ दू॰ द्विमानातेपिषट्देवाः त्रयाणांलोकानांमहिमानः तेत्रयोदेवाः द्वयोरन्नप्राणयोरध्यर्धोश्चैकस्य
५२ प्राणशब्दवाच्यस्यवायोर्महिमानाविति यद्वानेकप्रतिपत्तेर्दर्शनादनेकत्रकर्मणिएकस्य
53 प्रतिपत्तिरंगाभावः तस्यलोकेदर्शनादित्यर्थः यथाबहुभिर्नमस्कुर्वाणैर्युगपदेकोब्राह्मणो
नमस्क्रियमाणोदृश्यते एवमेकाविग्रहवतीदेवतामुद्दिश्ययुगपत्सर्वैर्हवींषित्यज्यंतीतिनैके
ष्वपिकर्मसुदेवतायाः उपकारकत्वेविरोधः स्यादितिचेन्नातःप्रभवात्प्रत्यक्षानुमानाभ्यां नन्वेमास्तुक
र्मणिविरोधः तथापिशब्दे वेदवाक्ये विरोधः स्यादेवस्यानित्यविग्रहवद्देवतायांनित्यवेदार्थत्वाभिका
रे शब्दस्यार्थेननित्यसंबंधाभावेननित्यानित्यसंयोगविरोधादिति चेन्नापमप्यस्तिविरोधः कुतः अ
तः प्रभवात् देवादिनिष्ठजातिमात्रवाचकात् वेदराशेरेवदेवादिप्रपंचस्यप्रभवात् उत्पन्नत्वश्रव
णादित्यर्थः तथाहिस्मृतिः अनादिनिधनानित्यावागुत्सृष्टास्वयंभुवा आदौवेदमयीदिव्या
यतः सर्वाःप्रवृत्तयः नामरूपंचभूतानांकर्मणांचप्रवर्तनंवेदशब्देभ्यएवादौनिर्ममेसमहेश्वर
इति श्रुतिरपिएतइतिहवैप्रजापतिर्देवानसृजतासृग्रमितिमनुष्यानिंदवइतिपितॄंस्तिरःप
वित्रमितिग्रहानाशवइतिस्तोत्रंविश्वानीतिशस्त्रमभिसौभगेत्यन्याः प्रजाइतितथासमनसावाचं ५२शि
मिथुनंसमभवदिति अस्यार्थः एतेअसृग्रमिंदवस्तिरःपवित्रमाशवः विश्वान्यभिसौभगेत्येत
न्मंत्रस्थपदैर्देवादीनसृजत्समसर्जद्ब्रह्मा तत्रएतइतिपदं इंद्रियाधिष्ठातृदेवास्मारकः असृग्र

53A

शब्दः असृक्शब्दवाच्यरुधिरप्रधानदेहमरणमनुष्यस्मारकः इंदुमंडलमध्यवर्तिपितृस्मारक इंदु
शब्दः पवित्रं सोमस्य सोमपवित्रमतिरक्षुर्वतो धारयतो ग्रहाणां तिरः पवित्रशब्दः स्मारकः आश्वोऽश्नवतो
स्तोत्राणां गानरूपाणां आशव शब्दः स्मारकः विश्वेदेवशंसनशस्त्राणां विश्वशब्दः स्मारकः अ
भि सौभगेति शब्दो निरतिशयसौभाग्यवाचकः प्रजानां स्मारक इति स प्रजापतिर्मनसा सहवा
चं मिथुनं भावं समभावत् समभावयत् त्रयीप्रकाशितां सृष्टिं मनसा आलोचितवानित्यावत्
सृष्टस्य प्रत्ययसामान्यशब्देन सृष्टेर्वेदप्रभवत्वप्रतिपादकश्रुतिस्मृती दृश्येते तथा च श्रुतिस्मृ
तीभ्यां वेदशब्दप्रभवत्वं सृष्टेरित्यर्थः आकृत्यालिंगितविग्रहानंगीकारे कस्य सृष्टिः स्यादिति
भावः तस्मात् यागादिशब्दानां नित्याकृतिवाचकत्वं एवं वैदिकशब्दानां नित्याकृतिवाचकत्वमिति
न शब्देष्वविरोध इति अत एव च नित्यत्वं अस्मात् कर्तृकत्वादिना सिद्धमेव वेदस्य नित्यत्वमनि
त्यार्थसंयोगेनानुपपन्नमित्याशंका वेदादेवाकृतिविशेषावच्छिन्नदेवादिसृष्टिरिति प्रतिपाद
नाच्च नित्याकृतेरेव शब्दार्थत्वान्नानुपपत्तिमित्यभिप्रायेण परिहरति अत एव नित्याकृतेः
शब्दार्थत्वादेव वेदस्य नित्यत्वं नानुपपन्नमित्यर्थः एतत्सूत्रसूचितः प्रयोगश्च वेदः अवांतर
प्रलयावस्थायी जगद्धेतुत्वादीश्वरवदिति अवांतरप्रलयावस्थायित्वमेव हि नित्यत्वं नाम ॥
अनुमानसिद्धार्थे श्रुतिरपि यज्ञेन वाचः पदवीयमायन् तामन्वविंदन्नृषिषु प्रविष्टामिति यत्तेनपु

वे॰ सू॰ वृ॰ रूपकर्मणा वाचो वेदस्य यद्वीयग्रहणयोग्यतामपुनप्राप्तवंतः अतस्तामृषिषु विद्यमानां वाचं याज्ञि
५५ काअन्वविंदन उपलब्धिमंतो बभूवुरित्यर्थः पूर्वस्थितामेव वाचमवेत्तातवंस इतितात्पर्यः समा
54 ननामरूपत्वाच्चावृत्तावप्यविरोधो दर्शनात्स्मृतेश्च नन्वाकृतिपदार्थकत्वेपि प्रलये पूर्ववत्कृतिव्यक्ति
नाशे पुनस्तदाकृतिविशिष्टव्यक्त्युत्पत्तौ मानाभावाच्चिरात्माऽनित्यसंयोगाविरोधस्तदवस्थ इति चेत् उ
च्यते सृष्टिप्रलयावृत्तावपि न शब्दे विरोधः कस्मात्समाननामरूपत्वात् आदिप्रलये जातोनि
रत्ययमाशोस्तिये नोत्पद्यमानं जगद्विलक्षणं स्यात् किंच संस्कारात्मनाऽविद्यायां तिष्ठत्येव जगत्
अनुभव एव भावनाख्यसंस्कारात्मना नचात्र संस्कारे मानाभावः सदिमद्रूकसंस्कारदर्शना नित्य
प्रलयाख्यसुषुप्तौ महदिबहयेद्रियाद्यर्थसंस्कारसद्भावाच्च प्रबोधे पूर्वसजातीयव्यवहारात्तेन च प्रति
दिनं सृष्टिप्रलययोः सद्भावे मानाभावः यदा सुप्तः स्वप्नं न कंचन पश्यत्यथास्मिन्प्राण एवैकधा भवति॥
तदैनं वाक्सर्वैर्नामभिः सहाप्येति सर्वैरूपैः सहाप्येति श्रोत्रं सर्वैः शब्दैः सहाप्येति मनः सर्वैर्ध्यानैः
सहाप्येति स यदा प्रबुध्यते यथाग्नेर्ज्वलतः सर्वा दिशो विस्फुलिंगा विप्रतिष्ठेरन्नेवमेवैतस्मादात्मनः
सर्वे प्राणाः यथायतनं विप्रतिष्ठंते प्राणेभ्यो देवा देवेभ्यो लोकास्तस्मादित्युति मानत्वाच्चास्यार्थः
अस्य शब्दः तदार्थकः पदेस्तु पक्रमान् वै प्राणशब्दः परमात्मपरः अस्मिन्प्राणे जीव एकधाभ ५८
वति तदात्मना तिष्ठतीत्यर्थः तदाराकीभावावस्थायां सनं प्रकृते प्राणे परमात्मनि अंतर्वेद्दिरिं

द्रियाणिसर्वाणिसविषयाणि अपियंतिपरमात्मनिलीनानिभवंतीत्यर्थः प्रबोधोनस्मादेवपरमात्म
54A नोजगनोजन्माह सइति अविलंबेनोत्पत्तौ दृष्टांतः यथेति एवंशब्दपूर्वंतदेतद्व्याहारः प्राणवा
गादयस्तेभ्योनंतरंतदनुग्राहकदेवा अग्न्यादयस्तेभ्योनंतरंलोकाः शब्दादिविषयाइति तथाचयथा
संस्कारबलात्सर्वंमंडूकादिसमाननामरूपत्वमक्षरकार्यस्य एवंपूर्वकल्पप्रपंचसमानरूपत्वादुत्तरप्र
पंचस्येति पूर्वोक्तविच्छिन्नमुत्पन्नेस्याद्वेकश्चिद्विरोधः समाननामरूपत्वंचावृत्तौदर्शनात् स्मृतेश्चाभ्यु
पगन्तव्यं सूर्याचंद्रमसौधातायथापूर्वमकल्पयत् दिवंचपृथिवींचांतरिक्षमथोऽस्वरिति तथान
क्षत्रेष्टौ अग्निर्वा अकामयत अन्नादोदेवानांस्यामिति सएतमग्नयेकृत्तिकाभ्यः पुरोडाशमष्टाकपा
लंनिरवपदिति भाविष्यन्तिमास्त्रियजमानोऽग्निरित्युच्यते एवंकामयित्वाकिंकृतवांस्तदाह सइति
कृत्तिकाभ्यः कृत्तिकाख्यनक्षत्रदेवताभ्यः बहुवचनेनतत्रवाहुत्वाहोष्ये अष्टाकपालं अष्टसुकपाले
षुपचनीयंनिरवपत् उक्तपुरोडाशहविष्कामिष्टिंकृतवानित्यर्थः तथाचयोग्निर्यस्मैअग्नयेनिर
वपत् तयोः समाननामरूपत्वंदर्शयतीतीति स्मृतिरपि यथर्तुष्वृतुलिंगानिनानारूपाणिपर्य
येदृश्यंतेतानितान्येवतथाभावायुगादिकादृष्टव्या उक्तंदेवादीनामधिकारंआक्षिपति मध्वादिष्व
संभवादनधिकारंजैमिनिः देवादेवानांब्रह्मविद्यायांअनधिकारंजैमिनिराचार्योमन्यतेकस्मात्॥
मध्वादिष्वसंभवात् एवंहिमधुविद्याश्रूयते असौवाआदित्योदेवमधुदेवानामोदनात् मध्विमधु

वे.सू.वृ. तस्य मधुनो द्युलोक एव तिरश्चीनवंशः अंतरिक्षमादित्याख्यमधुनोवस्थानात देवमध्वाधारपक्षः रोहितं
५५ शुक्लं कृष्णं परः कृष्णं मोक्षं चेति पंचरोहितादीन्यमृतानि प्राणाद्यूर्ध्वं तेपंचदिग्गवस्थिताभिरादित्यरश्मि
55 नाडीभिर्मधुच्छिद्रस्थानाभिः रोहिताद्याख्याभिः नक्षत्रदेवोत्कृष्टकर्मकुसुमेभ्यस्तत्र ह्यैदिकमंत्रमधुकरैः
रादित्यमंडलमाऽऽनीतानि पंचममृतानि रोहितादिकमृतमकरंदस्थानभूतवह्नौ हुतेसोमाज्यपयः
पुरोडाशादिरूपं द्रष्टव्यं तानि च रोहितादीन्यमृतानि यशस्तेजोवीर्यसकलेंद्रियान्नरूपेण निष्पन्ना
न्यादित्यमधुसंबद्धानि प्राग्यादिदिक्क्रमेण विद्यमानानां वसुरुद्रादित्यमरुत्साध्यरूपाणां देवाना
मुपजीव्यानीत्येवं चिंतयतोपासकस्य वस्वाद्याश्रित्य नेव स्वादीनां समानानां समानानामग्न्येकोभूत्वाय
शस्त्राद्यमृतं प्रत्यक्षमानादिभिः करणैरुपलभ्यतृप्यतीति निर्णेयं एवंभूतमधुविद्यायां स्वयं व
स्वादीनां देवानामधिकारः संभवति एकस्योपास्योपासकभावप्राप्यप्रापकभावयोर्विरोधात सू
त्रस्यादिशब्देन पाठविद्यासु आदित्यो ब्रह्मेत्यादिरूपासु देवानामुपास्यत्वेनाविद्यायामदृश्यंते न
यारिमावेव गौतमभरद्वाजावयमेव गौतमोयं भरद्वाज इमावेव विश्वामित्रजमदग्नी अयमेव विश्वा
मित्रोयं जमदग्निरिमावेव वसिष्ठकश्यपावयमेव वसिष्ठोयं कश्यपो वागेवात्रिरित्याद्यास्वृषय उपा
सकास्तन्न तेषामेवर्षीणामधिकारः संभवति क्रमस्तु इमौ दक्षिणवामकर्णौ क्रमेण गौतमभार
द्वाजाविनुपास्यो द्वितीयेमाविस्यनेन दक्षिणवामाक्षिद्वयोक्तिः तृतीयेमाविस्यनेन दक्षिणवामनासिका ५५

55A हृदयोक्तिः एवं समस्तशीर्षण्येंद्रियेषु सत्स्वप्युपास्तिरित्यर्थः न च मध्वादिविद्यासु देवादीनामनधिका
रेऽपि ब्रह्मविद्यायामधिकारः किं न स्यादिति वाच्यं विद्यात्वाविशेषेण ब्रह्मविद्यायामप्यनधिकारात् न
याचायं प्रयोगः ब्रह्मविद्या न देवादीनधिकारोति विद्यात्वात् मध्वादिविद्यावदिति अपि च ज्यो
तिषि भावाच्च भ्रमणवत्तया परिदृश्यमाने ज्योतिर्मंडल एव सूर्यचंद्रादिदेवताशब्दानां लोके प्र
योगसद्भावान्मंडलस्य च पिंडादिवदचेतनत्वे न विग्रहाभावादग्निवाय्वादीनामपि तत्तुल्यत्वेन साम
र्थ्याद्यसंभवेन च धर्मस्याभावाच्च देवादेनामधिकारः न च मंत्रार्थवादेभ्यो देवानां विग्रहवत्त्वसिद्धिः स
र्वस्तस्थितिमिति वाच्यं तेषामन्यपरत्वेन स्वार्थे प्रामाण्याभावात् तस्माद्देवादीनां ब्रह्मविद्यायामधिका
राभावं जैमिनिर्मन्यते इति शंकासूत्रयोरभिप्रायः सिद्धांतयति भावं तु बादरायणोऽस्ति हि ऽ तु शब्दः ॥
शंकानिरासार्थः बादरायण आचार्यो ब्रह्मविद्यायां देवादीनामधिकारस्य भावं मन्यते यद्यपि देवता
मिश्रोपासनास्वनधिकारः तथापि निर्गुणब्रह्मविद्यायां देवानामप्यधिकारोऽस्ति हि पूर्वोक्तस्य विद्या
त्वादित्यनुमानस्य ज्योतिष्टोमादि न ब्राह्मणकर्तव्यं कर्मत्वाद्राजसूयवदित्याभाससाम्याद्दुष्टत्वं यद्वा
ज्योतिषि भावाच्चेत्यस्योत्तरं अस्ति हीति यद्यपि देवताशब्दाः ज्योतिरादौ प्रयुज्यंते तथापि तदभिमा
निदेवतापरा एव संभवंति अस्ति हि ऐश्वर्ययोगाज्ज्योतिरादिरूपेणावस्थानं विग्रहं गृहीत्वा व्यवहर्तुं
च सामर्थ्यं ॥ तथा हि श्रूयते मेधातिथिं मेषेति मेधातिथिं काण्वायनं मेषो भूत्वेंद्रो जहारेत्यर्थः तथा स्म

वे॰सू॰वृ॰ र्यतेव आदित्यः पुरुषो भूत्वा कुंतीमुपजगामेति न चार्थवादादीनां स्वार्थे प्रामाण्याभावात्कथं तेभ्यो विग्रह
५६ वत्त्वसिद्धिरिति चेन्न तत्राप्यस्ति हीत्येवोत्तरं मानांतरविरोधसंवादयोरभावे तेभ्य एव विग्रहवत्त्वसिद्धिरस्ति ॥
56 तथाहि अर्थवादादिभिः स्तुत्यादिकं लक्षणया तो वाच्यार्थोऽगीकृत एव न हि वाच्यार्थाभावे लक्षणा युक्ता ॥
किंच व्रात्नो व्रात्यस्तोमेन यजेतेत्यादौ वा तस्य स्वरूपाकांक्षायां सावित्रीपतितो व्रात्यो यस्य पिता पितामहो वा वा॰४
सोमं न पिबेत्स व्रात्य इति व्रात्यस्वरूपं विध्यपेक्षितं सद्विधिप्रामाणकमित्युच्यते यथा स्वर्गरूपं विध्यपे
क्षितं सद्विधिप्रमाणकं तथा निःस्वरूपदेवतोद्देशेन द्रव्यत्यागो यागो हि अपेक्षितं देवतादिस्वरूपं विग्रह
वत्त्वं विधिप्रमाणकमेव एवं मंत्रार्थवादप्रत्यक्षमूलेतिहासपुराणादिभिरपि विग्रहवत्त्वसिद्धिः न च प्र
त्यक्षमूलत्वं पुराणादीनामसिद्धमिति वाच्यं तत्कर्तृणां योगमाहात्म्याद्देवादिभिः सह प्रत्यक्षव्यवहा
रसंभवात् तथा च श्रुतिर्योगमाहात्म्यमाह पृथ्व्याप्यतेजोऽनिलखे समुत्थिते पंचात्मके योगगुणे
प्रवृत्ते न तस्य रोगो न जरा न मृत्युः प्राप्तस्य योगाग्निमयं शरीरमिति पादतलमारभ्याजानो राजानो
रानाभेर्नाभेराग्रीवं ग्रीवाया आकेशाप्ररोहमाकेशाप्रराद्ब्रह्मरंध्रं क्रमेण पृथिव्यादिधारणया
पृथिव्यादिपंचात्मके भूतसमुदाये समुत्थिते पवित्रीभूते वशीकृते योगगुणे चाणिमाद्ये प्रवृत्ते योगाभि
व्यक्ते तेजोमये देहे प्राप्तस्य योगिनो न रोगादिप्राप्तिरित्यर्थः तस्मात्प्रत्यक्षमूलेतिहासपुराणादिभ्यो विग्रह ५६
वत्त्वसिद्धावर्थित्वादिसंभवाद्देवादीनां ब्रह्मविद्यायामधिकारोऽस्तीति क्रममुक्त्युपासनासमुच्चयप्रवृत्ति

रविकलेतिसिद्धं शुगस्य तदनादरश्रवणात्तदाद्रवणात्सूच्यते हि पूर्वपक्षयात योयो देवानामिति
56A देवशब्दग्रहणात्मनुष्याधिकारनियमाभावादेनः देवानामधिकार उक्तः तथा मम जानश्रुतौ
शूद्रशब्दश्रवणाल्लिंगेन हि जात्यधिकारनियममपोह्य शूद्रस्याप्यधिकारोऽस्त्विति दृष्टान्तसंगत्येद
मारभ्यते शूद्रशब्दस्य सिद्धान्ते द्वितीयेष समन्वयोक्तेरध्यायान्तर्भावोऽस्य युक्तः शूद्रशब्दस्य वेदान्ता
नामर्थे समन्वयसिद्धेः श्रुतिसंगतिः पूर्वपक्षे जातिशूद्रस्यापि ब्रह्मविद्यायां त्रैवर्णिकवदविशेषः
पाले सिद्धान्ते ततो विशेषः इति विवेकः एवं किलात्र छान्दोग्ये चतुर्थाध्याये उपाख्यायते जानश्रु
तिः पौत्रायणः श्रियानिधिः बहन्नदाता बहुसद्गुणो बभूव तस्य राज्ञो गुणगणगरिमसंतोषि
ताः संतो देवर्षयो हंसरूपमास्थाय निदाघसमये प्रासादोपरिशायानस्य तस्य राज्ञ उपरि मालामावध्या
जग्मुः तेषामग्रेसरं हंसं बोध्य पृष्ठतस्त्वागच्छन्नेको हंसः साक्षेपमभ्युवाद भोभो भल्लाक्ष भ
ल्लाक्ष अस्य राज्ञो जानश्रुतेर्द्युलोकं व्याप्य विद्यमानं तेजो न पश्यसि किं तत्तेजस्त्वां प्रदहति अत
स्तदतिलंघ्य न गच्छेति भल्लाक्षोऽस्य प्रहासः भद्रोऽसौ तस्यार्थः इदमस्य पक्षस्याग्रगामिनः सप्रत्युवाच॥
कम्बर एनमेतत्सन्तं सयुग्वानमिव रैक्वमात्थेति अयमर्थः वरेति सोपहाससंबोधनं अवरे त्वर्थः
यहावरो वराको जानश्रुतिः कमु पदमाद्देयपार्थकं कथं इत्यर्थः रैक्वो नाम कश्चन ब्रह्मनिष्ठः यो
जयति देशान् गमयति स्वारूढमिति युग्वा गन्त्रीशकटीन सहवर्त्तत इति सयुग्वान् इत्यर्थः तथा

छां.उ.
५८ टी.
57

चरणं वराकं जानश्रुतिं प्राणिमात्रं संतं स्वं अरे सयुग्वानं भगवंतं अस्य तेजः रैक्कमिव कथमेतद्वचनं
ब्रवीषि इदं श्रुत्वा च अयं राजा ब्रह्मविद्यार्थी रैक्कसमीपं गत्वा कृतार्थो भविष्यतीति दयालू तौ हंसौ नाम
भिप्रायः अथैव राजा हंसप्रयुक्तमनादरवाक्यं श्रुत्वा स्वसौधं तत्त्वतः कर्षमजर्षणेकाष्टाच रैक्वस्यता
त्वादुःखितमनाः कथमपि निशामतिवाहयांबभूव ततो निशावसाने सूचकं वैदिवृंदसमारब्धस्तुतिस
हस्रमेवलितमंगलतूर्यनिर्घोषमाकर्ण्य तस्मिन्नलस्य एव राजा क्षत्तारमाहूयादिदेशः विविक्ते
देशेषु पर्वतगुहादिषु तेषु तेषु रैक्कोऽयं सयुग्वानमन्विष्यतां ततोऽस्मभ्यमाचक्ष्वेति स यंनातथैव ब्र
विदंति विविक्तदेश शकटस्याऽधस्तात्तेन पामानं कंडूयमानं दृष्ट्वा अयमेव रैक्व इति निश्चित्य तानि कुशलो
रैक्वस्य तस्मिन्निंगितेगार्हस्थ्यकांक्षां धनेच्छां चोन्नीय राज्ञे निवेदयामास स राजा तन्निशम्य गवां षट्शतानि
हारं रथं चाश्वयुक्तमादाय सत्वरं रैक्वमुपसमाद उपसद्य चोवाच हे रैक्व इदं सर्वं गवादिकं गृहीत्वा
साधिमां भगवन्निति अथैवमुक्तवंतं समभ्रमं समाहूय चोवाच रैक्वः अहहारेत्वा मूढ तवैव सह गो
भिरस्त्विति अहेति निपातः साटोपाह्वानमाह हारेणयुक्तो रथो हारेत्वा गोभिः सहितस्तवैवास्तु कि
मेतावन्मात्रेणागमनिर्वाहानुपयोगिनेति भावः एवं स्थिते चिंता किं शूद्रस्य विद्यायां अधिकारोऽस्ति न
वेति अस्तीति तावत्प्राप्तं कस्मात् अर्थित्वादिसंभवात् वेदाध्ययनसाध्याहवनीयाद्यभावेनाग्निसा ५८
ध्याकर्मानधिकारेऽपि देवादिवद्विद्यायां अधिकारसंभवात् संवर्गविद्यायां मुमुक्षोर्जानश्रुतेः शिष्य

रैक्केण गुरुणा शूद्रशब्दप्रयोगाच्चेति अत्र ब्रूमः न शूद्रस्य ब्रह्मविद्यायामधिकारः उपनयनाभावेन
57A वेदाध्ययनाभावात् नहि वेदवाक्यविचारसाध्यब्रह्मविद्यायामनधीतवेदस्याधिकारः संभवति॥
शास्त्रीयसामर्थ्याभावात् नचैवमपि देवानामप्यनधिकारः श्रुतिसाम्प्रते तेषां स्वयंप्रभातवेदत्वात्॥
नच शूद्रस्यापि लिखितपाठादिना वेदप्राप्तिरिति युक्तं गुरूपसदनपूर्वकाध्ययनसंस्कृतवेदस्यैव
ब्रह्मविद्याद्युपकारकत्वात् नच शूद्रश्रवणलिंगेन तस्याधिकारः न्यायाभावे लिंगस्यासाधकत्वा
त् नहि वैदिकशूद्रशब्दोऽनर्थकः स्यादित्याशंक्य तेन व्याख्यातेऽद्देस्तत्रं शुगस्येत्यादि अस्य संजातन्
श्रुतेः क्षत्रियस्य तदनादरश्रवणात् तस्य हंसस्यानादरश्रवणाद्याः शुगुत्पन्नास्य शूद्रशब्देन सूच्य
ते हि रैक्केण स्वस्य सर्वज्ञत्वज्ञापनार्थं रैक्कः शूद्रशब्दं प्रयुक्तवानिति भावः शूद्रशब्दयोगेन क्षत्रियेव
र्तयति तदाद्रवणादिति तस्याः शुचो जानश्रुतिप्राप्तत्वादित्यर्थः यद्वा तस्य जानश्रुतेः शुच प्रा।
प्तत्वादिति अथवा तं रैक्कं प्रति जानश्रुतिः शुचोद्द्राववेति शूद्रो जानश्रुतिरुच्यते अतो न शूद्रस्या।
ऽधिकारः ननु मुख्य एव शूद्रो जानश्रुतिरस्तु किं जघन्येन योगेनेत्यत आह क्षत्रियत्वगतेश्चोत्तर
त्र चैत्ररथेन लिंगात् जानश्रुतिरस्तु किं जघन्येन योगेनेत्यत आह क्षत्रियत्वगतेश्चोत्तरत्र चै॥ न
मुख्यशूद्रः कुतः क्षत्रियत्वगतेः क्षत्रियत्वावगतेरित्यर्थः सापि कुतः उत्तरत्र संवर्गविद्यावाक्य
शेषे चैत्ररथेन प्रसिद्धक्षत्रियेणाभिप्रतारिनामकेन सह समभिव्याहारात्मकलिंगादित्यर्थः स

ब्र॰ वे॰ सू॰ जातीयानामेव हि प्रायेण सहचर्या भवतीति भावः एवं ह्यभिप्रतारी संकीर्त्यते अथ ह शौनकं च का
५८ पेयमभिप्रतारिणं च काक्षसेनिं सूदेन परिविष्यमाणौ ब्रह्मचारी बिभिक्षे इति संवर्गविद्यावाक्ये तत्र
58 रमर्थवादारंभायेऽपराहुः शुनकस्यापत्यं शौनकं कपिगोत्रं कापेयं पुरोहितमभिप्रतारिणं च
नाम्ना राजानं कक्षसेनस्यापत्यं काक्षसेनिं भोक्तुमुपविष्टौ सूदेन पाचकेन परिविष्यमाणौ से
व्यमानौ भिक्षितवानित्यर्थः अस्य चाभिप्रतारिणः चैत्ररथित्वं कापेयेन चित्ररथपुरोहितेन यो
गादवगंतव्यं चित्ररथपुरोहितत्वं च कापेयानां श्रुतौ प्रसिद्धं एतेन चित्ररथं कापेया अयाज
यन्निति एतेन हि द्विरात्रेण समानान्वयानां हि प्रायेण समानान्वया एव याजका भवंति तत्र चित्रर
थपुरोहितकापेययोगादभिप्रतारिणश्चैत्ररथत्वं भवति तथापि कथं क्षत्रियत्वमिति चेन्न तस्माच्चैत्र
रथिर्नामैकः क्षत्रियपतिरजायतेति श्रुतेः तस्माच्चित्ररथादित्यर्थः एवमभिप्रतारिणः क्षत्रियत्वे
सिद्धे तत्समभिव्याहारात्मकलिंगाज्जानश्रुतेः क्षत्रियत्वमिति सिद्धं संस्कारपरामर्शात्तदभावाभिला
पाच्च अथायमत्रैव वेदाध्ययनांगोपनयनभावाच्च जातिशूद्रस्याधिकारः इत्युक्तं इदानीं तु ब्रह्मविद्यां
गोपनयनाभावाच्च न तस्याधिकार इत्युच्यत इति भेदः इतश्च न जातिशूद्रस्याधिकारः कस्मात् विद्या
प्रदेशेषूपनयनादिसंस्कारपरामर्शात् तं होपनिन्ये अधीहि भगव इति होपससाद ब्रह्मपराः ब्रह्मनि ५८
ष्ठाः परं ब्रह्मान्वेषमाणाः एष ह वै तत्सर्वं वक्ष्यतीति ते ह समित्पाणयो भगवंतं पिप्पलादमुपसन्नाः

58 A

मि॰ अयमर्थः तं विद्यार्थिनमाचार्यः किं नोपनिन्ये उपनीतवान्॥ अनुपनीताय विद्यादानायोगादिति ता
त्पर्यं सनत्कुमारं प्रति नारदः अधीहि भगव इति रूपं मे ब्रह्मचार्यं गुरूपसदनं कृतवानित्याह अ।
धीहि भगव इत्याद्यः भरद्वाजादयः षड् ऋषयः परं ब्रह्मपरते नोपगतवंत इति ब्रह्मपरास्तद्ध्याननिष्ठाः परंपर
मार्थरूपं ब्रह्मविचारयंतो निर्णयार्थमेव पिप्पलादमनुजिज्ञासितं सर्वं वक्ष्यतीति निश्चित्य परिक्राह।
त्वानो गुरूपसदनायोगात् समित्पाणयः संतस्तमुपसन्नाः किलेत्याह ब्रह्मपरा इति ननु तान्
होपनीयैवेत्यनुपनीतानामपि वैश्वानरविद्यायामधिकारश्रुतेरनियम उपनयनमिति चेन्न
निषेधस्य प्राप्तिपूर्वकत्वात्तत्रोपनयनामो प्राचीनशालादीनां हि द्विजातीनामेवाधिकारात् निषेध
स्तु विद्योपदेष्टुरश्वपते राज्ञोऽब्राह्मणत्वात् क्षत्रियः तान्प्राचीनशालादीननुपनीयैवाप्युपनी
राज्ञो वाचेति निश्चयार्थः ननु शूद्रस्याप्युपनयनं कल्प्यतामित्यत आह तदभावाभिलापाच्चेति न
शूद्रेयातकं किंचिन्न च संस्कारमर्हति शूद्रश्चतुर्थो वर्ण एकजातिरित्यादिनोपनयनादिसंस्का
राभावाभिलापादित्यर्थः पानकेभक्ष्याविभागाभावकृते एकजातिः उपनयनरहित इति स्मृ
त्यर्थः किंच तदभावनिर्धारणे च प्रवृत्तेः जाबालो हि सत्यकामो गुरूपसदने कर्तृकामो गोत्रम
जानानः मातरं पप्रच्छ किंगोत्रोऽहमस्मीति सा चाप्याह न जानामीत्युवाच ततः सः जाबालो गौतममु
पससाद उपसद्य चोवाच हे भगवन् ब्रह्मचर्यं चरितुमिच्छामि मामनु ... भवानिति ततो गौ

तमेनं किंगोत्रोसीति पृष्टः सत्यकामो जावालश्चाह नाहं गोत्रं वेद नाप्यम्मातेति ततः स गौतमस्तदीये
न सत्यवचनेन जावालस्य शूद्रत्वाभावे निश्चित्य प्रवृत्ते नैतदब्राह्मणो विवक्तुमर्हति समिधं सोम्याहरो
59 पत्वा नेष्ये न सत्यादगा इति एतत्तस्य वचनं विविच्य तनिः संदिग्धं वक्तुमब्राह्मणो नार्हति अतस्त्वं न सत्यादगाः
सत्यवचनाच्चापि गतोसि अतस्त्वामुपनेष्ये तदर्थं समिधमाहरेत्यर्थः ततश्च सूत्रस्यायमर्थः तस्य
शूद्रस्याभावनिर्धारणे सत्येव विद्योपदेशे प्रवृत्तिदर्शनादिति तस्मान्न शूद्रस्याधिकारः श्रवणाध्य
यनार्थप्रतिषेधात्स्मृतेश्च इतश्च नास्ति शूद्रस्याधिकारः यतः स्मृतितो वेदश्रवणस्य तदध्ययन
स्य तत्प्रोक्तनयोरर्थज्ञानानुष्ठानरूपयोरर्थयोः प्रतिषेधादित्यर्थः एवं स्मरति अथास्य वेदमुप
शृण्वतः त्रपुजतुभ्यां श्रोत्रप्रपूरणमिति श्रवणस्य निषेधः त्रपुजतुभ्यां सेतत्राभ्यासी मलाद्वाभ्यमस्य
शूद्रस्य दत्ताभ्यां श्रोत्रहृदयकरणे वेदश्रवणप्रायश्चित्तनिर्देशः पद्युह वा एतत्तश्मशानं यच्छूद्रस्तस्मा
च्छूद्रसमीपे नाध्येतव्यमित्यध्ययननिषेधः नह्यश्रुतस्याध्ययनं संभवति यद्युपादद्यात्ततो संचारस
मर्थमिति यावत् ना ह शेमशणानं यच्छूद्रस्तस्य यः न शूद्राय मतिं दद्यादिति तदर्थज्ञाननिषेधः द्वि
जातीनामध्ययनमिज्या दानमिति तदर्थानुष्ठाननिषेधः दानशब्देनात्र नित्यदानमुच्यते नैमि
त्तिकदानेन शूद्रस्याप्यधिकार इति द्रष्टव्यं विदुरधर्मव्याधप्रभृतीनां तु पूर्वजन्मकृतश्रवणादिना वा
मस्य वामदेववत् ज्ञानोत्पत्तिर्मन्तव्या तस्मान्न कथमपि ब्रह्मविद्यायां शूद्रस्य वेदपूर्वकोधिकार इति ५९

59 A

सिद्धं॥ कंपनात् समाप्तः प्रासंगिकोधिकारविचारः इदानीं प्रकृतं वाक्यार्थविचारं प्रवर्त्तयिष्यामः
शब्दादेव प्रमितः इत्यत्र ब्रह्मवाक्ये जीवानुवादो ब्रह्मैक्यतात्पर्यमुक्तं अनंतरं यदिदमित्यादिवाक्ये प्रा
णानुवादो युक्तः प्राणस्य स्वरूपेणापि कल्पितस्य ब्रह्मैक्यायोगादिति प्रत्युदाहरणसंगत्यारंभः प्रा
संगिकत्वान्नाव्यवहिते न संगत्यपेक्षा पूर्वपक्षे प्राणोपास्तिः फलं सिद्धांते निर्विशेषब्रह्मज्ञानमिति भेदः
काठकवाक्यं पठ्यते यदिदं किंच जगत्सर्वं प्राण एजति निःसृतं महद्भयं वज्रमुद्यतं य एतद्विदुरमृता
स्ते भवंतीति अस्यार्थः यत्किंचेदमविशिष्टं जगत्सर्वं प्राणे निमित्ते सत्येजति चेष्टते एजृ कंपने इति धा
तोः कंपनार्थकत्वात्कंपनं चेष्टैवेति चेष्टनहेतुत्वमुक्तं तच्च जगत्तस्मादेव निःसृतं उत्पन्नं तच्च प्राणाख्यं
जगत्कारणं महत् अनवच्छिन्नं बिभेत्यस्मात्सर्वं वाय्वादीनि भयं भीषास्माद्वातः पवत इत्यादिश्रुत्वं
तरात् तदेव भयहेतुत्वं निरूपयति वज्रमिति उद्यतं वज्रमिवेत्यर्थः प्राणाख्यब्रह्मज्ञानस्य मोक्ष
हेतुत्वमाह य इति अत्र संशयः किं प्राणशब्देन मुख्यप्राणवायुर्गृहीतव्यो वज्रशब्देन चाशनिर्द्देते।
वायुलक्षणयोर्वा उभयविषयकमेकमुपासनं विधेयं उत निर्विशेषं ब्रह्मानेन वाक्येन प्रतिपाद्यमिति तत्र
तावदुपास्तिपरमिति युक्तं प्राणशब्दस्य तत्र प्रसिद्धेः वायोर्हि पर्जन्यभावेन विवर्तमानेन विद्युन्मेघवृ।
ष्ट्यशनयो जायंते इत्यशनिदेवतावायुलक्षकत्वं वज्रशब्दस्यापि युक्तं न च मोक्षफलश्रवणविरोधः त
स्माद्वायुरेव व्यष्टिर्वायुः समष्टिः पुनर्मृत्युं जयति य एवं वेदेति वायुवेदनस्यापि मोक्षहेतुत्वश्रवणा

६० 60

दित्यत्वप्राप्तेब्रूमः शाब्दादेवं प्रतीतमहतीत्यवदितमपि नेदं कमंदकमस्त्यात्मनुवतत अग्निर्वायोः प्राणादि
शब्दात्परमात्मैव प्रमितः कुतः कंपनात् सर्वशब्दवाच्यस्य सवायुकस्य जगतः कंपनात् जीवना
दिचेष्टाहेतुत्वादित्यर्थः ब्रह्मण्यपि प्राणशब्दप्रयोगो बहुले वेदे हष्टः प्राणमित्यादौ वज्रश
ब्दोऽपि भयहेतुत्वसामान्यादुपपद्यत इत्युक्तं वार्थकथनमस्मृष्ये कंपनहेतुत्वब्रह्मणः श्रुतमितरेष्व
सिद्धं नप्राणेन नापानेन मर्त्यो जीवति कश्चन इतरेण तु जीवति यस्मिन्नेतावुपाश्रिताविति इत
रेणास्यात्मना नाशनौ प्राणापानौ किंच कंपनवाक्यादूर्ध्वं मतस्त्रय चब्रह्मोक्तेरिहापि ब्रह्मग्रहणं न्या
य्यं तदेव शुक्रं तद्ब्रह्म तदेवामृतमुच्यते यस्मिँल्लोकाः श्रिताः सर्वे तदु नात्येति कश्चनेति एवं वा
क्ये ब्रह्मोक्तेरुक्ता ज्योतिष्मत् अमृतकृतस्य अर्कं सर्वाधिष्ठानत्वव्यतिरेकमस्य विनाह तदनेति किंच
च जडं तद्ब्रह्मनात्येति अतिक्रमेण न वर्तत इत्यर्थः तयोऽन्तरत्रापि भयादस्याग्निस्तपति भयात्त
पति सूर्यः भयादिन्द्रश्च वायुश्च मृत्युर्धावति पंचम इति अस्येश्वरस्य भयादग्न्यादयः स्वव्यापारे नि
यमेनानुवर्तन्ते राजा जयाभस्यादिवदिति ऽक्रोऽग्न्याद्यपेक्षया मृत्योः पंचमत्वाय दुक्तं वायु वेदेनस्य मोक्षहे
तुत्वं स्वतृप्तिमिति मन्त्रविशेषसामान्यात्मकस्य व्यष्टिसमष्टिवायोर्ज्ञानादृथ्यमस्तु निवृत्तिमात्रश्रवणात्
तस्मादनेन वाक्येन निर्विशेषब्रह्म ज्ञेयमिति सिद्धं॥ ज्योतिर्दर्शनात् एवं सर्वशब्दश्रुतिसंकोचानुप
पत्त्या प्रकरणमात्रशब्दं ब्रह्मोपक्रांतं तथेदप्रसादवाक्ये प्रकरणं न ग्राह्यं किं चिद्दलिये न प्रक

रा. ६०
बृं:

60A

रणाज्ज्योतिःशब्दं ब्रह्मस्यादिति प्रसंगादुदाहरणसंगत्यास्यारंभः पूर्वपक्षेऽग्न्यादित्योपास्त्या क्रममुक्तिः सि
द्धांते ब्रह्मज्ञानान्मुक्तिरिति फलभेदः छांदोग्ये प्रजापतिविद्यायां श्रूयते एष संप्रसादोऽस्माच्छरीरा
त्समुत्थाय परं ज्योतिरुपसंपद्य स्वेन रूपेणाभिनिष्पद्यते स उत्तमः पुरुष इति एतद्वाक्यं दहराधिक
रणेऽनुसंधेयः तत्र संशयः किं ज्योतिःशब्देन प्रसिद्धं सूर्यादितेजोऽभिधीयते उत ब्रह्मेति तत्र सूर्या
दीति युक्तं प्रसिद्धत्वात् अथ या एता हृदयस्य नाड्यस्ता आदित्यनाडीखंडे अथ यत्रैतदस्माच्छरीरादु
त्क्रामत्यथैतैरेव रश्मिभिरूर्ध्वमाक्रमत इति मृतोरादित्यप्राप्त्यभिधानादत्रापि ज्योतिरूपसं
पद्येति श्रवणाच्च अयमर्थः विशेषज्ञानोपरमानंतर्यमयं शब्दार्थः यत्र प्रारब्धकर्मावसानका
ले एतदुत्क्रमणं यथा तथेति क्रियाविशेषणं अस्मादभिमानविषयाद्देहादुत्क्रमणं यदा करो।
ष्यत तदा एतैरेवादित्यरश्मिभिरालंबनैरारूढः सन्नाक्रमते उपरि गच्छतीति एवं प्राप्तेऽभिधीयते
ज्योतिरत्र ब्रह्मैव कुतः दर्शनात् य आत्मापहतपाप्मेत्युपक्रमालोचनया ब्रह्मण एव प्रतिपाद्य
तयानुवृत्तिदर्शनादित्यर्थः यदुक्तं मृतोरादित्यप्राप्तिरभिहितेति तन्न आत्मनिर्गुणब्रह्मप्रकर
णत्वात् नहि निर्गुणब्रह्मविदो मार्गोत्क्रान्ती स्तः अत्र ब्रह्मसमश्रुतेः तस्मात्परंज्योतिः ब्रह्मैवेहो
पसंपत्तव्यत्वेन निर्दिष्टपत इति सिद्धं आकाशोऽर्थान्तरत्वादिव्यपदेशात् दहरमुपक्रमवशाद।
र्थान्तरे प्रसिद्धोऽपि ज्योतिःशब्दः स्वार्थांतरत्वादितः तथाकाशोपक्रमवशात् ब्रह्मादिशब्देऽपि

बृ॰ ६१ बे॰
61

स्वार्थमभ्युपगम्यतामिति दृष्टांतसंगत्येदमारभ्यते पूर्वपक्षे भूताकाशाभिन्नसर्वाधिष्ठानभूताकाशा
त्मकब्रह्मणउपास्त्या क्रममुक्तिः सिद्धांते सर्वाधिष्ठानब्रह्मधियासद्योमुक्तिरिति फलभेदः छांदोग्य
ग्रन्थे श्रूयते आकाशो ह वै नामरूपयोर्निर्वहिता ते यदंतरा तद्ब्रह्म तदमृतं स आत्मेति तेनामरूपे
यस्मात् ब्रह्मणो भिन्ने तदित्यर्थः यद्वा ते नामरूपे यस्य ब्रह्मणोंतरा मध्ये वर्तेते तदित्यर्थः तत्राका
शाकाशशब्देन भूताकाशउच्यते उत परमात्मेति विशये रूढ्या भूताकाश इति प्राप्ते ब्रूमः परमात्मै
वाकाशशब्देवाच्यः कस्मात् अर्थांतरत्वादिव्यपदेशात् ते यदंतरेत्याकाशस्य नामरूपाभ्याम्।
र्थांतरत्वेन व्यपदेशात् न हि नामाद्यंतःपातिनः आकाशस्य भूतस्य तस्माद् र्थांतरत्वं युक्तं आ
दिशब्देन तद्ब्रह्म स आत्मादिना ब्रह्मत्वादिव्यपदेशो द्रष्टव्यः तस्मादाकाशः परमात्मा ज्ञेय इति सिद्धं सुषु।
प्त्युत्क्रांत्योर्भेदेन व्यपदेशादित्यनुवर्तते पूर्वं नामरूपाभ्यां भेदेन व्यपदेशादाकाशो ब्रह्मेत्युक्तं तत्सु
तं प्राज्ञेनात्मना संपरिष्वक्त इत्यत्राभिन्ने जीवे भेदोपचारादित्याक्षिप्य प्राज्ञशब्दस्य ब्रह्मपरतया न भे
द औपचारिक इति समाधानात् संगतिः पूर्वपक्षे जीवानुवादेन कर्मविशेषकर्तृस्तुतिः फलं सिद्धांते
जीवानुवादेन प्रत्यग्ब्रह्मैक्यधीरिति विवेकः बृहदारण्यके षष्ठप्रपाठके कतम आत्मेति यो यं विज्ञा
नमयः प्राणेषु हृद्यंतर्ज्योतिः पुरुष इत्युपक्रम्य मध्ये स्वप्नावस्थायाः मध्यउपन्यस्य स वा एष महान
ज आत्मा यो यं विज्ञानमयः प्राणेषु य एषोंतर्हृदय आकाशस्तस्मिंछेते सर्वस्य वशी सर्वस्येशानः स ६१

61A र्वस्याधिपतिरित्युपसंहारोऽप्युपपद्यते अस्यायमर्थः देहादीनामन्यतमो वा तदतिरिक्तो वात्मेति जिज्ञासस्य
प्रश्ने याज्ञवल्क्यस्योत्तरं योऽयमिति विज्ञानं बुद्धिस्तन्मयस्तत्प्रायः प्राणेषु हृदीति व्यतिरेकार्थे सप्त
म्यौ प्राणबुद्धिव्यतिरिक्त इत्यर्थः बुद्धिवृत्तेर्विविनक्ति अन्तरिति अज्ञानाभिन्नः ज्योतिरिति
पुरुषः पूर्णः योऽयमेवंभूतः स आत्मेत्यर्थः स्वाधीनं सर्वं नियन्तुं शक्तिरस्तीति वक्तुं सर्वस्येशान इत्यु
क्तं स्वाधीनं स्वनियम्यं च सर्वमधिष्ठाय पालयतीति वक्तुं सर्वस्याधिपतिरित्युक्तमिति अत्र संशयः
किमयं वाक्यसंदर्भो जीवानुवादक उत तदनुवादेनासंसारिस्वरूपप्रतिपादनपर इति तत्रावस्था
द्युपन्यासात्परमात्मवाचकशब्दाभावाच्च जीवानुवादक इति प्राप्ते ब्रूमः विज्ञानमयसुषुप्त्याद्य
वस्थावज्जीवानुवादेन ब्रह्माभेदप्रतिपादनपरोऽयं वाक्यसंदर्भः न जीवानुवादकः कस्मात् सुषु
प्त्युत्क्रान्त्योरवस्थयोः शारीराद्भेदेनेश्वरस्य प्राज्ञशब्देन व्यपदेशात् तथाहि सुषुप्तौ तावद्व्यपदि
श्यते तद्यथा प्रियया स्त्रिया संपरिष्वक्तो न बाह्यं किंचन वेद नान्तरमेवमेवायं पुरुषः प्राज्ञेना
त्मना संपरिष्वक्तो न बाह्यं किंचन वेद नान्तरमिति उत्क्रान्तावपि अयं शारीर आत्मा प्राज्ञेनात्मनान्वा
रूढ उत्सर्जन्याति इति शारीराद्भेदेन परमात्मानं प्राज्ञशब्देन व्यपदिशति अन्वारूढोऽधिष्ठितः उत्स
न वेदनातः पार्श्वं कुर्वन्निति यावत् ननु भेदव्यपदेशमात्रेणाभेदप्रतिपादनपरोऽयं संदर्भ इति क
थं गम्यत इति चेत् उच्यते ध्यायतीव लेलायतीवेत्यादिग्रंथप्रवृत्तिदर्शनात् बुद्ध्याद्यपेतस्य स्व

वे॰ सू॰ वृ॰ १ 62

आत्माध्यायतीव चलंत्यां चलतीव वस्तुतो न ध्यायति न चलतीत्यर्थः एवमत ऊर्द्ध्वं विमोक्षायैव ब्रूहीति
पदे पदे प्रश्नः अनन्वागतस्तेन भवत्यसंगो ह्ययं पुरुष इति पदे पदे प्रतिवचनं च वाक्यसंदर्भस्याभेद
परत्वं फलयति अस्यार्थः अतः कामादिविवेकानंतरं मोक्षसाधनीभूतमात्मज्ञानकारायैव ब्रूहीति
जनकप्रश्नार्थः तेन जाग्राद्योगादिनाअनन्वागतः असृष्टो भवति असंगत्वादिति पत्यादिशब्दे
भ्यः एतस्य जीवस्यासंसारित्वप्रतिपादनपरमिदं वाक्यजातं यतोऽस्मिन्वाक्ये पत्यादयः शब्दाः असंसा
रित्वप्रतिपादनपराः संसारित्वप्रतिषेधपराश्च दृश्यंते सर्वस्य वशी सर्वस्येशानः सर्वस्याधिप
तिरित्यसंसारित्वप्रतिपादनपराः स न साधुना कर्मणा भूयान्नो एवासाधुना कनीयानित्या
द्याः संसारित्वप्रतिषेधका इति तस्मादसंसारिपरमात्मस्वरूपप्रतिपादनपरोऽयं वाक्यसंदर्भ
इति सिद्धं ॥ ॥ ॥ इति श्रीमत्ब्रह्मसूत्रवृत्तौ ब्रह्मामृतवर्षिण्यां
प्रथमाध्यायस्य तृतीयः पादः ॥ एवं तावत्प्रथमे पादे जिज्ञास्यत्वेन प्रतिज्ञाते ब्रह्मणि जग
ज्जन्मादिकारणे सर्वज्ञे समन्वयं वेदांतानां प्रसाध्य ब्रह्मलक्षणस्य प्रधानेऽतिव्याप्तिमाशंक्या
शब्दत्वेन निराकृतमीक्षतेर्नाशब्दमित्यत्र तदनंतरं स्पष्टब्रह्मलिंगानि वाक्यानि ब्रह्मणि सम
न्वितानीत्युक्तं द्वितीयतृतीयपादयोरस्पष्टब्रह्मलिंगानि शय शउपास्यगानि ज्ञेयगानि च
समन्वितानीत्युक्तं इदानीं प्रधानस्याशब्दत्वमप्रसिद्धं क्वचिच्छाखासु तत्परशाब्दानामपि द। वृ॰ ग श्री

62A

र्शनादित्याशंक्यातेषामप्यपरत्वप्रतिपादनार्थमयंपादः आरभ्यते आनुमानिकमप्येकेषामिति॥
चेन्नशरीररूपकविन्यस्तगृहीतेर्दर्शयतिच पूर्वस्मिन्सूत्रसंदर्भे ब्रह्मैवजगत्कारणं वेदांतप्रतिपा
द्यंनप्रधानादीत्युक्तमयुक्तं ब्रह्मवत्प्रधानस्यापिजगत्कारणत्वेनवेदांतवोध्यत्वात् नचकार
णहृदयवैयर्थ्यं कल्पभेदेनव्यवस्थानादितिब्रह्मांगीकारेणाक्षेपरमाक्षेपसंगतिः पूर्वग्रंथे
नास्याधिकरणस्यसूत्रकारैरेवाप्येकपाठं प्रयुंजानैः सूचितो. अव्यवहिताधिकरणेनतत्प्र
सिद्धांजीवोक्तिभंगेनाप्रसिद्धब्रह्मोक्तिवदप्रसिद्धेप्रधानोक्तिपरमेवकाठकवाक्यमस्त्वितिदृष्टांतसं
गतिः प्रधानस्याप्रकृतत्वप्रतिपादनेनब्रह्मणि वेदांतानांसमन्वयपदार्थादस्तिस्पष्टस्याध्यायसंग
तिरविरोधनमपर्यंतपदविचारत्वात्सर्वेषानयानांआपादपादसंगतिः पूर्वपक्षेब्रह्मणिवे
दांतानांसमन्वयस्तुतिनियमाभावः फले सिद्धांतेतत्तादृशनियमइतिविवेकः काठकवाक्यं
पठ्यते आत्मानंरथिनंविद्धिशरीरंरथमेवतु बुद्धिंतुसारथिंविद्धिमनः प्रग्रहमेवच इं
द्रियाणिहयानाहुर्विषयांस्तेषुगोचरान् आत्मेंद्रियमनोयुक्तंभोक्तेत्याहुर्मनीषिणः सोध्वनः
पारमाप्नोतितद्विष्णोः परमंपदमिति अनियतेंद्रियादेः पुंसः संसारित्वमियतेंद्रियस्याध्वनः
पारंविष्णोः परमंपदमिति आवेदितात्किंतदध्वनः पारंविष्णोःपदमित्याकांक्षायांतेभ्यएवेंद्रि
यादिभ्यः परत्वेनपरमात्मानंविष्णोःपदंदर्शयति इंद्रियेभ्यः पराह्यर्थाः अर्थेभ्यश्च प

वे. रं मनः मनसस्तु परा बुद्धिर्बुद्धेरात्मा महान्परः महतः परमव्यक्तमव्यक्तात्पुरुषः परः पुरुषान्न किं
सू. ६३ वृ. चित्सा काष्ठा सा परा गतिरिति अस्यार्थः आत्मनो भोक्तृत्वेन प्राधान्याद्रथित्वं रथस्वामित्वं स्थू
63 लशरीरं भोगायतनत्वेन गुणेन तथा रथसमं विवेकाविवेकहेतुभ्यां बुद्धिरेव शरीरहाराभोक्तारं
तत्वेटुः खेवाउपनयतीति सारथिः मनसा अश्वरशनास्थानीयेन विवेकिना विषयेभ्यः इंद्रिया
णि निरस्यंते तेनाविवेकिना विषयेषु प्रवर्त्यंते तेन मुक्तं मनसः प्रग्रहत्वं इंद्रियाणि संयतो
निमुक्तिद्वारं प्रापयंति असंयतान्यनर्थं संसारमिति हयत्वं तेषां यथाश्वो मार्गमालक्ष्य
चलति एवमिंद्रियाः स्वार्थमुपलभ्य चलंतीति शरीरादिषु मध्ये शब्दादीनां विषयाणां मार्गत्वं
ननु मारीरथिनो रथाद्यपेक्षा न भोगे चिद्रूपतया स्वभावेनैव तद्भोगादि स्यतत्राह ॥ आत्मेति आ
त्म भोक्तेत्याहुरिति संबंधः तस्मात्मनः सार्थेंद्रियासन्निकर्षे भोगाद्योगादिंद्रियमनोयोगे यथा
भवतीति क्रियाविशेषणेन भोक्तृत्वमाह इंद्रियेति भावेनिष्ठा यद्वा आत्मा देहः तद्युक्तमात्मा
नं भोक्तेत्याहुरिति योजना । यद्यप्यंतरंगत्वमिंद्रियाणामर्थापेक्षया परत्वं तथापीन्द्रियाणां ग्रह
त्वमर्थानां शब्दादीनामतिग्रहत्वश्रुतौ दृष्टं इत्यर्थानामेव परत्वं गृहं तेन वशीकुर्वंति पुरुषप
रुषमिति ग्रहा इंद्रियाणि तेषां ग्राहकत्वं विषयाधीनमित्यतिग्रहा विषया लक्षणात्ग्रहणे यार्थानां प्रा
धान्यमित्याह इंद्रियेभ्य इति सेंद्रियार्थव्यवहारस्य मनोमूलत्वात् मनसोर्थेभ्यः परत्वं निरूप्य ६२ शि.

यात्मकबुद्धिहानाविषयाभोक्तृरूपम्भवतीति संशयात्मकमनसो बुद्धेः प्राधान्यं पूर्वं योरथित्वेनोक्तः आ
63A त्मा स भोक्ता बुद्धेः परः भोगोपकरणत्वात् तस्याः स्वामित्वाच्चात्मनो महत्त्वं यदिमहत्त्वमात्मविशेषण
त्वेनात्मनः परमव्यक्तमिति स्यात् तस्याविशेष्यत्वादिति ब्रूषे तदा महच्छब्देन हिरण्यगर्भबुद्धिरुच्य
ते तस्याः व्यष्टिबुद्धिव्यापनादात्मत्वं च एवंभूतहिरण्यगर्भबुद्धिस्तुतिं दर्शयति मनो महान्मतिर्ब्रह्मा पू
र्बुद्धिः ख्यातिरीश्वरः प्रज्ञा संविच्चितिश्चैव परिपठ्यते अयमर्थः सर्वप्रथमोत्पन्ना हिरण्यगर्भबुद्धिपरा ॥
तस्याः मनस्त्वं संदेहरूपत्वं स्यादित्यत आह मतिरिति महत्त्वमुपपादयति ब्रह्मेति भोग्यजातावधा
रत्वमाह पूरिति निश्चयात्मत्वमाह बुद्धिरिति चितिशक्तिमती ख्यातिः ईश्वरो नियामकः प्रज्ञा लौ
किकप्रकृष्टज्ञानं संवित् ज्ञानफले उपासकस्य तत्प्राप्तेः चितिः चिन्मात्राधाना स्मृतिः ज्ञातसर्वार्था
नुसंधानशक्तिमती विद्वत्त्वसिद्धिमूलत्वं बुद्धावनुकूलयति पूरिति श्रुतिरपि योब्रह्माणं विदधाति पूर्वं
कृत्वादिकाद्धिरण्यगर्भबुद्धौ वेदाविर्भावमीश्वराद्यप्रदर्शयतीतस्या उत्कृष्टरूपत्वमाह एतादृशी बु
द्धिः सर्वासंबुद्धीनां परा उत्कृष्टा स्मृतिस्यादे पुरुषग्रहणेनैव तदभिन्नो रथी भर्त्ता गृहीतो द्रष्टव्यः आ
त्मानं रथिनं विद्धीत्यादिवाक्यनिर्दिष्टाः सर्वे गृहीताः अवशिष्टं रथत्वेन कल्पितं शरीरं अव्यक्तशब्दवि
षयाकार्यलक्षणया अव्यक्तशब्देन निर्दिशति महतः परमव्यक्तमिति एवं वस्तुगत्यर्थः प्रदर्शितः
तत्र संशयः किमव्यक्तशब्देन प्रधानमुच्यते उत पूर्वं प्रकृतं शरीरमिति तत्र सांख्यस्य तो महदव्य
क्तपुरुषशब्दानां तन्त्रेषु प्रसिद्धत्वादव्यक्तं प्रधानमेवेत्याह आनुमानिकमप्येकेषामिति चेदिति

आनुमानिकं प्रधानमप्येकेषां शाखिनां प्रत्यक्षमव्यक्तशब्देन पठ्यत इत्यशब्दत्वमसिद्धमिति सूत्रावय
सू॰ वे॰ वार्थः परिहरति नेति कुतः शरीररूपकविन्यस्तगृहीतेः शरीरं पूर्ववाक्ये रथरूपेण विन्यस्तं तस्य कलि
६४ तस्याव्यक्तशब्देन गृहीतेर्ग्रहणादित्यर्थः रूपकात्मना रथात्मना विन्यस्तं रूपकविन्यस्तं शरीरं च
64 तद्रूपकविन्यस्तं च तथोक्तं तस्य गृहीतेरिति विग्रहः कथं शरीरपरोऽव्यक्तशब्दस्तत्राह दर्शयति चे
ति पूर्वापरवाक्यसंदर्भः पर्यालोच्यमानः अप्रचितेन प्रकृतेन परिशिष्टं च शरीरमेवाव्यक्तशब्दबोध्यं
दर्शयतीत्यर्थः ननु स्थूलशरीरस्याव्यक्तशब्दार्हस्य कथमव्यक्तशब्दार्हत्वमित्यत उत्तरं पठति सू
क्ष्मं तु तदर्हत्वात् दर्शयतीत्यनुषंगस्तु शब्दः शंकानिरासार्थः स्थूलशरीरारंभकभूतानां सूक्ष्मं का
रणमव्यक्तशब्देन दर्शयति कुतः तदर्हत्वात् अव्यक्तशब्दार्हत्वादित्यर्थः गोभिः श्रीणीत मत्सरमि
त्यादिवत् प्रकृतिवाचकशब्देन विकारो लक्ष्यत इति भावः गोभिः गोविकारैः पयोभिः मत्सरं सोमं श्री
णीत मिश्रितं कुर्यादित्यर्थः ननु भूतसूक्ष्मस्याव्यक्तस्यांगीकारे आगतः प्रधानकारणवादः सांख्ये
लस्येव प्रधानत्वेनांगीकारादित्यत आह तदधीनत्वादर्थवत् न प्रधानकारणवादो मयांगीकृतः कु
तः तदधीनत्वात् ईश्वराधीनत्वांगीकारः स्वतंत्रं चेतनानधिष्ठितमव्यक्तं जगत्कारणमिति सांख्यमत
सिद्धांते त्वीश्वराधिष्ठितं मायाऽविद्याकाशादिशब्दवाच्यं जगत्कारणमिति महद्वैलक्षण्यं ननु ईश्व
रादेव जगदुत्पत्तावव्यक्तं वैयर्थ्यमित्याशंक्याह अर्थवदिति प्रयोजनवदित्यर्थः देवात्मशक्तिं स्व ६४
गुणैर्निगूढां मायां तु प्रकृतिं विद्यादिति श्रुतिसिद्धं ईश्वरस्य सहकारिभूतमव्यक्तमवश्यमंगीक

64A

तत्वं न शक्तिरहितेश्वरः कार्यलेशं वा कर्तुं समर्थः असंगत्वादिति तात्पर्यं नन्वेवमपि कथं शारी
रस्य महतः परत्वं कथं वा अव्यक्तकार्यत्वं सेंद्रियादीनामविशेषे शारीरस्यैवाव्यक्तपदार्हत्वमिति चे
त् उच्यते सत्यं स्ववाच्यभोक्त्रपेक्षया हिरण्यगर्भबुद्ध्यपेक्षया वा अव्यक्तस्याविद्यायास्तावत् पर
त्वं सर्वेष्टमिदं तदधीनत्वाद्भोक्तुर्देहस्य तथा च तन्निष्ठपरत्वं तद्विकारे देहेऽप्युपचर्यते इंद्रियादीनां तत्कार्य
त्वाविशेषेपि स्वस्वशब्दैरेवोपात्तत्वान्न विशेषात्तत्कृताकांक्षा अव्यक्तशब्देन स्थूलदेहग्रहणं न्याय्यमि
ति आचार्यदेशीयैः सूत्रद्वयमिदमन्यथा व्याख्यातं शारीरं द्विविधं स्थूलं सूक्ष्मं च द्वयमपि पूर्ववा
क्ये रथत्वेन गृहीतं उत्तरस्मिन्वाक्ये सूक्ष्ममेवाव्यक्तशब्देन गृहीतं तदर्हत्वात् तस्यार्थवत्त्वं तदधी
नत्वाद्बंधमोक्षव्यवहारस्येति सर्वथापि प्रधानस्य नात्रावकाशः अपि च ज्ञेयत्वावचनाच्च सांख्यैः
प्रकृतिपुरुषविवेकान्मोक्ष इति वदद्भिः प्रकृतिरपि तदर्थं ज्ञेयत्वेनाभ्युपेता न च ज्ञेयत्वेन प्रकृतेरव्यक्त
मुच्यते अव्यक्तशब्दमात्रश्रवणात् तस्मादपि नाव्यक्तं प्रधानं वदतीति चेन्न प्राज्ञो हि प्रकरणा
त् अत्राह सांख्यः ज्ञेयत्वावचनादित्यसंगतं अव्यक्तशब्दवाच्यस्यैवोत्तरत्र ज्ञेयत्ववचनात्॥
अशब्दमस्पर्शमरूपमव्ययं तथारसं नित्यमगंधवच्च यत् अनाद्यनंतं महतः परं ध्रुवं निचा
य्य तं मृत्युमुखात्प्रमुच्यत इति अशब्दमित्यादिषु प्रत्येकं नित्यमिति संबध्यते नित्यं सर्वदा निचाय्य
ज्ञात्वा यादृशं शब्दादिहीनं प्रधानं तादृशमेव वेदवाक्ये ज्ञेयत्वेन वदतीति चेत् प्राज्ञो हि परमात्मा निचा

वे. स. ६५ वे.

65

ष्यतेनिर्दिष्टः न प्रधानं कस्मात् प्रकरणत्वात् पुरुषान्नपरं किंचित्सा काष्ठा सा परा गतिः एवमस्
वेषु भूतेषु गूढोत्मा न प्रकाशते इत्यादिनात्मन एव प्रकरणात् त्रयाणामेव चैवमुपन्यासः प्रश्न
श्च किंचन प्रधानमव्यक्तशब्दवाच्यं ज्ञेयं वा यस्मात् त्रयाणामेव अग्निजीवपरमात्मनामेव एवं प्र
वृत्तरवाक्यपर्यालोचनया वक्तव्यत्वेनोपन्यासः तद्विषय एव प्रश्नोपि दृश्यते कठवल्लीग्रंथे नान्य
स्य तत्र सतेमग्निः स्वर्ग्यमध्येषि मृत्यो प्रब्रूहि तं श्रद्दधानाय मह्यमित्यग्निविषयः प्रश्नः येयं प्रेते
विचिकित्सा मनुष्ये अस्तीत्येके नायमस्तीति चैके ॥ एतद्विद्यामनुशिष्टस्त्वयाहं वराणामेष वरस्तृती
यः इति जीवप्रश्नः अन्यत्र धर्मादन्यत्राऽस्मात्कृताकृतात् अन्यत्र भूताच्च भव्याच्च यत्तत्पश्य
सि तद्वदेति परमात्मप्रश्नः लोकादिमग्निं तमुवाच तस्मै या इष्टका यावतीर्वा यथा वेत्यग्निविषयमुत्त
रं हंत त इदं प्रवक्ष्यामि गुह्यं ब्रह्म सनातनं यथा च मरणं प्राप्यात्मा भवति गौतम योनिमन्ये प्रप
द्यंते शरीरत्वाय देहिनः स्थाणुमन्येनुसंयंति यथाकर्म यथाश्रुतमिति जीवस्योत्तरं न जायते
म्रियते वा विपश्चिदित्यादि परमात्मनः प्रतिवचनं नह्येवं प्रधानेस्य प्रश्नोत्तरे दृश्यते येनाव्य
क्तशब्दवाच्यं ज्ञेयं वा स्यात् अस्यार्थस्तु हे मृत्यो सः मदर्थं दत्तवरस्त्वं स्वर्ग्यं स्वर्गहेतुमग्नि
मध्येषि स्मरसि तेन त्वेतद्विषयो विशेषोवदेत्यर्थः जीवपरमात्मप्रश्नौ पूर्वं व्याख्यातौ लोका
दिं लोकानां विराड्दृष्ट्योपास्यत्वा लोकादिं तमग्निमुक्तवान् नचिकेतसे याः स्वरूपेणेष्टका यादृशी

शि ६५

65A

यावतीः संख्योक्तः यथा वाग्निश्चीयते तत्सर्वमुवाचेति संबंधः हंत इदानीं गुह्यं गोप्यं चिरंतनं ब्र
ह्म प्रवक्ष्यामि सुपक्रमं जीवतपि ब्रवीति यथेति आत्मा जीवो मरणं प्राप्य यथा भवति तथा वक्ष्या
मीति योजना कथं भवतीत्यत आह योनिमिति मृतानां पुनर्विचित्रजन्मायत्तौ निमित्तमाह॥
यद्यप्यस्मिन् कठवल्लीग्रंथे जीवपरमात्मनोः पृथक्प्रश्नौ न स्तः वरान्वृणीष्वेति मृत्युनाप्र^
रितेन नचिकेतसा पितुः सौमनस्याग्निविद्यात्मविद्याख्यवरत्रयमेव पृष्टमिति वराणामेष वर
स्तृतीय इति लिंगालिखितत्वात्तथापि जीवपरयोः कल्पितभेदापेक्षयात्मयात्रयाणामित्युक्तो^
सूत्रकारैः वस्तुतस्तु येयं प्रेते इत्यादिना पृष्टस्यैवात्मनोऽन्यत्र धर्मादित्यादिना धर्मविशेषपुर
स्कारेणानुकर्ष इत्येक एव प्रश्नः भेदस्य च कल्पितत्वं वाक्यपर्यालोचनयावगतं तथा हि यदेवेह
तदमुत्र यदमुत्र तदन्विह मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यतीति जीवप्राज्ञभेददृष्टिम
पवदति इह देहे यच्चैतन्यं तदेवामुत्रादित्यादाव संसारिब्रह्म यच्चामुत्र तदेवेह देहेनु प्रविष्ट
मित्यन्यैत्यैकामित्यर्थः अभेदं दृष्ट्वापि तु भेदं निंदति मृत्योरिति यः कश्चिन्मूढः इह ब्रह्मा पुनः
त्मनि नानेव मिथ्याभेदं पश्यति वस्तुतो हि भिन्न इति स मरणान्मरणं पुनः प्राप्नोति न सुखभा^
गीत्यर्थः तथा जीवप्रश्नानंतरमस्य वरं नचिकेतो वृणीष्वेत्यारभ्य मृत्युना नैकैः कामैः प्रलो
भ्यमानोऽपि नचिकेता यदा न चचाल तदैनं मुमुक्षुतमं मत्वा विद्याभीप्सितं नचिकेतसं मन्ये न त्वा का^

वे॰सू॰ मावहवोलोलुयंतेति प्रश्नस्य प्रश्नमपि तदीयप्रशंसन्यवचनं दुर्दर्शं गूढमनुप्रविष्टं गुहाहितं गह्व
६५ वृ॰ रेष्ठं पुराणं अध्यात्मयोगाधिगमेन देवं मत्वा धीरो हर्षशोकौ जहातीति येनापि जीवप्राज्ञयोर
भेद एवेति गम्यते यद्युभयोर्भेदः तदा जीवप्रश्नानंतरं प्रशमाविफलेवरणात् मृत्युर्यस्त्वावह
66 वोपिकामानोलोलुयंते श्रेयोविच्छेदं न कृतवनः ततो विद्यार्थिनं त्वां मन्ये हमिति न यत्र भेदमि
ष्यातेविवादः यतो जीवप्रश्ने परमात्मानं प्रतिपादयति उभयोर्भेदेनातिके उन्मत्तप्रलापो भ
वेदित्येवमादीनि वाक्यानि भेदमिष्यातेत्रोध्यानि महद्वच्च किंच यथा बुद्धेरात्मा महानपरः
वेदाहमेतं पुरुषं महांतमित्यादौ वेदेष्वतो महच्छब्दो बुद्ध्यावच्छिन्नोयतत्ववाचीनांगीक्रियते सां
ख्यैः तथा वैदिकः अव्यक्तशब्दो नाऽप्रकृतप्रधानवाची तस्मात् कृतशरीरपरमेवाव्यक्तपदं इत्यऽ
शब्दं तत्प्रधानस्येति सिद्धं॥ चमसवदविशेषाच पूर्वमव्यक्तशब्दमात्रे प्रत्यभिज्ञानेन प्रधानस्या
र्थतोऽप्रत्यभिज्ञानादव्यक्तपदवाच्यत्वे पित्रिगुणत्वादिना अजामंत्रेर्थतः प्रत्यभिज्ञानादजाप
दं प्रधानपरमस्तिति प्रत्युदाहरणसंगत्यास्यारंभः अध्यायपादसंगतिफलानि पूर्ववद्बोध्या
नि श्वेताश्वतरोपनिषदि श्रूयते अजामेकां लोहितशुक्लकृष्णां बह्वीः प्रजाः सृजमानां सरूपां
अजो ह्येको जुषमाणोऽनुशेते जहात्येनां भुक्तभोगामजोऽन्यः इति तत्र संशयः किमजाशब्देन प्रधा
नमुच्यते उत तेजोबन्नात्मिका चतुर्विधसिद्धांतां तरप्रकृतिरिति न त्र न जायत इत्यजेत्यजामोक्षसिद्धा ६५

66A

प्रकृतिरेव रजःसत्वतमोगुणात्मकत्वाल्लोहितशुक्लकृष्णा च भवति किंच एकोऽजः पुरुषोऽनुशया
णः सेवमानः कार्यकारणसंघाताभिमानीतियावत् सत्तामनुशेते तामजां भ्रमेणात्मत्वेनाव
गम्य तत्कार्यबुद्धिनिश्चयसुखदुःखादिकमनुभवति अहं सुखी दुःखीति अन्यस्तु विवेकी भुक्तभो
गां कृतभोगविवेकत्तां नां जहाति नित्यमुक्तत्वान्मुच्यत इति जीवभेदप्रतिपादनादजा प्रधानमिति नाश
ङ्क्यं प्रधानमित्येवं प्राप्ते ब्रूमः न प्रधानस्यासाधारण्येनात्र प्रमापकमस्ति न जायत इत्यजेत्यस्य
त्राऽपि यौगिकत्वेनाशक्यत्वात् लोहितादिपदानामपि रूपविशेषेषु रूढेः न रजआदौ प्रयोगः कथंचि
त्रूपणमप्यवापितत्वे साधारणस्थले इदमेव मन्त्रस्य दर्शाच्यमिति निर्धारणाभावे दृष्टान्तः चमस
वदिति यथार्वाग्बिलश्चमस ऊर्ध्वबुध्न इत्यस्मिन्मन्त्रे अयं चमस इत्यवधारणं न संभवति कथं॥
चिदर्वाग्बिलत्वादेरन्यत्राप्यविशेषात् एवमजामन्त्रेऽप्यजात्वादेरविशेषान्न प्रधाननिर्णय इत्य
शक्यं प्रधानमित्यर्थः ननु इदं तच्छिर एष ह्यर्वाग्बिलश्चमस ऊर्ध्वबुध्न इति वाक्यशेषात् शिरश्च
मस इति निर्णयो भवति इह त्वजामन्त्रे केयमजा प्रतिपत्तव्येत्याशंकायां सजातीयकस्य तरान्ते ज्यो
वन्नलक्षणजा प्रतिपत्तव्येत्स हृदयवाचामिति न्यायेन ह ज्योतिरुपक्रमा तु तथा ह्यधीयत एके
ज्योतिसि जउपक्रमे त्र्यादौ यस्मात्तेजोवन्नलक्षणायाः सा ज्योतिरुपक्रमा तवरधारणे सवेह
जानिधारणीया न प्रधानं कस्मात् तथा ह्यधीयत एके हि यस्मादेके छंदोगास्तेजोवन्नात्मि

दं
स्द्दे्वे
67

कायाभौतिककार्यप्रकृतेस्तस्या लोहितादिरूपनामधीयते स्मामनन्ति यदग्ने रोहितं रूपं तेजसस्त
द्रूपं यच्छुक्लं तदपां यत्कृष्णं तदन्नस्येति तथा च लोहितशब्दं सामान्यान्यान्येव तेजोबन्नानीह प्रभिधा
यते यद्वास्यत्रैव श्वेताश्वतरोपनिषदि पूर्वापरपर्यालोचनायामस्य निर्विच्य मायायाः जगत्कारण
त्वप्रतीतेस्तस्यास्त्वजाशब्देन ग्रहणं तथाहि किंकारणं ब्रह्मेत्युपक्रम्य ते ध्यानयोगानुगता अ
पश्यन् देवात्मशक्तिं स्वगुणैर्निगूढामिति वाक्योपक्रमे ईश्वरशक्तिर्मायाख्या जगद्धेतुत्वमाम्न
ते वाक्यशेषेऽपि मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरमिति यो योनिं योनिमधितिष्ठत्येक
इति च तस्या एवावगतिः न स्वतन्त्रप्रधानस्येति अक्षरार्थस्तु ब्रह्मणः श्रुतत्वाज्जगद्धेतुत्वमिति
श्रुतिर्ब्रह्मवादिनः प्रतिशंकते किंकारणमिति यज्जगत्कारणं तत्किं ब्रह्म वा अन्यद्वेत्यर्थः यद्वा ज
गद्धेतौ किमुपकरणं च ब्रह्मेत्यर्थः ते पृष्टाः ब्रह्मवादिनोऽनया रीत्या विस्तरस्य यथा नान्येन योगेना
नुगताः परमात्मानमनुप्रविष्टाः सन्तस्तस्यैव देवस्यात्मभूतामैक्येनात्तां मायाशक्तिं गुणत्र
यवतीं त्रिगुणस्य जगतो निर्माणे सहकारिणीमपश्यन्निति योजना प्रधाने मायाशब्दं वारयति मा
यिनमिति अविद्याशक्तियोनिः तस्या एकत्वेऽपि कार्यभेदेन भेदाद्वीप्सा तदुक्तं सुरेश्वराचार्यैः
स्वतन्त्रविद्याभेदोऽत्र मता तावन्न विद्यत इति अधितिष्ठति प्रेरयति न द्वितीयपरमतेरीश्वरस्य तद
धिष्ठानत्वसम्मतमिति रहस्यं न च अजाशब्देनाना वतेजोबन्नात्मिका या प्रकृतौ रूढः छागादावि शि ढ्ढ्

67A

वाजात्वजासाधारत्वाभावात् नापि यौगिकः जनिमत्वात्तेजोवन्नानामित्यत आह कल्पनोपदेशाच्च
मध्वादिवदविरोधः चशंकानिवृत्त्यर्थः तेजोवन्नात्मिकायां प्रकृतौ नाजाशब्दस्यानुपपत्तिः कुतः
कल्पनोपदेशात् यथा लोके प्रसिद्धामजां भुक्तभोगामेकस्त्यजतिस्त्वन्यस्तामनुवर्तते एवं त्यागभो
गयोः कार्यकारणसंघातानामुपादानभूतायास्तेजोवन्नात्मिकायाः प्रकृतेः साम्यद्योतनार्थं कल्प
नयाजात्वस्योपदेशात् यथा मधुभिन्नस्यादित्यस्य असौ वा आदित्यो देवमध्विति मधुत्वोपदेशो यथा
वा धेनुभिन्नाया वाचो धेनुत्वोपदेशः एवमजाभिन्नायाः प्रकृतेरजात्वोपदेशे न कश्चिद्विरोधः यदु
क्तं जीवभेदोऽस्मिन्मंत्रे प्रतिपाद्यत इति तत्र लोकसिद्धभेदानुवादेन बंधमोक्षव्यवस्थापरत्वादस्य
मंत्रस्य एको देवः सर्वभूतेषु गूढः इत्यादिनात्मैकत्वावगमात् तस्मान्नात्र प्रधानस्यावकाश इत्यशब्दं
प्रधानमिति सिद्धं न संख्योपसंग्रहादपि नानाभावादतिरेकाच्च पूर्वमाध्यात्मिकाधिकारे प्रति
हृच्छागोग्रहणयोगाद्धतानजन्यादिके सूक्ते संख्याभिमतपंचविंशतितत्त्वानां ग्रहणमस्तीति द
षात् संगत्यास्यारंभः फलं पूर्ववद्दृष्टव्यं बृहदारण्यके षष्ठाध्याये श्रूयते तद्देवा ज्योतिषां ज्योतिरा
युर्होपासतेऽमृतमित्यनंतरं यस्मिन्पंच पंचजना आकाशश्च प्रतिष्ठितः तमेव मन्य आत्मानं वि
द्वान्ब्रह्मामृतोऽमृतं प्राणस्य प्राणमुत चक्षुषश्चक्षुरुत श्रोत्रस्य श्रोत्रं मनसो ये मनो विदुस्ते नि
चिक्युर्ब्रह्म पुराणमग्र्यमिति परमार्थतोऽस्यार्थः ज्योतिषां सूर्यादीनां ज्योतिर्भासकं तद्ब्रह्म देवा

वे॰ सू॰ दे॰ ६७

68

उपास्तते अमृतेनामृतत्वेन च ते नोपासते नायुष्मंतो जना इति एवं वाक्यार्थः सूर्यादिज्योतिरेकं
पूर्वोक्तं प्राणस्य प्राणमित्यादिवाक्यशेषगतास्मृत्वा प्राणादयः पंचेति मिलित्वा पंचजनाः पंच
पंचजनशब्दो वयवार्थमनपेक्ष्य पुरुषमात्रे वृत्तिर्लोके अत एव सुःपुमांसः पंचजना इत्य
मरो जगाद प्रकृते च पुरुषग्रहणे वा कास्य निर्ज्ञातस्य पत्त्या तत्संबंधि प्राणादयो गृह्यंते पं
चजनशब्देन नेकतीमाकांक्षायां पंच निमे व्याप्रवर्णां तथा च पंच पंचजना आकाशश्चाविद्या
ख्यो यस्मिन्प्रतिष्ठितस्तमेव नित्यं प्रपंच ब्रह्मात्मकममृतमात्मानमन्य इति मंत्रदशायाज्ञवल्क्ये
नोक्ते जनकः पप्रच्छ वदिह रेव त्वं किं विद्वान्मृतत्व्याद्यमात्मीरीति नेत्याह विद्वानमृत इति अस्मी
तिशेषः अविद्यायाकल्पितं मर्त्यत्वमिति भावः प्राणादीनां जीवनोदिप्रदं तं परं ब्रह्म ये ते विदुस्तेन
स्वस्वरूपं पुराणं चिरंतनं अग्रे कार्यदशायामप्यलुप्तत्वेन भवमग्र्यं ब्रह्मनिचिक्युर्निश्चयेन ज्ञात
वंत इति तत्र किं पंचजनशब्देन मूलप्रकृत्यादीनि पंचविंशतितत्वान्युच्यंते उत वाक्यशेषगताः
प्राणादय इति संशये तत्वानीति प्राप्ते तथा हि मूलप्रकृतिरविकृतिर्महदाद्याः प्रकृतिविकृतयः
सप्त षोडशकश्च विकारो न प्रकृतिर्न विकृतिः पुरुष इति सांख्यानि तानि पंचविंशतितत्वान्युच्यंते पं
चपंचजना इति पंचानां जनानां मा गाद्दिम पंचपदेन पंचत्वोक्तौ पंचविंशतिर्जनाः संपद्यंते ते ज
नाः कतीमाकांक्षायां संख्येयास्ते निसंख्यातानि पंचविंशतितत्वानि संबध्यंते इति नाशंक्यं प्रधानमि

नि॰ ६७

68A

ति स्मृत्यर्थमुक्त मूलप्रकृतिः प्रधानमविकृतिः अनादित्वान्महदहंकारौ पंचैव सूक्ष्माणि पंच
तन्मात्रसंज्ञानि च सप्त महदाद्याः प्रकृतयो विकृतयश्च तत्त्वांतरोपादानत्वं प्रकृतित्वं अस्ति हि
महतो बुद्ध्याख्यस्याहंकारतत्त्वं प्रत्युपादानत्वं प्रधानापेक्षया विकृतित्वं एवं पूर्वापेक्षया विकृति
त्वमहंकारादीनां द्रष्टव्यं प्रकृतित्वं चाहंकारस्य पंचतन्मात्राणां एकादशेंद्रियाणां चोपादान
त्वात् पंचतन्मात्राणां च आकाशादिमहाभूतप्रकृतित्वं षोडशकस्य षोडशसंख्यावच्छिन्नस्य ए
कादशेंद्रियपंचमहाभूतसमुदायस्य विकारत्वमेव न प्रकृतित्वं पुरुषस्तु कूटस्थ इति अ
त्राऽभिधीयते अस्मिन्मंत्रे श्रूयमाणया पंचविंशतिसंख्यया स्मृतिप्रसिद्धानां पंचविंशतित
त्त्वानां उपग्रहात् प्रधानशब्दवत्त्वमित्यपि न कुतः नानाभावात् अस्मिन्मंत्रे सर्वनाम्ना आकाशशब्दे
न चात्माकाशयोः पृथक् श्रूयमाणत्वात्तौ विहाय गुणत्रयो महदादयो द्वाविंशतिः संभूय पं
चविंशतिसंख्याया वक्तव्यः तथा च पंचानां पंचकानामेकपंचकपर्याप्तस्य पंचकव्यावृत्तध
र्मवत्त्वाभावेन नानाभावात् पंचपंचजना इत्यनेन पंचानां पंचकानां ग्रहणमिति प्रतिपादनमका
समर्थनं लोके क्षिणी पंचकं ब्राह्मणपंचकं चेति पंचकद्वयमिति वक्तुमुचितं एकपंचपर्याप्तान्य
पंचकव्यावृत्तगोत्वाद्यर्धर्मत्वादित्यर्थः नानात्वेऽपि कथंचित्पंचविंशतिसंख्याप्रतिपादकत्वांगी
कारे वाचकांतरमाह अतिरेकाच्चेति न ह्यस्मिन्मंत्रे पंचविंशतिसंख्यैव श्रूयते किंतु अतिरिक्ता

ब्र॰ वे॰
६८
सं॰

69

त्माकाशावपिस्रुष्येते तथाच्चतयोः पंचविंशतित्वातिरिक्तत्वात्सप्तविंशतितत्वप्रसङ्गावपसिद्धां
तापातः नग्रणानित्वविवुक्षयापंचविंशतिसंख्यापरगणनत्तत्वातिरेक इतिवाच्यं तथासत्या
त्माकाशयोः पृथक्कथनवैयर्थ्यानकश्चिद्भेदोपजानापेक्षयात्मनः पृथक्त्वेनकथनस्य
सार्थकत्वेपिआकाशस्यपृथक्कथनंनिष्फलमेवेतिभावांवस्तुतोत्रपंचविंशतिसंख्याप्रती
तिरेवनास्तीत्यपिशब्देनसूचयति पंचजनशब्दस्यैकत्वेनयोगमनपेक्ष्यपुरुषेषुरूढत्वात्॥
तेकतीत्याकांक्षायांपंचत्वसंख्यानवयात् अन्यथापंचजनाइत्यत्रपदभेदांगीकारेप्रधानजना
नप्रतिगुणत्वेनान्वितस्यपंचत्वस्याप्यपंचत्वेनान्वयायोगेवाक्यभेदः गुणयोःपरस्परान्वयादर्श
नात् उभयोःपंचयोः प्रधानजनान्वयसंभवेपिजनेषुदर्शितसंख्याप्रतीतिरेवनपंचविंशतिसं
ख्याप्रतीतिरितिनशब्दवत्प्रधान नतुतेचपंचत्वसंख्याकाः पंचजनाः कइतिसहरूपप्रश्न
स्योत्तरमाह प्राणादयोवाक्यशेषात् माध्यंदिनेशाखायांपंचजनमंत्रानंतरमंत्रेप्राण
चक्षुः श्रोत्रान्नमनोसिच्छ्रूयमाणानिपंचजनशब्देनोच्यंते कस्मात् वाक्यशेषात्प्राणस्य
प्राणमुतचक्षुषश्चक्षुरुतश्रोत्रस्यश्रोत्रमन्नस्यान्नंमनसोऽपनोयेविदुरितिवाक्यशेष
स्थत्वादित्यर्थः ननुमाध्यंदिनानांप्राणादिषुत्रस्याम्नानामस्तुवतुपंचसंख्याकाण्वानांतुअन्ना
म्नानात्कथंपंचसंख्येत्यतआह ज्योतिषैकेषाममसत्यन्ने एकेषांकाण्वानामसत्यन्नेतद्वा ६८

69A

ज्योतिषांज्योतिरायुर्होपासतेमृतमिति पूर्ववाक्यस्थज्योतिषां पंचत्वपूरणीयमित्यर्थः तस्मादशब्दं प्र
धानमितिसिद्धं कारणत्वेनचाकाशादिषु यथाव्यपदिष्टोक्तेः पूर्वाधिकरणत्रयेण प्रधानस्याशब्द
त्वप्रतिपादनादयउक्तः समन्वयः संभवति तेषांवेदान्तानांपरस्परविरुद्धार्थप्रतिपादकत्वेन तत्त्वाभावार्थेऽनि
र्णायकत्वाभावादनुमानसिद्धप्रधान लक्षकत्वेउक्तसमन्वयासिद्धेरित्याशंकानिराशार्थमिदमार
भ्यते नचविरोधार्थमधिकरणेनेहसंगतमितिवाच्यं समन्वयेनोवाक्यार्थत्वानेस्मृत्यादिमानांतर
विरोधाशंकानिरासस्याऽविरोधाध्यायार्थत्वादिहतुकारणविषयवाक्यानामेवमिथोविरोधात्त
समन्वयोब्रह्मणीत्याशंकातन्निरासेनैवसमन्वयस्यसाधनादध्यायसंगतिःसिद्धे अतस्तदस्ववा
ह्याभ्युपेतासत्यरत्वनिराकरणेन समन्वयस्यापनात्पादसंगतिर्बोध्या पूर्वपंचसंख्याघटनामन्त्रे
नज्योतिषांवेतिविकल्पस्याऽविरोधेपिप्रकृतेसिद्धेकारणात्मकवस्तुनिविकल्पायोगाद्विरोधे सत्य
प्रामाण्यंवाक्यानामितितन्निरासायप्रधानस्यकारणत्वमितिप्रत्युदाहरणलक्षणाऽवांतरसंगतिः
पूर्वोत्तरपक्षयोः समन्वयासिद्धिस्तत्सिद्धिः फलमितिविवेकः अत्रजगत्कारणवादिवाक्यानिब्र
ह्मणिमानंनवेति विशयेनेति प्राप्ते कस्मात्परस्परविरोधदर्शनात् तथाहि क्वचिदात्मनः आका
शसंभूतइत्याकाशपूर्विकासृष्टिः श्रूयते क्वचिच्चतत्तेजोऽसृजतेति तेजआदिका क्वचित्सप्राणम
सृजतेति प्राणादिका क्वचिदक्रमेवसृष्टिः श्रूयते सइमांल्लोकानसृजत अंभोमरीचिमरमाप इतिस

वे॰सू॰ ६६ वं

70

ईक्षितापरमात्मा लोकानेवासृ अंभ इति अम्भेयशरीरप्रचुरस्वर्गो लोकोऽंभः शब्दार्थः रश्मिप्रधानां
नरिक्षलोको मरीचिः मरणप्रधानोऽयं लोको मरः अबहुलः पाताललोकः अप इति विवेकः ए
वं सृष्टौ विगानेन तत्कारणत्वलक्षितब्रह्मणि विगानं माभूदपि जगत्कारणे विगानं दृश्यते असद्वा इदम
ग्र आसीत् ततो वै सदजायतेत्यसतः कारणत्वं क्वचिदवगम्यते एवमसदेवेदमग्र आसीत्तत्सदासीत्त
त्सममभवदिति वक्षतोऽयमर्थः इदं जगदग्रे प्रागवस्थायामसदिवाव्यक्तमासीत् ततोऽनभिव्यक्तना
मरूपादव्यक्तात्कारणादभिव्यक्तनामरूपादव्यक्तात्कारणादभिव्यक्तनामरूपं जगज्जातं अव्यक्तमे
वव्यक्तं भवतीति यावत् तत्कारणं यदात्मना सममभवत्तत्सदर्थक्रियोन्मुखमासीदिति क्वचित्तद्धैक आ
हुरसदेवेदमग्र आसीदिति समाहारमुपन्यस्य कथमसतः सज्जायेतेति तन्निरस्य सतः कारणत्वमाह स
देव सोम्येदमग्र आसीदिति क्वचित्स्वतःकर्तृकैव सृष्टिः श्रूयते तद्धेदं तर्ह्यव्याकृतमासीत्तन्नामरूपाभ्या
मेव व्याक्रियते तदिदं जगत्तर्हि तदा प्रागवस्थायामव्याकृतं कारणमासीत्तत्कलितशब्दात्मनार्था।
त्मना च व्याक्रियत व्यक्तमभवदित्यर्थः एवं परस्परविरोधात्त्व ब्रह्मणि समन्वयो वाक्यानां किंत्वन्नमा
नाद्यसिद्धप्रधानलक्षणमिति प्राप्ते ब्रूमः कार्यविषयं विगानमक्रमादिप्रयुक्तं न तु यदस्मृतेरित्यादि
नापरिहृतमिष्यमाचार्यैः अत्र तु कारणविगानं परिहरतीति चशब्दस्तुशब्दसमानार्थकः शंकानिरा
संवर्तिब्रह्मणः कारणत्वे विरोधो नास्ति कुतः यथाव्यपदिष्टोक्तेः आकाशादिषु यथाभूतेश्वरः का ६६

70A

रणत्वेनव्यपदिष्टः एकस्मिन्वेदान्तेतथाभूतस्यैवापरवेदान्तेऽसत्त्वेनेत्यर्थः नचक्वचिदसतः
कार्यस्यभावादुत्पत्तिश्रवणात् विरोधइतिवाच्यमित्याहसूत्रकारः समाकर्षात् असन्ने
वसभवतिअसद्ब्रह्मेतिवेदचेत्तस्मसद्वादमयोग्यमस्तिब्रह्मेतिचेद्वेदेति सदात्मानंनिर्धार्य
यसोऽकामयतेतिमृतः सकाशात् सृष्टिमुक्त्वा तत्सत्यमित्याचक्षतइतिसदात्मानमपसं
हृत्यतदप्येषश्लोकोभवतीतिप्रकृतेसदात्मनिश्लोकमुदाहरति असद्वाइदमग्रआसीदि
ति तथाचासच्छब्देनसतएवसमाकर्षाच्चासतः कारणत्वशंकेत्यर्थः यद्यस्मिन्श्लोकेनि
रात्मकमसदुच्यतेतदान्यसमाकर्षणेनान्यस्योदाहरणस्य कृतांसवद्धः श्लोकश्चापद्येत
एकमसदेवेदमग्रआसीदित्यत्रापितत्सदासीदितिसमाकर्षादनभिव्यक्तमानरूपमसच्छ
ब्देब्रह्मैव एवंतदिदंतर्ह्यव्याकृतमासीत्तन्नामरूपाभ्यामेवव्याक्रियतेत्यत्रापिसएषइहप्र
विष्टआनखाग्रेभ्यइतिप्रकृतपरामर्शिनासइत्यनेनात्मनः समाकर्षणात् नस्वभावादे
वजगदुत्पत्तिः व्याक्रियतेकर्मणिएवकर्तृत्वेबोधकलकारोलूयतेकेदारः स्वयमेवेतिव
त्समयिपृथक्कर्तारंनविहन्यते यथाकर्मणिचायंलकारोगम्यतेग्रामइत्यादिवद्दृष्ट
व्यः एवंब्रह्मणःकारणत्वेनकश्चिद्विरोधः नापिसृष्टिविरोधात्तत्कारणेब्रह्मणिविरोधः सृ
ष्टिवाक्यानांनिष्प्रपंचब्रह्मपरत्वेनसृष्टेनामर्थाभावात् श्रुतिरपिनिष्फलसृष्टेःफल

वे.सू. ७० ह वद्ब्रह्मप्रतिपत्त्यर्थमेवं दर्शयति अन्नेन सोम्य शुङ्गेनापो मूलमन्विच्छाद्भिः सोम्य शुङ्गेन तेजो मू-
लमन्विच्छ तेजसा सोम्य शुङ्गेन सन्मूलमन्विच्छेति शुङ्गं कार्यं सन्मूलं ब्रह्म तस्मात्त्वकेनापि विगा-
नमिति जगत्कारणवाक्यानां ब्रह्मणि समन्वयः सिद्धः जगद्वाचित्वात् एवं द्विमार्गेणावृत्तर-
७१ षिणा बालाकिनाऽजातशत्रुणा काश्यराज्ञः संवादः श्रूयते कौशीतकीब्राह्मणे बालाकिर-
जातशत्रुणा ब्रह्म वेदनं ब्रह्मणि संवदितुं ब्रह्म ते ब्रवाणीत्युपक्रम्यादित्यादिपुरुषान् जीवानुक्त्वा
तूष्णीं बभूव तमजातशत्रुर्मृषावादिनं पापीयोऽयमिति शिष्यभूताय गार्ग्याय ब्रह्मोपदेशार्थमिदमाह॥
यो वै बालाक एतेषां पुरुषाणां कर्ता यस्य वैतत्कर्म स वै वेदितव्य इति अत्रास्यार्थः हे बालाके त्व-
या ये पुरुषा आदित्यादिगता ब्रह्मत्वेनोक्तास्तेषां यः कर्ता न केवलं जगदेकदेशपुरुषकर्ता अपि
तु सर्वस्यैव जगतस्तस्मादाह यस्येति कर्मपदं जगद्वाचि एवं सामान्यविशेषाभ्यां जगत्कर्ता सलो-
निकृष्टोऽन्ये यस्मादाह स इति एवमस्य संगतिः पूर्वं सकृच्छब्दात्तदेककोऽस्याः सकृच्छब्दो नीतः इह तु
बालाकिवाक्यस्य ब्रह्मशब्दादजातशत्रुवाक्यस्य कर्मशब्देन शक्यते तदनुगुणतया नेतुं वाक्य-
भेदादिति प्रत्युदाहरणं यद्वा वाक्याभेदेऽपि यथोत्तरसकृच्छब्देन प्राचीनासकृच्छब्दो नीतस्तथोत्तरक-
र्मशब्देन तदनुगुणतया ब्रह्मशब्दो नेय इति दृष्टान्तसंगतिः उक्तवाक्यसमन्वयासिद्धिस्तत्सि-
द्धिः पूर्वोत्तरपक्षयोः फलं बोध्यं एवं स्थिते संशयः किमत्र पुरुषाणां कर्ता वेदितव्यः प्राणः श्री. ७०

71A उतजीवःस्राहोस्वित्परमात्मेतिप्राणइतितावत्प्राप्तंकुतः यस्यवैतत्कर्मेतिचलनात्मकस्यकर्मणो
वायात्मकप्राणस्यैवसंभवात् वाक्यशेषेचाप्यस्मिन्प्राणएवैकधाभवतीतिप्राणशब्दश्रव
णात् जीवोवानलिंगस्यापिवाक्यशेषेदर्शनात् तद्यथाश्रेष्ठीस्वैर्भुंक्तेयथावास्वाः श्रेष्ठिनंभुंज
तेएवमेवैषप्रज्ञात्मातैरात्मभिर्भुंक्तेएवमेवैतआत्मानंभुंजंति अयमर्थः श्रेष्ठीप्रधानःपुरु
षःस्वैर्भृत्यैःसहपकरणैर्भुंक्तेभृत्याअपशनाच्छादनादिनाप्रधानमुपजीवंति एवंजीवोप्यादि
त्यादिभिःप्रकाशादिनाभोगोपकरणैर्भुंक्तेभृत्यवदादित्यादयोपिदेवाजीवंदत्तविग्रहणंदुप
जीवंतीतिप्राणभृत्वाज्जीवस्यैवभोगउपपन्नः तस्माज्जीवमुख्यप्राणान्यतरस्मन्वितमिदंवा
क्यमितिप्राप्ते ब्रूमः अत्रवेदितव्यःपुरुषाणांकर्तापरमात्मैव तथाहिब्रह्मनेब्रवाणीतिउप
क्रम्यबालाकिनादित्याद्यमुख्यात्मसत्त्वेपुरुषस्तुनममुख्यात्मवादितयायोयाजातशत्रुणाव
दितव्यतयोपदिष्टः पुरुषकर्ताजीवोमुख्यप्राणोवानहिभवितुमर्हतीति तथात्वेगार्ग्योपेक्षा
याजातशत्रोरविशेषप्रमाणात् पुरुषकर्तृत्वंचपरमात्मनोऽन्यत्राजमानस्संभवस्यैवनच।
कर्मशब्दानुपपत्तिः क्रियतइतिव्युत्पत्त्याकर्मशब्दस्यजगद्वाचित्वात्प्रसक्ताद्युपस्थितेजगदे
वदितिसर्वनाम्नायपरामृष्टमाति नचजगदंतर्भूतंतर्भूतपुरुषकर्तृत्वंपृथक्नवक्तव्यमितियुक्तं॥
गार्ग्येणब्रह्मत्वेनोक्तपुरुषाणांअब्रह्मत्वद्योतनायगोबलीवर्दन्यायेनपृथगुक्तिसंभवादिति॥

वे.सू. जीवमुख्यप्राणलिंगान्नेति चेन्न तद्व्याख्यातं नन्वत्र जीवलिंगान्मुख्यप्राणलिंगाच्च न ब्रह्मपरत्वाव
७१ धारणमिति चेत् न तद्व्याख्यातं प्रतर्दनाऽधिकरणे उपासात्रैविध्यादाश्रितत्वादिह तद्योगादित्यत्रा
३ विहत्वतया जीवमुख्यप्राणलिंगं ब्रह्मपरं व्याख्यातमित्यर्थः जीवप्राणपरत्वेऽभ्युपगम्यमाने
72 ब्रह्मपरत्वस्यावश्यकत्वात् कहोवाक्ये विधेयस्यादित्येव दोषस्तत्रोक्तः प्रकृतेऽपि समान इति भावः
प्रतर्दनविचारे कर्मपदस्याविचारादगतार्थं तादृष्ट्यः अन्यार्थं तु जैमिनिः प्रश्नव्याख्याना
भ्यामपि चैवमेके जैमिनिराचार्यो निराचार्योऽस्मिन्नधिकरणे जीवपरामर्शमन्यार्थं ब्रह्मप्रतिप
त्त्यर्थं मन्यते अतो ब्रह्मपरमेवेदं वाक्यं कुतो मन्यते प्रश्नव्याख्यानाभ्यां आत्मजिज्ञासु
बालाकिमादायाजातशत्रुः सुप्तपुरुषसमीपं गत्वा हे सोमराजन् इति संबोधनया ह्यानश
ब्दाश्रवणात्प्राणादीनामभोक्तृत्वं प्रतिपाद्य यष्टिघातोत्थापनेन प्राणादिव्यतिरिक्ते जीवे प्रति
बोधिते पुनर्जीवातिरिक्ताऽधिकरणभवनाऽपादानविषयाः प्रश्नाः स्वयमेव चकार क्वैष एतद्बा
लाके पुरुषोऽशयिष्ट क्व वा एतदभूत् कुत एतदागादिति अयमर्थः भो बालाके शयनमेतद्य
था तथैतत्पुरुषः कस्मिन्नधिकरणे ह्यपेशयने कृतवानित्यधिकरणप्रश्नार्थः एतद्भवनमे
कीभावो यथा स्यात्तथा क्वाश्रये स्थितो भूदिति भवनाश्रयप्रश्नार्थः शयनभवनयोरधारं हृ
त्वाऽस्मादावस्थायामागमनापादानं पृच्छति कुतः इति एतदागमनं यथा कस्मादुद्भौ ७१

72A

ध्यावस्थायामगात् उत्थानेकृतश्चानिमर्थः एतत्प्रश्नोत्तरदानासमर्थं बालाकिं मत्वा स्वयमेवोत्तरमाह ॥
यथासुप्तः स्वप्नं न कंचन पश्यत्यथास्मिन्प्राण एवैकधा भवतीत्यादिना शयनयोराधारे उत्थानोपाद
ने च प्राणशब्दवाच्यः परमात्मैवेत्यर्थः तस्माद्यस्मिन् जीवस्य मोक्षः शयनभुवने यस्माच्चास्य
नमेकीभावभूपारूपं सोऽत्र परमात्मा वेदितव्य इत्युपदिष्टः पुरुषवक्ता अपि चैवमेके वाजसने
यिनो मावालाकाजातशत्रु संवादे एवं समस्तं विज्ञानमयं जीवं तत्र्यतिरिक्तं परमात्मानमामनंति
य एष विज्ञानमयः पुरुषः क्वैष तदाभूत्कुत एतदागादिति प्रश्ने य एषोऽन्तर्हृदय आकाशस्तस्मिञ्छेत
तेरस्तु तरे च आकाशः शः परमात्मेति दहराधिकरणे निर्णीतं तस्मात्पुरुषकर्तृत्वेन वेदितव्यः प
रमात्मनि कौशीतकिब्राह्मणवाक्यसमन्वितमिति सिद्धं वाक्यान्वयात् सर्वं ब्रह्मोपक्रमसामर्थ्या
त ब्रह्म परत्वमुक्तं तद्धितद्वदेव मन्येय्यावास्यस्यावाक्यस्य जीवोपक्रमसामर्थ्यात् जीवपरत्वमस्तीति
दृष्टांतसंगतिः फलं पूर्ववत् बृहदारण्यके श्रूयते स होवाच न वा अरे पत्युः कामाय पतिः प्रि
यो भवत्यात्मनस्तु कामाय पतिः प्रियो भवतीत्युपक्रम्य पतिजायापुत्रपशुवित्तादिप्रपंचस्यात्मा
र्थत्वेन प्रियत्वमुक्त्वानन्यार्थतया निरुपाधिप्रियत्वेनातिशयेन दात्मनो श्रोतव्यतामाह या
ज्ञवल्क्यः आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यो मैत्रेय्यात्मनो वा अरे दर्शने
न श्रवणेन मत्या विज्ञानेनेदं सर्वं विदितमिति अत्र संशयः किं जीवो त्र द्रष्टव्यत्वादिरूपेणोपदि

रूपते किं वा परमात्मेति तत्र जीव इति प्राप्ते कुतः पतिजायादिभोग्यजातं तव न भोक्तृरूपक्रमात्मं
वे. सू. ध्येयीदं महद्भूतमनन्तमपारं विज्ञानघन एवैतेभ्यो भूतेभ्यः समुत्थाय तान्येवानुविनश्यति न प्रे
७२ बृ. त्य संज्ञास्तीति प्रकृतस्य द्रष्टव्यस्य भूतेभ्यः समुत्थानं जीवस्वरूपेणावदन् जीवस्य द्रष्टव्यत्वं दर्श
73 यति अत्रार्थे तु इदं प्रत्यग्रूपं महद्भूतमनवच्छिन्नं भूतं सत्यं अनन्तं नित्यं अपारं सर्वगतं विज्ञान
घनो ज्ञानैकतानः ज्ञातृतरासंमिश्रार्थ एवमेवकारार्थः स चैभ्यः कार्यकारणाकारेण परिणते
भ्यो ऽविद्याभूतेभ्यः सम्यगुत्थाय जीवत्वमनुभूयमानेष्वभूतानि ज्ञानाद्धि नश्यति नित्यमनुपश्याद्धि न
श्यति जीवत्वं त्यजति नहि तत्त्यागानन्तरमस्य रूपादिविशेषज्ञानमस्तीति तस्माज्जीव इति प्राप्ते
ब्रूमः परमात्मैवाऽत्र द्रष्टव्यतयोपदिष्ट आत्मा कुतः वाक्यान्वयात् उपक्रमादिपर्यालोचनया
वाक्यस्य ब्रह्मण्येवाऽन्वयादित्यर्थः तथा हि अमृतत्वस्य तु नाशास्ति वित्तेनेति वित्तसाध्ये।
न कर्मणा मोक्षं प्रत्याशा नास्तीति याज्ञवल्क्याद् उपश्रुत्य मैत्रेयी मोक्षमाशासाना तत्साधनं पृ
च्छति येनाहं नामृता स्यां किमहं तेन कुर्याम् यदेव भगवान्वेद तदेव मे ब्रूहीति यदमृतत्वसाधन
त्वं वेत्थ तदेव मे ब्रूहीत्यर्थः एवं पृष्टो याज्ञवल्क्य इदमात्मज्ञानमुपदिशति आत्मा वा अरे द्रष्ट
व्य इत्यादिना नहि जीवज्ञानान्मोक्ष इति कश्चिदभ्युपैति अतो द्रष्टव्यः परमात्मा तथा आ।
त्मनो वा अरे दर्शनेनेति यदात्मज्ञानात्सर्वज्ञानं प्रतिज्ञातं तत्तद् दुन्दुभ्यादिदृष्टान्तैः साधयन् अस्य शि. ७२

73A

परमात्मत्वं गमयति स यथा दुंदुभेर्हन्यमानस्य न बाह्याञ्छब्दाञ्छक्नुयादिना दुंदुभिशंखवीणाशा
ब्ददृष्टान्तत्वेनोक्तास्तथा मध्ये यः दुंदुभिशंखवीणापदैस्तज्जन्यसामान्यशब्दो लक्ष्यते ते
ष्वाच यथा दुंदुभ्यादिशब्दसामान्याद् दुंदुभ्यादिशब्दविशेषाः भेदेनाग्रह्यमाणाः शुक्तिग्रहग्राह्य'
रजतवत्तत्र कल्पितास्तद्ग्रहणे गृहीता भवंति तथा चिद्रूपस्फुरणं विना स्थितिकाले स्फुरणाभू
त्तं जगत्तत्र कल्पितं तद्ग्रहणेन गृहीतं भवतीति न तत्तोतिरिच्यत इति तथा सत्तावदखिल
स्य तत्त्वं रज्ज्वुपसंहारदर्शनाच्चात्र द्रष्टव्य आत्मा परमात्मैवेति ननु प्रतिज्ञायादिभ्योपजाते न
लिंगेन जीवोपक्रमः प्रतीयते तत्कथमित्यत आह प्रतिज्ञासिद्धेर्लिंगमाश्मरथ्यः जीव।
ब्रह्मणोर्हि कार्यकारणयोर्भेदाऽभेदौ वर्तेते अत्यंतभेदे एकविज्ञानप्रतिज्ञाविरोधप्रसंगात्॥
तथा च तत्प्रतिज्ञासिद्धेरिदमभेदांशमादाय जीवोपक्रमणं लिंगमित्याश्मरथ्य आचार्यो मन्यते॥
जीवस्य कार्यत्वमभेदं समानसत्ताकभेदवत्त्वं सहमानः समाधानांतरमाह उत्क्रमिष्यत ए
वंभावादित्यौडुलोमिः संसारदशायामत्यंतभिन्नस्य जीवस्य ब्रह्मात्मत्वसाक्षात्काराकार्यका
रणसंघातादुत्क्रमिष्यत एवंभावात्परमात्मनैकीभावादविद्यदभेदमादाय जीवोपक्रम इ
त्यौडुलोमिराचार्यो मन्यते न त्विदमप्यसंमतं सत्यकार्यकारणसंघातवतः संसारिणोऽ
त्यंतभिन्नस्य मुक्तिदशायामभेदायोगादित्यरुच्या परमं समाधानमाह अवस्थितेरिति।

वे॰सू॰ वृं॰ ७३ काशकृत्स्नः ब्रह्मण एवाऽविद्याकल्पितभेदेन जीवरूपेणावस्थितेस्तमिदमधिकरणमिति बोध्यं॥
न च जन्माद्यधिकरणवैयर्थ्यं निर्विषयसमन्वयसाधनासंभवेन जगत्कारणात्मकविषयमा
त्रस्य तत्रोक्तत्वात् उपादानत्वं तु एतदधिकरणसिद्धं तत्रोक्तमिति न कश्चिद्दोषः जन्मादिन
74 यस्याध्यायादिसंगतत्वादस्यापि तद्विचारात्मकस्यास्याध्यायादिसंगतिः पूर्वपक्षे एव विज्ञा
नात्सर्वविज्ञानप्रतिज्ञा गौणत्वं सिद्धान्ते तन्मुख्यत्वमिति फलभेदः अत्र संशयः किं ब्रह्मणो
जगन्निमित्तत्वमात्रं उतोपादानत्वमपीति तत्र तदैक्षत बहु स्यां प्रजायेयेत्यादिना सर्वत्रेक्षा
पूर्वककर्तृत्वश्रवणात् कुलालवन्निमित्तत्वमात्रमिति प्राप्ते ब्रूमः प्रकृतिश्च ब्रह्म चकारान्निमि
त्तत्वमपि कुतः प्रतिज्ञादृष्टान्तानुपरोधात् प्रतिज्ञादृष्टान्तयोः सामंजस्यादित्यर्थः प्रतिज्ञा हि
येनाश्रुतं श्रुतं भवत्यमतं मतमविज्ञातं विज्ञातमिति सा च प्रतिज्ञा यस्यात्तज्ज्ञानेन सर्वविज्ञान
मुच्यमानमात्मन उपादानत्वं गमयति निमित्तत्वे तदसंभवात् नहि कुलालज्ञाने घटादिकं
ज्ञातमिति शक्यते वक्तुं उपादानत्वे तु तयोरुपादानोपादेययोरव्यतिरेकाद्युक्तं तज्ज्ञानेन तज्ज्ञा
नं दृष्टान्तोपि यथा सौम्यैकेन मृत्पिंडेन सर्वं मृन्मयं विज्ञातं स्याद्वाचारंभणं विकारो नामधेयं
मृत्तिकेत्येव सत्यमित्युपादानविषय एव दृश्यते विकारो वागालंबनमात्रं वस्तुतोऽसन्निति
यावत् तदेव साधयति नामधेयमिति मृन्नाशोयं निवेदयति मृत्तिकेति निमित्तत्वमपि प्रति ७३

74A

ज्ञादृष्टांतानुपरोधादेवबोध्यं निमित्तस्योपादानाद्भेदे प्रतिज्ञादृष्टांतयोरसामंजस्यात् तथाहि बृह
दारण्यकेपि प्रतिज्ञादृष्टांतौ दृश्यते आत्मनि खल्वरे दृष्टे श्रुते मते विज्ञाते इदं सर्वं विदितमिति प्रति
ज्ञाय यथा दुंदुभेर्हन्यमानस्य न बाह्यान् शब्दान् शक्नुयात् ग्रहणाय दुंदुभेस्तु ग्रहणेन दुंदुभ्याघा
तस्य वा शब्दो गृहीत इति दृष्टांतः छांदोग्याधिष्ठानतया उ गतोयं प्रकाशः स उपादानभिन्ने त्वदृ
ष्टांते यथा तयोच्यते वा स्यात् दुंदुभिशब्दसामान्याद्बहिर्भूतान् दुंदुभेस्तत्कृतसामान्यस्येत्यर्थः त
थाच हन्यमानदुंदुभिजन्यस्य शब्दसामान्यस्य ग्रहणमंतरेण कश्चित् पुमान् दुंदुभिशब्दसामान्य
स्य बहिर्भूतान् निशब्दविशेषान् ग्रहणाय ग्रहीतुं न शक्नुयादिति व्यतिरेकः अन्वयोपि दुंदुभिशब्द
सामान्यस्य ग्रहणेन दुंदुभ्याघातसंतको विशेषशब्दो गृहीतो भवति दुंदुभ्याघातस्य वीररसाभिव्यं
जकस्य विशेषशब्दस्य ग्रहणात्तद्वातरशब्दविशेषो गृहीतो भवतीत्यर्थः अभिध्योपदेशाच्च
इतश्चात्मनः कर्तृत्वप्रकृतित्वे कुतः अभिध्योपदेशात् ध्यानोपदेशादित्यर्थः सोकामयत
ति ध्यानोपदेशात्कर्तृत्वं बहु स्यामिति ध्यानोपदेशात्प्रकृतित्वमिति साक्षाच्चोभयाम्नानात् प्रकृ
तित्वे हेत्वंतरमिदं सर्वाणि ह वा इमानि भूतान्याकाशादेव समुत्पद्यंते आकाशं प्रत्यस्तं यंतीत्याका
शादेव साक्षाद्ब्रह्मणः गृहीत्वा जगदुत्पत्तिप्रलयौ रुभयोराम्नानात् ब्रह्मप्रकृतिरित्यर्थः यस्मिन्नुत्प
त्तिलयौ यस्य कार्यस्य तत्कार्यं प्रति तदुपादानं यथा घटस्य मृदिति व्याप्तेरिति भावः आत्मकृतेः परि

णमात्॥ लोके हि कृतिमान् कर्त्ता कृतिविषयो मृदादिरुपादानमिति व्यवस्था प्रकृतेश्चात्मनः कृतिम
त्वेन कृतिविषयत्वं च स्यात्तेन तदात्मानं स्वयमकुरुतेति आत्मानमिति द्वितीयया कृतिविषयत्वं स्व
७४ यमिति तेन कृतिमत्त्वं तथा च ब्रह्म निमित्तमुपादानं च कुतः आत्मकृतेः आत्मनस्तं च यतो कृति
75 रात्मकृतिः सैव ययोर्विषयविषयीभावः आधाराधारिभावश्च तत्तो हेतोरित्यर्थः ननु आत्मनः कर्तृ
त्वेन पूर्वं सिद्धस्य कथं कृतिकर्मत्वमत आह परिणामादिति परिणामो विवर्त्तः सिद्धस्यापि विव
र्त्तात्मना साध्यत्वात्कर्मत्वोपपत्तिरित्यर्थः यद्वा परिणामादिति पृथक्सूत्रं तत्र अप्रकृतिर्ब्रह्म कु
तः परिणामात् सच्च त्यच्चाभवदित्यादिना परिणामसामानाधिकरण्ये न आत्मनः श्रवणादित्य
र्थः मृत्तद्घटः इति प्रकृतिविकारयोः सामानाधिकरण्यं दृष्टमिति भावः योनिश्च हि गीयते यद्भूत
योनिं परिपश्यन्ति धीराः कर्त्तारमीशं पुरुषं ब्रह्मयोनिमिति च प्रकृतिवाचकयोनिशब्देनात्मापि
तो गीयते अतश्च प्रकृतिर्ब्रह्मेत्यर्थः तस्मात् ब्रह्मणः प्रकृतित्वं कर्तृत्वं चेति सिद्धं एतेन सर्वे व्या
ख्याता व्याख्याताः एतावता ग्रन्थेन ईक्षतेर्नाशब्दमित्यादिना अशब्दत्वादिभिः हेतुभिः प्रधानका
रणवादो निराकृतः न पुनः परमाणुप्रभवादिसत्कारणवादाः तेषामपि कारणत्वबोधकश्रुतयो दृश्य
न्ते तथा हि छान्दोग्ये श्वेतकेतुं प्रत्युद्दालकः सूक्ष्मत्वं ब्रह्मणि स्थूलस्मात् तदभावे प्रतिपिपादयिषुरा
ह न्यग्रोधफलमत आहरेतीदं भगवः इति भिन्धीति भिन्नं भगव इति किमत्र पश्यसीत्यण्व्य इवेमा ७४।

याना भगवइत्यासामंगक्तांभिंधीनिभिन्नाभगवइति किमत्रपश्यसीति किंचन भगवइति एतस्य वै सो
76 म्यैषोणिम्न एवं महान्यग्रोधस्तिष्ठतीति जगतः प्रागवस्थायां दृष्टान्तः श्रूयते तत्र न किंचनाणि
रात्मस्वरूपात्स्वभावादकारणवादादार्ष्टान्तिकत्वेन प्रतीयते तथा असदेवेदमग्रआसीत्
तत्राप्यनामरूपाभ्यामेव व्याकृतं क्रियते तादृशो असत्स्वभाववादो प्रतीयते तासामेषां श्रुतीनां तेषु वादेषु
64 तात्पर्यमस्ति न वेति संशये अस्तीति प्राप्ते अतिदिशति एतेनेति एतेन प्रधानकारणवादे
निराकृते ईक्षतेर्नाशब्दत्वाचेतनत्वेकु विज्ञानप्रतिज्ञानुपपत्त्यादयस्तेषामपवादिप्रयत्नेपि न्या
येन सर्वे एवादिकारणवादा निराकृतत्वेन व्याख्याताः नच न किंचनादिशब्दविरोधः॥ अ
नभिव्यक्तनामरूपपरत्वेनाविरोधात्॥ सूत्रतात्पर्यमप्यणशब्दो गौणः स्वभाववादस्तु
पूर्वमेव समाहितः अभ्यासोऽध्यायपरिसमाप्तिं द्योतयति तस्माज्जगत्कारणे सर्ववेदान्तैर्जिज्ञास्ये
वेदान्तानां समन्वयो नान्यत्रेति सिद्धं समन्वयस्य हि लिंगमस्पष्टत्वेन पाठस्यगौ॥ द्वेयगोपदमा
त्रेविंशे पादद्वयनुक्रमादिति ॥ राम ॥ इति श्रीपरमहंसपरिव्राजकाचार्यश्रीचरण
शिक्षितश्रीरामकिंकरचर्यहरिनौप्रबलसूत्रवृत्तौ ब्रह्मामृतवर्षिण्यां प्रथमस्याध्यायस्य चतुर्थः
पादः प्रथमाध्यायः १ समाप्तः ॐकार॥ ॥ आत्मब्रह्मविचारदेसार॥ शिवकिरयासो हेनि